1933.

THE

CHOWKHAMBÂ SANSKRIT SERIES

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 421.

वादवारिधिः।

महामहोपाध्याय–

श्रीगदाधरभट्टाचार्यादिविपश्चिद्वरैर्विरचितः।

काशीविश्वविद्यालय वेदान्तप्रधानाध्यापक–दार्शनिक–

प्रवरश्रीबालकृष्णमिश्रेण निर्यातः।

नित्यानन्दवेदविद्यालय प्रधानाध्यापक पण्डितवर

श्रीढुण्ढिराजशास्त्रिणा संशोधितः।

VÂDA VÂRIDHI

By

M. M. S'RI GADÂDHARA BHATTÂCHÂRYA

and others.

Edited by

Pandit S'ri Bâlakrishna Mis'ra,

Vice-Principal, Hindu University, Benares,

and

Pandit Dhundhirâj Shâstri,

Principal, N. Veda Vidyālaya, Benares.

FASCICULUS I–१.

PUBLISHED & SOLD BY THE SECRETARY

CHOWKHAMBA SANSKRIT SERIES OFFICE,

Benares City.

1933

॥ श्रीः ॥



आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दाऽऽमोदमोहितम् ॥ २

स्तवकः—४२१

Printed by Jai Krishna Das Gupta
at the Vidya Vilas Press, Benares.

वादवारिधौ

प्रत्यक्षखण्डकल्लोले

(१)अनुद्भूतरूपादिखण्डनवादवीचिः ।

तत्र उद्भूतत्वानुद्भूतत्वस्वरूपानिर्वचनम् ।

ननु रूपं द्विविधमुद्भूतमनुद्भूतं च । तत्र घ्राणरसनचक्षुःपिशाचादीनां भर्जनकपालस्थवह्न्याद्यूष्मणोश्चानुद्भूतं रूपमुद्भूतरूपं च घटपटादीनाम् । न च तादृशद्वैविध्ये मानाभावः, उद्भूतत्वानुद्भूतत्वयो रूपनिष्ठधर्मयोरनभ्युपगमेऽपि क्षतिविरहादिति वाच्यम् । द्रव्यचाक्षुषं प्रति सामान्यतो रूपत्वेन कारणत्वे घ्राणादीनामपि चाक्षुषापत्त्या उद्भूतरूपत्वेनैव तत्र हेतुत्वं घ्राणादिरूपव्यावृत्तमित्यवश्याभ्युपेयत्वात् । एवं स्पर्शोऽप्युद्भूतानुद्भूतभेदेन द्विविधः । तत्र घ्राणरसनचक्षुस्त्वक्पिशाचादीनां प्रभाबाष्पयोश्चानुद्भूतः स्पर्शः, घटपटादीनामनिन्द्रियवायुभर्जनकपालस्थवह्न्याद्यूष्मसौरादितेजःप्रभृतीनां चोद्भूतः स्पर्शः । न च स्पर्शस्य तादृशद्वैविध्ये मानभावः, उद्भूतत्वानुद्भूतत्वयोः स्पर्शनिष्ठधर्मयोरनभ्युपगमेऽपि क्षतिविरहादिति वाच्यम् । द्रव्यस्पार्शने सामान्यतः स्पर्शत्वेन कारणत्वे घ्राणादीनां प्रभाबाष्पयोश्च स्पार्शनापत्त्या उद्भूतस्पर्शत्वेनैव तत्र हेतुत्वं, तच्चोद्भूतत्वं घ्राणादिस्पर्शप्रभाबाष्पव्यावृत्तमित्यवश्यमभ्युपगमात् । एवं रसोऽप्युद्भूतानुद्भूतभेदेन द्विविधः । घ्राणरसनमणिवज्रादीनामनुद्भूतो रसः उद्भूतो रसश्च गुडादीनाम् । न च तादृशद्वैविध्ये मानाभावः, रसरासनं प्रति सामान्यतो रसत्वेन कारणत्वे रसनसंयुक्तप्रकृष्टमहत्त्ववत्समवायसंनिकर्षेण घ्राणमणिवज्रादीनामपि रसोपलब्ध्यापत्त्या उद्भूतरसत्वेनैव तत्र हेतुत्वं, तच्चोद्भूतत्वं घ्राणादिरसव्यावृत्तमित्यवश्याभ्युपगमात् । एवं गन्धोऽप्युद्भूतानुद्भूतभेदेन द्विविधः । तत्र घ्राणपाषाणमणिवज्रादीनामनुद्भूतो गन्धः, उद्भूतो गन्धश्च घटपटचंपकादीनाम् । न च तादृशद्वैविध्ये मानाभावः, गन्धघ्राणजत्वावच्छिन्नं प्रति सामान्यतो गन्धत्वेनैव हेतुत्वे घ्राणसंयुक्तप्रकृष्टमहत्त्ववत्समवायलक्षणसन्निकर्षेण पाषाणादीनामपि गन्धोपलब्ध्यापत्त्या उद्भूतगन्धत्वेनैव तत्र हेतुत्वं, तच्चोद्भूतत्वं पाषाणादिगन्धव्यावृत्तमित्यवश्याभ्युपेयत्वात् । न

च गन्धघ्राणजत्वावच्छिन्नं प्रति गन्धत्वेनैव कारणत्वं घ्राणसंयुक्तमहदुद्भूतरसवत्समवायस्य सन्निकर्षतया च न घ्राणादीनां गन्ध इत्येवास्तु किं गन्धनिष्ठोद्भूतत्वकल्पनेन, निर्गन्धस्यापि रसवतो जलस्य सत्त्वेनोक्तयुक्त्या रसनिष्ठोद्भूतत्वस्यावश्यकत्वादिति वाच्यम्। अनन्तरसानां सन्निकर्षकारणतावच्छेदककोटौ प्रवेशमपेक्ष्योद्भूतगन्धत्वेन गन्धस्य कारणताया एव लघुत्वात्। धूमस्य नीरसत्वे तदीयगन्धग्रहे उक्तसन्निकर्षस्य व्यभिचाराच्चेति नैयायिकसिद्धान्तः।

तत्र रूपनिष्ठोद्भूतत्वानुद्भूतत्वे कः पदार्थः? किमुभयमेव जातिः? अथ वोद्भूतत्वं जातिस्तदभावोऽनुद्भूतत्वम्? अथवा अनुद्भूतत्वजातिस्तदभाव उद्भूतत्वम्? इति चेत्।

अत्र सिद्धान्तानुयायिनो नैयायिकाः। अनुद्भूतत्वं जातिस्तदभाव उद्भूतत्वं न तूद्भूतत्वं जातिस्तदभावोऽनुद्भूतत्वम्, नीलत्वपीतत्वशुक्लत्वादिना सङ्करात्।

अथैवमनुद्भूतत्वमपि कथं जातिः नीलत्वादिना सङ्करात्। न चानुद्भूतत्वं नीलत्वपीतत्वादीनां सर्वेषामेव विरुद्धमनुद्भूतरूपस्यातीन्द्रियतया तत्र नीलत्वादिसत्त्वे मानाभावादिति वाच्यम्। तथासति तत्र रूपत्वादिसत्त्वेपि मानाभावात्, घ्राणादावनुद्भूतरूपात्मकधर्मिसत्त्वेऽपि मानाभावाच्च। पृथिवीत्वादे रूपत्वावच्छिन्नव्याप्यतया घ्राणादावनुद्भूतरूपस्य तत्र रूपे रूपत्वस्य च सिद्धिरिति विभाव्यते, तदा रूपत्वस्य नीलाद्यन्यतमत्वव्याप्यतया नीलत्वादेरपि तत्रावश्यकत्वात्।

नव्यास्तु नीलत्वादेर्यस्य कस्यचिदेकस्य तद्व्याप्यमिति वाच्यं विनिगमकाभावात्, विनिगमकाभावेन सर्वेषामेव व्याप्यत्वाभ्युपगमे च नीलत्वपीतत्वादीनामेव परस्परं-सङ्करप्रसङ्गादिति चेत्। सत्यम्। नीलत्वपीतत्वव्याप्यं नानैवानुद्भूतत्वमनुद्भूतत्वाभावकूटवत्त्वमेवोद्भूतत्वम्, तद्रूपत्वेनैव द्रव्यचाक्षुषं प्रति जनकत्वं तादृशाभावकूटवत्त्वस्यानुगतत्वात्, उद्भूतत्वस्यैव नीलत्वपीतत्वव्याप्यनानाजातित्वे च तेन रूपेण द्रव्यचाक्षुषं प्रति जनकत्वस्य परस्परं व्यभिचारापत्तेः। न च तथापि घ्राणादिनिष्ठमनुद्भूतरूपं नीलात्मकं पीताद्यात्मकं वेत्यत्र विनिगमकाभाव इति वाच्यम्। विनिगमकाभावेन व्याप्यवृत्तिनीलपीतादिनानानुद्भूतरूपाणामेव तत्राभ्युपगमात्।

वस्तुतस्त्वनुद्भूतत्वं शुक्लत्वव्याप्यमेव सर्वेषामेवानुद्भूतं शुक्लमित्यभ्युपगमात्, शुक्लरूपस्य च घ्राणाद्यात्मकपृथिव्यामपि सम्भवात्। न च शुक्लत्वव्याप्योत्कर्षापकर्षाभ्यां समं साङ्कर्यमिति वाच्यम्। अनुद्भूत-

रूपस्यात्यन्तापकृष्टरूपतया तत्रोद्भूतशुक्लसाधारणोत्कर्षसत्त्वे मानाभावात्। न च तथापि भास्वरत्वमादाय साङ्कर्यं दुर्वारं तेजसो भास्वररूपवत्त्वनियमेन चक्षुरादिरूपे भास्वरत्वस्यावश्यकत्वात्, तादृशनियमानभ्युपगमे तेजसो रूपवत्त्वनियमस्याप्यपह्नवसम्भवेन तत्रानुद्भूतरूपस्याप्यसिद्धिप्रसङ्गादिति वाच्यम्। अनुद्भूतत्वस्य भास्वरत्वव्याप्यविरुद्धभेदेन द्विविधत्वात्, तादृशानुद्भूतत्वाभावद्वयवद्रूपत्वेन चाक्षुषं प्रति हेतुता।

अथ सर्वेषामेवानुद्भूतरूपं शुक्लमित्यभ्युपगमे अनुद्भूतत्वमेव नीलत्वपीतत्वादिसकलशुक्लत्वविरुद्धजातिव्यापिका घ्राणादिनिष्ठानुद्भूतशुक्लरूपव्यावृत्ता द्रव्यचाक्षुषजनकत्वावच्छेदकत्वेन सिद्धा जातिस्तु लाघवात्। अनुद्भूताभावद्वयवद्रूपत्वेन द्रव्यचाक्षुषं प्रति जनकत्वे गौरवात्। न च शुक्लत्वतद्व्याप्यभास्वरत्वमादाय साङ्कर्यमिति वाच्यम्। शुक्लत्वतद्व्याप्यभास्वरत्वयोरनुद्भूतत्वव्याप्यविरुद्धभेदेन द्विविधत्वात्। अनेकजातिकल्पनं तदवच्छिन्नं प्रति पाकावयवरूपयोरनेककार्यकारणभावकल्पनं च फलमुखं,फलमुखं गौरवं च न दोषायेति सिद्धान्त इति चेन्न।

नीलत्वपीतत्वादीनां रूपत्वसाक्षाद्व्याप्यत्वनियमात्, भास्वरत्वस्य रूपत्वसाक्षाद्व्याप्यजातिसाक्षाद्व्याप्यत्वनियमाच्च। तादृशनियमानभ्युपगमे पृथिव्यादे रूपवत्त्वनियमस्याप्यपह्नवसम्भवेनानुद्भूतरूपस्यासिद्धिप्रसङ्गात्।

एवं स्पर्शनिष्ठानुद्भूतत्वमपि स्पर्शत्वादिव्याप्या नानाजातिः, जलस्पर्शनिष्ठानुद्भूतत्वं शीतत्वव्याप्यं, तैजसस्पर्शनिष्ठानुद्भूतत्वमुष्णत्वव्याप्यं, पृथिवीवायुस्पर्शनिष्ठानुद्भूतत्वमनुष्णाशीतत्वं व्याप्यम्, तदभावकूटस्यानुगतत्वात्। उद्भूतस्पर्शत्वस्यैव शीतत्वादिव्याप्यनानाजातित्वे उद्भूतस्पर्शत्वेन द्रव्यस्पार्शनं प्रति जनकत्वस्य परस्परं व्यभिचारापत्तेः। रसनिष्ठानुद्भूतत्वमपि तिक्तमधुरत्वादिव्याप्या नाना जातिः। घ्राणरसनादिकं च विनिगमनाभावात्तिक्तमधुराद्यनुद्भूतरसवदेव। वस्तुतो रसनिष्ठानुद्भूतत्वं मधुरत्वव्याप्यमेव सर्व एवानुद्भूतरसो मधुर इत्यभ्युपगमात्। रसनाद्यात्मकजलनिष्ठरसेऽपि तस्य सत्त्वेन तिक्तत्वादिव्याप्यत्वासम्भवात्, 'अपां मधुर एव रस' इति नियमात्। तादृशानुद्भूतत्वाभाववद्रसत्वमेवोद्भूतरसत्वम्, तेनैव रूपेण रसदासनत्वादिव्याप्यनानाजातित्वे च रसरासनत्वावच्छिन्नं प्रति तेन रूपेण जनकत्वस्य परस्परव्यभिचारापत्तेश्च। गन्धनिष्ठानुद्भूतत्वं च विनिगमकाभावेन द्विविधम्, एकं सुरभित्वव्याप्यमपरं चासुरभित्वव्याप्यम्, तदभावद्वयवद्गन्धत्वमेवोद्भूतगन्धत्वम् तेनैव रूपेण

गन्धघ्राणजत्वावच्छिन्नं प्रति जनकत्वम् । उद्भूतगन्धत्वस्यैव जातित्वे सुरभ्यसुरभ्योरेव क्वचित्क्वचित्सत्त्वेन सुरभित्वादिकमादाय साङ्कर्यापत्तेः, नानात्वाभ्युपगमे च गन्धघ्राणजत्वावच्छिन्नं प्रति तेन रूपेण जनकत्वस्य परस्परं व्यभिचारापत्तेः । घ्राणपाषाणादिकं च सुरभ्यसुरभ्यनुद्भूतगन्धवदेव विनिगमकाभावादित्याहुः ॥ इति उद्भूतत्वानुद्भूतत्वस्वरूपनिर्वचनम् ॥

अनुद्भूतरूपादिखण्डनम् ।

अत्र मीमांसकानुयायिनो नव्यनैयायिकाः । तादृशरूपादिद्वैविध्ये मानाभावः, सामान्यतो द्रव्यचाक्षुषं प्रति रूपत्वेन द्रव्यस्पार्शनं प्रति स्पर्शत्वेन रसरासनत्वावच्छिन्नं प्रति रसत्वेन गन्धघ्राणजत्वावच्छिन्नं प्रति गन्धत्वेन लाघवेनैव हेतुत्वात् । नचैवं घ्राणरसनचक्षुःपिशाचादीनामपि चाक्षुषापत्तिः, तेषां प्रभाबाष्पयोः स्पार्शनापत्तिः; घ्राणरसनमणिवज्रादिवृत्तिरसानामपि रासनापत्तिः, घ्राणपाषाणमणिवज्रादिगन्धानामपि घ्राणजापत्तिरिति वाच्यम् । तेषां नीरूपत्वनिःस्पर्शत्वनीरसत्वनिर्गन्धत्वाभ्युपगमात् । एवं यत्र यत्रानुद्भूतरूपरसगन्धस्पर्शवत्त्वं नैयायिकसिद्धान्तिभिरभ्युपेयते तत्रैव नीरूपनीरसनिर्गन्धनिःस्पर्शत्वाभ्युपगमात् लाघवात्, तेषां रूपादिमत्त्वे मानाभावाच्च, द्रव्यत्वादेरिव पृथिवीत्वादेरपि रूपादिमत्त्वव्याप्यत्वे मानाभावात् । नचैवं प्रत्यक्षसिद्धरूपादिमदवयव्यानारम्भका एव परमाणवो घ्राणादिकमारभन्ते इति नियतारम्भवादिमते साधु शोभते भूतपरमाणूनामपि रूपादिरहिततयाऽवयवरूपादिविरहादेवावयविनि घ्राणादौ रूपाद्यनुत्पत्तेः सुवचत्वात् । य एव परमाणवः प्रत्यक्षसिद्धरूपादिमत्पृथिव्यादिकमारभन्ते त एव घ्राणादिकमप्यारभन्ते इत्यनियतारम्भवादिनये तु न सङ्गच्छते प्रत्यक्षसिद्धरूपादिमदारम्भकतान्यथानुपपत्त्या परमाणुषु रूपादेरावश्यकत्वेऽवयवरूपादिक्रमेण घ्राणादिष्वपि रूपाद्युत्पत्तौ बाधकाभावादिति वाच्यम् । अनियतारम्भनयेऽपि समवायसम्बन्धेन रूपाद्युत्पत्तिं प्रति तादात्म्यसम्बन्धेन घ्राणाद्यारम्भकद्व्यणुकत्वेन प्रतिबन्धकतया तत्र रूपाद्यनुत्पादात्, द्व्यणुकेरूपाद्यनुत्पत्तौ अवयववृत्तिरूपाद्यभावादेव घ्राणादौ त्रसरेण्वादितदवयवपरम्परायां रूपाद्युत्पत्तेरसम्भवात् । घ्राणाद्यारम्भकत्वं च साक्षात्परम्परासाधारणतदवयवत्वसम्बन्धेन घ्राणादिमत्त्वम् । परमाणुवारणाय द्व्यणुकत्वप्रवेशः । द्व्यणुकत्वं च विलक्षणपरिमाणवत्त्वम् । यद्वा घ्राणाद्यारम्भकजन्यावयवत्वेन प्रतिबन्धकत्वम् । घ्राणाद्यारम्भकजन्यावयवत्वं च

साक्षात्परम्परासाधारणतदवयवत्वकालिकविशेषणत्वोभयसम्बन्धेन घ्राणादिमत्त्वम् । साक्षात्परम्परासाधारणतदवयवत्वं च तन्निष्ठसमवायसम्बन्धावच्छिन्नसंयोगाद्याधारतावच्छेदकताविशेषवत्त्वम् । अस्तु वा समवायसम्बन्धेन रूपाद्युत्पत्तौ तादात्म्यसम्बन्धेन घ्राणादिनैव प्रतिबन्धकत्वं लाघवात् । नचैवं घ्राणाद्यवयवे रूपाद्युत्पत्तिर्दुर्वारेति वाच्यम् । एतदनुरोधेनैव घ्राणत्वादेरवयवावयविवृत्तिजातित्वाभ्युपगमात् ।

अथैवं घ्राणरसनादिभेदेन तादृशबहुतरप्रतिबध्यप्रतिबन्धकभावकल्पनामपेक्ष्य घ्राणादावनुद्भूतरूपादिकल्पनैव लघीयसी, द्रव्यचाक्षुषादिकं प्रति उद्भूतरूपत्वादिना हेतुत्वादेवानुद्भूतरूपादिसत्त्वेपि चाक्षुषाद्यनुत्पादात् । न च तत्रानुद्भूतरूपाभ्युपगमेऽप्यनियतारम्भनयेऽपि घटपटादावुद्भूतरूपवत्यनुद्भूतरूपोत्पादवारणायानुद्भूतरूपं प्रति घटपटादीनामनन्तप्रतिबन्धकत्वं दुर्वारम्, अनियतारम्भनयेऽनुद्भूतरूपं प्रति उद्भूतरूपस्यासमवायिकारणताया व्यभिचारेण दुर्वचत्वादिति वाच्यम् । अनुद्भूतरूपं प्रति सामान्यतस्तदितररूपत्वेनैव तादात्म्यसम्बन्धेन प्रतिबन्धकत्वात् । न च तथाप्यनियतारम्भनये घ्राणादावुद्भूतरूपोत्पत्तिवारणाय उद्भूतरूपं प्रति घ्राणत्वादिना प्रतिबन्धकत्वमावश्यकम्, उद्भूतरूपं प्रति उद्भूतरूपस्यासमवायिकारणत्वाभ्युपगमेपि घ्राणाद्यारम्भकद्व्यणुकेपि उद्भूतरूपापत्तेर्दुर्वारत्वादिति वाच्यम् । निरुक्तप्रतिबन्धकाभावाद्यात्मकानुद्भूतरूपसामग्रीसत्त्वेनानुद्भूतरूपस्यैव घ्राणादावुत्पादात्, नीलेतरघटत्वनिश्चयत्वादिवदनुद्भूतेतररूपत्वात्मकस्योद्भूतरूपत्वस्यार्थसमाजग्रस्तत्वेन कार्यतानवच्छेदकतया तदवच्छिन्नापादनासम्भवात् । यदि चानुद्भूतरूपाभ्युपगमेऽवयवरूपजन्यतावच्छेदकजातिद्वयमेकमनुद्भूतत्वव्याप्यमपरं च तद्विरुद्धम्, अन्यथा साङ्कर्यापत्तेः, तथाच घ्राणादौ तदारम्भकद्व्यणुके चानुद्भूतत्वविरुद्धावयवरूपजन्यतावच्छेदकवैजात्यावच्छिन्नापत्तिवारणाय तादृशजात्यवच्छिन्नं प्रति घ्राणत्वादिना प्रतिबन्धकत्वमनियतारम्भनये तथाप्यावश्यकमिति सूक्ष्ममीक्ष्यते, तदापि न तादृशजात्यवच्छिन्नं प्रति घ्राणत्वादिना प्रातिस्विकरूपेण प्रतिबन्धकत्वम्, अपि तु सामान्यतोऽनुद्भूतरूपवत्त्वेनैव तादात्म्यसम्बन्धेनोद्भूतरूपत्वावच्छिन्नं प्रति प्रतिबन्धकत्वमतो लाघवमिति चेन्न ।

घ्राणादावनन्तानुद्भूतरूपतद्ध्वंसतदुभयकार्यकारणभावातिरिक्तानुद्भूतत्वजातिकल्पनां द्रव्यचाक्षुषादिकं प्रति उद्भूतरूपत्वादिना गुरुधर्मेण कारणत्वकल्पनां चापेक्ष्य रूपत्वाद्यवच्छिन्नं प्रति घ्राणत्वादिना कतिपयप्रतिबन्धकत्वकल्पनाया एव युक्तत्वात् ।

वस्तुतस्त्वनियतारम्भनये रूपत्वाद्यवच्छिन्नं प्रति तादात्म्यसम्बन्धेन घ्राणादिना घ्राणाद्यारम्भकद्व्यणुकत्वादिना वा प्रतिबन्धकत्वमेव नोपेयं क्रियासंयोगकार्यकारणभावोक्तयुक्त्या तत्तद्व्यक्तित्वविशिष्टसमवायसम्बन्धेन सत्त्वावच्छिन्नोत्पत्तिं प्रति तत्तद्व्यक्तित्वेन समवायिकारणत्वस्यावश्यकतया यावद्विशेषसामग्रीबाधादेव घ्राणादौ रूपाद्युत्पत्तेरसम्भवात्, घटपटादिरूपतत्तद्व्यक्तिसमवेतातिरिक्तरूपादेरलीकत्वात्। नचैवं घ्राणादावनुद्भूतरूपत्वादिना प्राचीनेनानियतारम्भनयेऽनुद्भूतरूपं प्रति तादात्म्यसम्बन्धेन तदितररूपवतोऽनुद्भूतेतररूपत्वावच्छिन्नं प्रति तादात्म्यसम्बन्धेनानुद्भूतरूपवतश्च प्रतिबन्धकत्वं नोपेयमुक्तक्रमेण यावद्विशेषसामग्रीविरहादेवातिप्रसङ्गवारणसम्भवात्, तथाच जरन्मते को विशेष इति वाच्यम्। अनन्तानुद्भूतरूपतद्ध्वंसतदुभयकार्यकारणभावातिरिक्तानुद्भूतत्वजातिकल्पनाया द्रव्यचाक्षुषं प्रत्युद्भूतरूपत्वेन गुरुधर्मेण कारणत्वकल्पनायाश्च जरन्मते विशेषत्वात्। तेन रूपादेरुद्भूतत्वानुद्भूतत्वरूपद्वैविध्यखण्डनम्, द्रव्यचाक्षुषादिकं प्रति उद्भूतरूपत्वादिना कारणत्वकल्पने च गौरवान्मानाभावाच्च। परन्तु घ्राणादीनां नीरूपत्वनिःस्पर्शत्वाभ्युपगम एवानियतारम्भनये न युक्तः, रूपस्पर्शभेदेन घ्राणादेः प्रतिबध्यप्रतिबन्धकभावकल्पनामपेक्ष्य लाघवाल्लौकिकविषयतासम्बन्धेन प्रत्यक्षत्वावच्छिन्नोत्पत्तिं प्रत्येव घ्राणत्वादिना प्रतिबन्धकत्वं रूपस्पर्शौ तु तेषु वर्त्तेते एवेत्यभ्युपगमस्यैव युक्तत्वात्। न च तावता घ्राणादेः प्रत्यक्षतावारणेऽपि तद्वृत्तिरूपस्पर्शादेः तद्वृत्तिघ्राणत्वादिजातेश्च प्रत्यक्षापत्तिर्दुर्वारा चक्षुःसंयुक्तरूपवन्महत्समवायादिलक्षणस्य सन्निकर्षस्य सत्त्वात्, समवेतत्वसम्बन्धेनापि प्रत्यक्षत्वावच्छिन्नं प्रति घ्राणत्वादिना प्रतिबन्धकत्वोपगमे तद्वृत्तिसत्ताद्रव्यत्वपृथिवीत्वादेरपि घटादावप्रत्यक्षत्वापत्तेः, तद्वृत्तिरूपस्पर्शादीनां तु तत्तद्व्यक्तित्वेन प्रतिबन्धकत्वोपगमे चानन्तप्रतिबध्यप्रतिबन्धकभावकल्पनापत्तेरिति वाच्यम्। घ्राणादेरप्रत्यक्षत्वे तद्वृत्तिरूपस्पर्शादेरपि प्रत्यक्षासम्भवात्, चक्षुःसंयुक्तचाक्षुषसमवायत्वक्संयुक्तत्वाचसमवायत्वाभ्यामेव चक्षुःसंयुक्तसमवायादिलक्षणसन्निकर्षस्य कारणत्वाभ्युपगमात्। चाक्षुषत्वादिकं चोपलक्षणं न तु विशेषणम्, तेन घटादेः पूर्वं चाक्षुषादिविरहेऽपि तद्वृत्तिगुणकर्मजातीनां न प्रत्यक्षानुपपत्तिः। न च त्वक्संयुक्तत्वाचसमवायत्वेन कारणत्वे वायूष्मादिवृत्तिस्पर्शादेरपि प्रत्यक्षं न स्यात् त्वाचसमवायविरहादिति वाच्यम्। नव्यनैयायिकैर्वायूष्मादेरपि त्वाचाङ्गीकारात्। तस्मादनियतारम्भनये घ्राणादीनां रूपस्पर्श-

वत्त्वमेव युक्तम्। किन्तु यत्र रूपवत्त्वं प्रत्यक्षसिद्धम् नतु स्पर्शवत्त्वं तस्य नियतानियतारम्भोभयमते एव निःस्पर्शत्वं युक्तं, यथा प्रभाबाष्पयोः। एवं यत्र स्पर्शवत्त्वं प्रत्यक्षसिद्धं न तु रूपवत्त्वं तस्य नियतारम्भानियतारम्भोभयमत एव नीरूपत्वं युक्तं, यथा भर्जनकपालस्थवह्न्याद्यूष्मणः, तत्र तत्र प्रतिबध्यप्रतिबन्धकभावद्वयकल्पनाविरहात् लौकिकविषयतासम्बन्धेन प्रत्यक्षत्वेन प्रतिबध्यत्वमपेक्ष्य समवायसम्बन्धेन रूपत्वादिना प्रतिबध्यत्वस्यैव युक्तत्वाच्चेति कस्यचित्प्रलपितमप्यपास्तम्। घ्राणादावनन्तरूपस्पर्शतद्ध्वंसकल्पनामपेक्ष्य रूपस्पर्शभेदेन घ्राणादेः प्रतिबध्यप्रतिबन्धकभावद्वयकल्पनाया एव न्याय्यत्वात् तन्मतेपि प्रत्यक्षं प्रति घ्राणादेःप्रतिबन्धकत्वस्यावश्यकत्वात्, एकस्यैव प्रतिबध्यप्रतिबन्धकभावस्य समधिकत्वात्, एकस्यामेव व्यक्तौ चाक्षुषादिव्यक्तीनां कालभेदेनानन्ततया तन्मते सन्निकर्षकारणतावच्छेदकशरीरगौरवप्रसङ्गाच्च। न च कार्यकारणभावकल्पनाह्रासे अनन्तव्यक्तिकल्पनापि न दोषायेति सर्वसिद्धम्, अत एव सन्निकर्षकारणतावच्छेदकशरीरगौरवमप्यकिञ्चित्करम्, कार्यकारणभावकल्पनाह्रासे कारणतावच्छेदकशरीरगौरवमपि न दोषायेत्यस्यापि सर्वसिद्धत्वादिति वाच्यम्। घ्राणादिनिष्ठाप्रामाणिकानन्तरूपस्पर्शव्यक्तीनां तद्ध्वंसं प्रति च तद्व्यक्तित्वेनानन्तकार्यकारणभावानां कल्पनीयतया कार्यकारणभावबाहुल्यस्यैव प्रसङ्गात्। किञ्च रूपस्पर्शभेदेन घ्राणादेर्न प्रतिबध्यप्रतिबन्धकभावद्वयम्, अपि तु सामान्यतो मूर्तविशेषगुणत्वावच्छिन्नं प्रत्येव तस्य प्रतिबन्धकत्वम्। मूर्तविशेषगुणत्वं प्रतिबध्यतावच्छेदकतया सिद्धो रूपत्वादिव्यापको जातिविशेषः, स च द्रवत्वद्वयसाधारणो द्रवत्वद्वयव्यावृत्तो वा, नातो विशेषद्रवत्वत्वद्वयमादाय साङ्कर्यम्। एतच्च न विशेषगुणव्यवहारनियामकं तेनातिप्रसक्तिरप्रसक्तिर्वा न दोषाय, अनन्तरूपस्पर्शकल्पनामपेक्ष्यैकजातिकल्पनाया एव युक्तत्वात्।

वस्तुतस्तु रूपादिकं प्रति घ्राणादेः प्रतिबन्धकत्वमेव नोपेयम्, समवायिकारणानां तत्तद्व्यक्तित्वेन हेतुतया यावद्विशेषसामग्रीविरहादेव तत्र रूपाद्युत्पत्तेरसम्भवात्। नच तदवयवानां निःस्पर्शत्वे घ्राणाद्यारम्भकत्वानुपपत्तिः द्रव्यारम्भकत्वेन स्पर्शवत्त्वस्यावश्यकत्वे तव नये सामान्यतः स्पर्शवत्त्वेन द्रव्यस्पार्शनकारणतया तेषामपि स्पार्शनापत्तिरिति वाच्यम्। निःस्पर्शत्वेऽपि भूतत्वेन द्रव्यारम्भकत्वसम्भवात्। भूतत्वं हि द्रव्यारम्भकतावच्छेदकतया सिद्धो मूर्त्तत्वव्याप्यो जातिविशेषः, आकाशे भूतव्यवहारश्च भाक्तः, लाघवात् जातेरेव भूतपदप्रवृत्तिनिमित्तत्वात्।

वस्तुतस्तु द्रव्यं प्रति पृथक् समवायिकारणस्य कारणत्वे माना-

भावः । सामान्यतो द्रव्यत्वेन विशिष्य [तत्तद्व्यक्तिसमवेतत्वसम्बन्धेन] तत्तद्व्यक्तित्वेन वा समवायिकारणस्य कारणताया आवश्यकत्वात्, अन्त्यावयविनि द्रव्योत्पत्तिवारणप्रकारेण तत्तद्व्यक्तिरूपयावद्विशेषसमवायिकारणबाधेनैवातिप्रसङ्गभङ्गादिति प्राहुः ॥

इति अनुभूतरूपादिखण्डनवादवीचिः ॥ १ ॥

अथ (२)एकपाणिवादवीचिः प्रारभ्यते ॥

"चक्षुः परहिताकांक्षी न स्पृशेदेकपाणिने"त्यत्र निषेधविधित्वं सर्ववादिसिद्धम् ।

नन्वेकपाणिनेत्यत्रैकपदस्य एकत्वसंख्यावत्त्वं पारिभाषिकैकत्ववत्त्वं वाऽर्थः ? आद्ये चक्षुर्द्वये हस्तद्वयस्पर्शेऽपि प्रत्यवायः स्यात् द्रव्यमात्रस्यैवैकत्वसंख्यावत्त्वात् । द्वितीये हि स्वभिन्नपाण्यवच्छिन्नचक्षुःसंयोगाभाववत्त्वम्, एककालीनत्वसम्बन्धेन स्वभिन्नपाणिप्रतियोगिकचक्षुःसंयोगाभाववत्त्वं वा तत्त्वम् ? नाद्यः, हस्तद्वयेनैकचक्षुःस्पर्शेपि प्रत्यवायानापत्तेः तत्र पाणौ तादृशैकत्ववत्त्वाभावात्, हस्तद्वयेनोभयचक्षुःस्पर्शेऽपि तदापत्तेः स्वभिन्नापरपाणिप्रतियोगिकचक्षुःसंयोगस्य स्वस्मिन्सत्त्वेन तादृशैकत्ववत्त्वात् । न द्वितीयः, एकहस्तेन भिन्नव्यक्तिचक्षुःस्पर्शे अपरहस्तेन स्वीयचक्षुःस्पर्शे प्रत्यवायाभावापत्तेः, एककालीनत्वसम्बन्धेन तादृशसंयोगाभावरूपैकत्ववत्त्वाभावात् । न च चक्षुष्ट्वव्यापकीभूतपाणिप्रतियोगिकचक्षुःसंयोगाभाववत्त्वं तथा वक्तव्यं, तेनैकहस्तेनैकचक्षुःस्पर्शे सुतरामेव प्रत्यवायः चक्षुष्ट्वव्यापकीभूतपाणिप्रतियोगिकचक्षुःसंयोगस्याभावादिति वाच्यम् । एकहस्तेनोभयचक्षुःस्पर्शे प्रत्यवायाभावापत्तेः । न च तादृशसम्बधेन स्वभिन्नपाणिप्रतियोगिस्वप्रतियोगिकसंयोगाश्रयचक्षुरवच्छेद्यावच्छेदकीभूतचक्षुःसंयोगाभाववत्त्वं तत्त्वम्, तेन नोक्तदोषः, भिन्नव्यक्तिचक्षुषः स्वप्रतियोगिकसंयोगाश्रयचक्षुरवच्छेदकीभूतात्मनोऽवच्छेदकत्वाभावादिति वाच्यम् । एवं सत्यपि हस्तद्वयेनैकचक्षुःस्पर्शेऽपि प्रत्यवायाभावप्रसङ्गात् तस्य तादृशसंयोगवत्त्वात्, इति चेत् ।

मैवम् । एककालीनत्वसम्बन्धेन स्वावच्छेद्यावच्छेदकीभूतस्वभिन्नपाण्यवच्छिन्नस्वप्रतियोगिकसंयोगाश्रयचक्षुर्भिन्नचक्षुःसंयोगाभाववत्त्वस्य तदर्थत्वात्, अस्ति हि एकपाणिप्रतियोगिकैकचक्षुःस्पर्शे तादृशसम्बन्धेन, स्वं पाणिः, तदवच्छेद्य आत्मा, तदवच्छेदकीभूतोऽपरपाणिः स्वप्रतियोगिकसंयोगाश्रयचक्षुर्भिन्नं यदपरं चक्षुः तयोः संयोगाभावो यस्तत्त्वमिति

नोक्तदोषाणामवकाशः । अत्र चक्षुःपदं गोलकपरम्, अन्यथा चक्षुषोऽतीन्द्रियतया तदसम्भवः स्यात् । परहिताकांक्षीत्यस्य परहितविषयकेच्छावानित्यर्थः, पाणिनेत्यत्र तृतीयायाः प्रतियोगित्वमवच्छिन्नत्वमर्थः, स्पृशधातोः संयोग एवार्थः, निषेधविधेः पापजनकत्वमर्थः, इत्थञ्च तादृशैकत्ववत्पाणिप्रतियोगिकचक्षुःसंयोगः पापजनक इति बोधः । एवं च विलक्षणप्रत्यवायं प्रति तादृशैकत्ववद्धस्तावच्छिन्नचक्षुःसंयोगत्वेनैव हेतुत्वम् । कार्यतावच्छेदिका प्रत्यासत्तिः समवायः, कारणतावच्छेदिका च स्वाश्रयावच्छेदकत्वम्, एवं संयोगः तदाश्रयं चक्षुः तदवच्छेद्यत्वमात्मनीति वर्तत एव कार्याधिकरणवृत्तित्वं कारणस्येति न कोऽपि दोषः ।

अथवा तद्धस्तप्रतियोगिकचक्षुःसंयोगाभावविशिष्टतद्धस्तान्यहस्तावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वम् । प्रत्यासत्तिश्च पूर्ववत् । एवमन्यदपि सुधीभिर्विभावनीयमिति दिक् इति ।

इति महामहोपाध्यायश्रीगदाधरभट्टाचार्यविरचितैकपाणिवादवीचिः समाप्तः ॥ २ ॥

अथ (३)त्वङ्मनःसंयोगहेतुत्वखण्डनवादवीचिः ।

त्वङ्मनोयोगस्य ज्ञानत्वावच्छिन्नं प्रति जन्यज्ञानत्वावच्छिन्नं प्रति वा हेतुत्वे मानाभावः ॥

अथ स्वापोत्तरद्वितीयादिक्षणे ज्ञानोत्पत्तिवारणाय जन्यज्ञानमात्रं प्रति त्वङ्मनोयोगस्य हेतुत्वमावश्यकम्, आत्मनो विभुतया पुरीतन्मनःसंयोगात्मकसुषुप्तिसमये पुरीतदवच्छेदेनात्ममनःसंयोगस्याप्युत्पत्तेः, आत्ममनःसंयोगं विना श्वासप्रश्वासहेतुजीवनयोनियत्नानुत्पत्तेश्च ; एतेनात्ममनःसंयोगस्यात्ममनःसंयोगत्वेन, मनःसंयोगत्वेन वा नासमवायिकारणत्वं गौरवात्, अपितु वैजात्येन, सुष्वापकालीनात्ममनःसंयोगे च नैतादृशवैजात्यं तस्य फलबलकल्प्यत्वादतः सुषुप्तौ न ज्ञानोत्पत्तिरित्यपि परास्तम् । विजातीयात्ममनःसंयोगस्यासमवायिकारणस्य कार्यतावच्छेदकं न जन्यज्ञानत्वं, किन्तु लाघवात् ज्ञानेच्छादिसाधारणं जन्यात्मविशेषगुणत्वं, तथाच श्वासप्रश्वासहेतुजीवनयोनियत्नान्यथानुपपत्त्या विजातीयात्ममनःसंयोगस्यापि तदानीमावश्यकत्वात् । त्वङ्मनःसंयोगस्तु तदा नास्ति, "यदा मनस्त्वचमपि परिहृत्य पुरीततमनुविशति तदा सुषुप्तिरि"त्यभिधानात् । न च सुषुप्तिदशायां ज्ञानोत्पत्तिवारणाय जन्यज्ञानमात्रं प्रति प्राणमनःसंयोगस्यैव हेतुत्वमभ्युपेयते न तु

त्वङ्मनोयोगस्येति वाच्यम् । त्वक्प्राणवाय्वोरेव तुल्यतया विनिगमकाभावादिति ॥

मैवम् । सुषुप्तिदशायां कीदृशं ज्ञानमापद्यते ? न तावच्चाक्षुषादि, चक्षुरादिभिर्मनःसंयोगस्याभावादेव तदानीं तदनुपपत्तेः । नाप्यनुमित्यादि, परामर्शाद्यभावात् । नापि स्मृतिः, उद्बोधकस्य फलबलकल्प्यत्वात् । न चात्ममनःसंयोगस्य सत्त्वात्तदानीमात्मादिमानसापत्तिरतस्तद्वारणाय जन्यज्ञानत्वावच्छिन्नं प्रति मानसत्वावच्छिन्नं प्रति च त्वङ्मनोयोगस्य हेतुत्वमावश्यकमिति वाच्यम् । ज्ञानाद्यात्मकविशेषगुणाविषयकात्मादिमानसस्यालीकतया सुषुप्तिकाले ज्ञानादिविरहादेव सुषुप्त्यनन्तरमात्मादिमानसानुत्पत्तेः । सुष्वापप्रयोजकमनःक्रियोत्पत्तिकाले तादृशमनःपूर्वदेशविभागोत्पत्तिकाले वा तस्य ज्ञानादेराशुविनाशितया सुषुप्त्युत्पत्तिकाले चात्ममनःसंयोगस्यासमवायिकारणस्य पूर्वमभावादेव ज्ञानाद्यनुत्पत्तेः । न च मनःपूर्वदेशविभागकालोत्पन्नस्यापेक्षाबुद्ध्यात्मकज्ञानस्य सुषुप्त्युत्पत्तिकालेऽवस्थानसम्भव इति वाच्यम् । तदानीमपेक्षाबुद्ध्यात्मकज्ञानोत्पादे मानाभावात्, अपेक्षाबुद्धेरपि क्षणत्रयावस्थायित्वे मानाभावाच्च । न च सुष्वापप्रयोजकमनःपूर्वसंयोगनाशकालोत्पन्नज्ञानादेः सुषुप्तिदशायामवस्थानसम्भव इति वाच्यम् । असमवायिकारणस्य कार्यसहभावेन हेतुतया मनःपूर्वसंयोगनाशदशायां ज्ञानोत्पादासंभवात् । न च यस्य समवायिकारणनाशात् कार्यनाशः तस्यैव कार्यसहभावेन हेतुतया मनःसंयोगस्य कार्यसहभावेनासमवायिकारणत्वे मानाभाव इति वाच्यम् । त्वङ्मनोयोगस्यातिरिक्तस्य कारणत्वापेक्षया तावन्मात्रकल्पनाया एव लघुत्वात् । न चात्ममनःसंयोगस्यात्ममनःसंयोगत्वेन मनःसंयोगत्वेन वा नासमवायिकारणत्वं, किन्तु लाघवात्संयोगत्वेन, तथाच यत्किञ्चित्संयोगे कार्यसहवृत्तित्वमस्त्येवेति वाच्यम् । त्वङ्मनोयोगस्यातिरिक्तकारणत्वकल्पनापेक्षयाऽऽत्ममनःसंयोगवृत्तिवैजात्येनैव कार्यसहवृत्तिरूपाऽसमवायिकारणत्वमात्रकल्पनाया एव लघुत्वात् । न चात्ममनःसंयोगस्य कार्यसहवृत्तितया हेतुत्वेऽपि यत्र मनःक्रियया न पुरीतन्मनःसंयोगात्मकसुषुप्त्युत्पादः, किन्तु पूर्वदेशसंयुक्त एव मनसि पुरीतत्संयोगरूपसुषुप्तिः तत्र स्वापोत्पत्तिप्राक्काले ज्ञानोत्पत्तिसम्भव इति वाच्यम् । तादृशपुरीततिक्रियया पुरीतन्मनःसंयोगस्य सुषुप्तित्वविरहात्, "यदा मनस्त्वचमपि परिहृत्य पुरीततमनुविशति तदा सुषुप्तिरि"त्यभिधानात् ।

केचित्तु सुष्वापानन्तरं ज्ञानोत्पादवारणाय जन्यज्ञानत्वावच्छिन्नं

प्रत्यात्ममनःसंयोगस्यैव सुष्वापकालीनमनःसंयोगव्यावृत्तवैजात्येन हेतुत्वमुपेयते, न तु त्वङ्नोयोगस्य। न च विनिगमकाभावात् त्वङ्मनोयोगस्यापि वैजात्येन हेतुत्वं दुर्वारम्, ज्ञानेच्छासाधारणजन्यात्मविशेषगुणत्वावच्छिन्नं प्रत्यात्ममनःसंयोगस्य पृथगसमवायिकारणतायास्तवापि आवश्यकत्वात् इति वाच्यम्। आत्ममनःसंयोगस्य वैजात्येन हेतुत्वे समवायस्य प्रत्यासत्तितया प्रत्यासत्तिलाघवात्, त्वङ्मनोयोगस्य हेतुत्वेऽवच्छेदकत्वस्यैव प्रत्यासत्तित्वे गौरवात्, कर्मसंयोगजन्यतावच्छेदकवैजात्यस्याधिकस्य कल्पने (१) गौरवापत्तेश्चेत्याहुः।

तदसत्। उक्तक्रमेणैव सुषुप्त्यनन्तरं ज्ञानोत्पत्त्यादेर्वारणसम्भवेनात्ममनःसंयोगस्याप्यतिरिक्तकारणत्वकल्पने मानाभावात्।

मिश्रास्तु सुषुप्त्यनन्तरं ज्ञानोत्पत्तिवारणाय चर्ममनःसंयोग एव जन्यज्ञानसामान्ये हेतुरभ्युपेयते, न तु त्वङ्मनोयोगः। न च विनिगमनाविरहः, जन्यज्ञानसामान्ये त्वङ्मनोयोगस्य हेतुत्वे रसादिसाक्षात्कारकाले त्वचा द्रव्यग्रहापत्तेः, सामान्यसामग्र्यास्त्वङ्मनोयोगस्यावश्यकत्वात्। रसादिसाक्षात्कारसामग्र्याः प्रतिबन्धकत्वाभ्युपगमेऽतीव गौरवादित्याहुः।

तदप्यसत्। रसादिसाक्षात्कारकाले द्रव्येण समं त्वक्सन्निकर्ष एव मानाभावेन तदभावादेव त्वचा द्रव्यसाक्षात्कारापत्तेरभावात्, तावता मानसत्वावच्छिन्नं प्रति त्वङ्मनोयोगस्य हेतुत्वे बाधकाभावाच्च। एवमुक्तक्रमेणैव सुषुप्त्यनन्तरं ज्ञानानुत्पादसम्भवे चर्ममनोयोगस्यापि हेतुत्वे मानाभावः।

केचित्तु सुषुप्त्यनन्तरं ज्ञानोत्पत्तिवारणाय शरीरमनःसंयोग एव ज्ञानसामान्ये जन्यज्ञानसामान्ये वा हेतुरुपेयते, न तु त्वङ्मनोयोगः, शरीरसंयोगस्य त्वक्संयोगव्याप्यतया सुषुप्तिदशायां त्वङ्मनोयोगस्येव शरीरमनोयोगस्यापि हेतुत्वात्। न च शरीरत्वमपेक्ष्य त्वक्त्वस्य जातिरूपतया लघुत्वेन त्वङ्मनोयोग एव हेतुरुचित इति वाच्यम्। शरीरमनःसंयोगस्य हि न शरीरमनःसंयोगत्वेन हेतुत्वं येन शरीरत्वप्रवेशः,—किन्तु शरीरनिष्ठतया मनःसंयोगत्वेन, समवायावच्छेदकत्वघटितसामानाधिकरण्यं प्रत्यासत्तिः। कारणदिशि समवायः, कार्यदिशि चावच्छेदकत्वम्। त्वङ्मनोयोगस्य हेतुत्वे त्वक्त्वसंयोग-

(१) अत्र 'त्वङ्मनः संयोगस्य हेतुत्वे चाक्षुषादिसामग्र्याः स्पार्शनादिप्रतिबन्धकत्वकल्पने' इति पाठो युक्तः प्रतिभाति।

त्वयोरवच्छेदककोटिप्रवेशस्यावश्यकतया गौरवात् । न च त्वङ्मनोयोगस्यापि त्वङ्मनोयोगत्वेन न हेतुत्वम्, अपि तु वैजात्येनातो न त्वक्त्वसंयोगत्वयोः प्रवेश इति वाच्यम् । तथाप्यतिरिक्तकल्पनामपेक्ष्य मनस्त्वेन हेतुताया लघुत्वादिति प्राहुः ।

तदप्यसत् । स्वापोत्तरज्ञानप्रसंगस्योक्तक्रमेणाप्यवारणात् । शरीरमनःसंयोगस्याप्यतिरिक्तकारणत्वे मानाभावादिति संक्षेपः ॥

इति त्वङ्मनोयोगस्य जन्यज्ञानहेतुत्वखण्डनवादवीचिः ॥ ३ ॥

अथ (४)विशिष्टवैशिष्ट्यवादवीचिः ।

विशिष्टवैशिष्ट्यबुद्धिश्चतुर्विधा (१) विशेष्ये विशेषणं तत्रापि च विशेषणान्तरमिति न्यायेन, (२) एकत्र द्वयमिति न्यायेन, (३) विशिष्टे वैशिष्ट्य(क)मिति न्यायेन, (४)विशिष्टस्य वैशिष्ट्यमिति न्यायेन चेति भेदात् । न च विशिष्टे वैशिष्ट्यमिति न्यायेन विषयितायां मानाभावः, तादृशविषयित्वस्य केनापि प्रामाणिकेनालिखनादिति वाच्यम् । विशिष्टस्य वैशिष्ट्यमिति न्यायेन विषयितावत् (ख)तादृशविषयित्वस्याप्यनुभवसिद्धत्वेन दुरपह्नवत्वात्, प्रामाणिकालिखनस्याकिञ्चित्करत्वात् । विशेष्यतावच्छेदकपक्षधर्म्मितावच्छेदकपक्षयोर्बहुषु स्थानेषु प्रामाणिकैर्लिखितत्वेन फलतस्तादृशविषयित्वस्यापि लिखनात् । यद्धर्म्मविशिष्टेऽनन्तवशिष्ट्यं भासते तादृशधर्म्मस्यैव विशेष्यतावच्छेदकपक्षधर्म्मितावच्छेदकपक्षप्रतिपाद्यत्वात्, "अनुभवसिद्धो विशिष्टवैशिष्ट्यबुद्धीनां विशेषणता(तादृशविषयिता)विशेष" इति परामर्शग्रन्थे आचार्य्यानुमानव्याख्यानावसरे भट्टाचार्य्यैरेव लिखितत्वाच्च । तत्र विशिष्टवैशिष्ट्यबुद्धीनामित्यर्थाद्विशिष्टस्य वैशिष्ट्यमिति न्यायेन विशिष्टप्रतियोगिकवैशिष्ट्यावगाहिबुद्धिभिन्नायामपि विशिष्टानुयोगिकवैशिष्ट्यावगाहिन्यां—द्रव्यं पर्वतः सत्तावान् इत्यादिबुद्धौ विशेष्यतावच्छेदकद्रव्यत्वपर्वतत्वसमानकालीन सत्ताभानात् ॥ तत्राद्यद्वयं प्रति विशेषणज्ञानमेव हेतुः, तृतीयं प्रति तु विशेष्यतावच्छेदकप्रकारकविशेष्यज्ञानं हेतुः, एवं विशेषणतावच्छेदकसत्तात्वप्रकारकसत्ताज्ञानमपि हेतुः । रजतरजतत्वद्रव्यद्रव्यत्वादिनिर्विकल्पकानन्तरमेकत्र द्वयमिति न्यायेन रजतत्वादिविशेष्यतावच्छे-

(क) विशिष्टानुयोगिकवैशिष्ट्यमित्यर्थः ।
(ख) विशिष्टप्रतियोगिकवैशिष्ट्यमित्यर्थः ।
(ग) विशिष्टे वैशिष्ट्यमिति न्यायेन ।

दककताद्दशज्ञानानुदयस्य सर्वानुभवसिद्धत्वात् । विशिष्टे वैशिष्ट्यमिति न्यायेन रजतत्वविशिष्टानुयोगिकद्रव्यत्ववैशिष्ट्यावगाहि रजतं द्रव्यमिति ज्ञानानुदयात् । दण्डपुरुषकुण्डलानीत्यादिसमूहालम्बनज्ञानानन्तरं सत्यपि पुरुषेन्द्रियसन्निकर्षे विशेष्यतावच्छेदकपुरुषत्वप्रकारकपुरुषविशेष्यकज्ञानस्य कारणस्य पूर्व सत्त्वेपि एकत्र द्वयमिति न्यायस्य बलवत्वात् । एवं दण्डपुरुषावित्यत्रापि बोध्यम् । प्रथमतः निर्विकल्पक इति विलम्बोपस्थितिकतया तृतीयचतुर्थयोः न्याययोः न प्रवृत्तिः, दुर्बलत्वात् । आद्यद्वयन्याययोः निर्विकल्पकादिविशेषणज्ञानानन्तरं प्रवृत्तिः शीघ्रोपस्थितिकत्वात् , दंडी पुरुषः कुंडलीत्यत्र दण्डादिविशेष्यतावच्छेदककुण्डलादिवैशिष्ट्यज्ञानानुत्पादस्य सर्वानुभवसिद्धत्वाच्च । चतुर्थं प्रति तु विशेषणतावच्छेदकप्रकारकविशेषणज्ञानं हेतुः रजतरजतत्वनिर्विकल्पकानन्तरं सत्यपि रजतभूतलयोः सन्निकर्षे विशेष्ये विशेषणमिति न्यायेन रजतवत् भूतलमिति ज्ञानोदयेऽपि 'विशिष्टस्य वैशिष्ट्यमि'ति न्यायेन ताद्दशज्ञानानुदयस्य सर्वानुभवसिद्धत्वात् । दण्डपुरुषाविति समूहालम्बनज्ञानानन्तरं सत्यप्यधिकरणेन्द्रियसन्निकर्षे दण्डविशिष्टपुरुषनिरूपितवैशिष्ट्यविषयिताशालिनो दण्डिपुरुषवान् देश इति ज्ञानस्यानुत्पत्तेरनुभवसिद्धत्वाच्चेति सिद्धान्तः ।

तत्र तस्य केन रूपेण हेतुत्वमिति उच्यते–विशिष्टस्य वैशिष्ट्यमिति न्यायेन विशिष्टवैशिष्ट्यबुद्धिर्हि विशिष्टनिरूपितवैशिष्ट्यबुद्धिः विशिष्टविशिष्टनिरूपितवैशिष्ट्यबुद्धिरित्यादिक्रमेण एकैकविशिष्टवैशिष्ट्यबुद्ध्या नानाविधा पूर्वपूर्वविषयिताव्यापिका(१) । तत्र विशिष्टनिरूपितवैशिष्ट्यबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य स्वरूपतस्तत्प्रकारकतद्विशेष्यकज्ञानत्वेन कारणत्वम्। प्रथमं तत्पदं विशेषणतावच्छेदकपरम् , द्वितीयं तत्पदं विशेषणपरम् । जातित्वरूपेण रजतत्वप्रकारकाद्रजतज्ञानात् स्वरूपतो रजतत्वप्रकारकरजतत्वज्ञानसहज्ञानाज्जातित्वरूपेण रजतत्वविशिष्टरजतवैशिष्ट्यप्रत्यक्षोत्पत्तावपि स्वरूपतो रजतत्वविशिष्टरजतवैशिष्ट्यप्रत्यक्षानुत्पत्त्या स्वरूपतस्त्वान्तर्भावः । (२)अथवा जातित्वस्वरूपेण रजतत्वप्रकारकाद्रजतत्वनिर्विकल्पकसहज्ञानाज्जातिमत्त्वानिति विशिष्टवैशिष्ट्यप्रत्यक्षोत्पत्तावपि रजतवानिति विशिष्टवैशिष्ट्यप्रत्ययानुत्पत्त्या स्वरूपतस्त्वान्तर्भावः । न च जाति-

---

(१) विषयिता व्यापिका उच्यते इति परेणान्वयः ।

(२) इष्टापत्तौ दोषान्तरमाह अथवेति ।

त्वरूपेण रजतत्वप्रकारकज्ञानानन्तरं रजतत्वनिर्विकल्पकमेव न सम्भवति रजतत्वविशिष्टज्ञानसामग्रीसत्त्वादिति वाच्यम् । लौकिकसन्निकर्षस्यैव निर्विकल्पकविषयितया विशिष्टज्ञानसामग्रीसत्त्वेऽपि निर्विकल्पकोत्पत्तौ बाधकाभावात् । यद्वा यत्रादौ रजतत्वनिर्विकल्पकं रजतेन्द्रियसन्निकर्षनाशश्चेत्येकः कालः, ततो जातित्वरूपेण रजतत्वप्रकारकं जातिमानिति स्मरणं सन्निकर्षान्तरोत्पत्तिश्चेत्येकः कालः, तदनन्तरं रजतवानितिविशिष्टवैशिष्ट्यप्रत्ययापत्तिः । एवं यत्राऽऽदौ मनसा सुखसुखत्वादिनिर्विकल्पकं ततो जातित्वरूपेण सुखत्वप्रकारकं जातिमदिति स्मरणं मानससामग्रीमपेक्ष्य स्मृतिसामग्र्या (१)बलवत्त्वात्, ततः सुखवानितिविशिष्टवैशिष्ट्यावगाहिमानसप्रत्ययापत्तिरतः स्वरूपतस्त्वान्तर्भावः । रजतत्वादिप्रकारकशुक्त्यादिज्ञानात् द्रव्यत्वादिप्रकारकरजतज्ञानकालीनाद्रजतत्वविशिष्टरजतवैशिष्ट्यज्ञानानुदयात् तद्विशेष्यकत्वान्तर्भावः । अत एव पर्वतो वह्निमानित्याद्यनुमितौ वह्नित्वरूपेण पर्वतीयवह्निभानार्थं सामान्यलक्षणायाः प्रत्यासत्तित्वादर इति नैयायिकसम्प्रदायः मीमांसकानामपि । स्वतन्त्रनैयायिकनये तु तत्प्रकारकज्ञानत्वेन कारणत्वं, न तु तद्विशेष्यकत्वान्तर्भावः गौरवाद्विशेष्यभेदेनानन्तकार्य्यकारणभावप्रसङ्गाच्च । रजतत्वादिप्रकारकशुक्त्यादिज्ञानादपि सति विशेषणीभूतरजतज्ञाने रजत्वविशिष्टरजतवैशिष्ट्यज्ञानस्येष्टत्वात् । न चैवं सामान्यलक्षणायाः प्रत्यसत्तित्वविलोपः, साध्यतावच्छेदकसम्बन्धेन दृष्टान्तीयसाध्यज्ञानादेव साध्यतावच्छेदकरूपेण पक्षीयसाध्यज्ञानसम्भवादिति वाच्यम् । तद्विलोपस्येष्टत्वात् । (स्वतन्त्रनैयायिकनये) सत्यपि रजतत्वप्रकारकरजतविशेष्यकानुबुद्धसंस्कारे रजतभूतलयोः सन्निकर्षसत्त्वे विशेष्ये विशेषणं तत्रापि च विशेषणान्तरमिति न्यायेन ज्ञानस्य जायमानत्वेऽपि रजतवद् भूतलमिति विशिष्टवैशिष्ट्यभानानुदयात् ज्ञानत्वान्तर्भावः । न चैवं रजतज्ञानम्, अथ रजतेच्छा रजतद्वेषो वा तत इच्छात्वस्य द्वेषत्वस्य वा निर्विकल्पकं ज्ञाननाशश्चेत्येकः कालः, तदनन्तरं रजतमिच्छामि रजतं द्वेष्मीति वाऽनुव्यवसायः कथं स्यात्, तस्यापि रजतत्वविशिष्टवैशिष्ट्यज्ञानत्वात्, तदव्यवहितपूर्वञ्च रजत्वप्रकारकरजतज्ञानविरहादिति वाच्यम् । इच्छात्वादिनिर्विकल्पकाले मनसा रजतत्वप्रकारेण रजत-

(१) न च स्मृतिसामग्र्या मानसं प्रति अनुगतप्रतिबन्धकत्वासम्भवात् तद्घटकीभूतोद्बोधकानामननुगमात् अनन्तप्रतिबध्यप्रतिबन्धक भावकल्पने गौरवमेव विनिगमकम् अणुरपि विशेषोऽध्यवसायक इति न्यायात् इति वाच्यम् । फलमुखगौरवस्यादोषत्वात् ।

स्योपनीतभाने बाधकाभावात् । न च तथापि रजतज्ञानमथ रजतेच्छा ततो रजतकृतिर्ज्ञाननाशश्चेत्येकः कालः, ततः कृतित्वनिर्विकल्पकम् इदानीं रजतस्योपनीतभानासम्भवः ज्ञानस्य सन्निकर्षस्य पूर्वं नाशात्, तदनन्तरं च रजतं करोमीत्यनुव्यवसायः कथं स्यात्, तस्यापि रजतत्वविशिष्टवैशिष्ट्यज्ञानत्वादिति वाच्यम् । तत्र कृतित्वादिनिर्विकल्पकानन्तरं नियमतो रजत्वादिप्रकारेण स्मृतिकल्पनात् मानससामग्रीमपेक्ष्य स्मृतिसामग्र्या बलवत्त्वात् ॥ तत्प्रकारकत्वञ्च विशेषणतानियामकसम्बन्धेन ग्राह्यम्, तेन न एकसम्बन्धेन तत्प्रकारकज्ञानादन्यसम्बन्धेन तद्विशिष्टस्य वैशिष्ट्यबुद्धिः ॥ कार्य्यतावच्छेदकञ्च स्वरूपतस्तद्धर्म्मावच्छिन्नतन्निष्ठप्रकारताकानुभवत्वम् । तद्धर्म्मपदं विशेषणतावच्छेदकपरं, द्वितीयतत्पदं विशेषणपरम् । कारणतावच्छेदके तद्विशेष्यकत्वप्रवेशात् कार्य्यतावच्छेदके तन्निष्ठत्वप्रवेशः, अन्यथा तत्प्रकारकतद्विशेष्यकज्ञानं विनापि तदवच्छिन्नान्यनिष्ठप्रकारकानुभवोत्पत्त्या व्यभिचारापत्तेः स्वतन्त्रनैयायिकनये कारणतावच्छेदके तद्विशेष्यकत्वाप्रवेशात् कार्य्यतावच्छेदकेऽपि तन्निष्ठत्वं नोपादेयम् । कारणतावच्छेदके स्वरूपतस्तत्प्रवेशात् कार्य्यतावच्छेदकेऽपि तत्प्रवेशः, अन्यथा स्वरूपतो रजतत्वप्रकारकज्ञानं विनापि जातित्वरूपेण रजतत्वप्रकारकात् जातिमानिति ज्ञानात् जायमाने जातिमत्त्वानिति रजतत्वविशिष्टवैशिष्ट्यावगाहिज्ञाने व्यभिचारापत्तिः । वह्नित्वरूपेण वह्न्यन्तरज्ञानासमवहिताद्वह्नित्वरूपेण च महानसीयवह्निमात्रविषयकात् स्मरणात्मकपरामर्शात् वह्नित्वरूपेण निखिलवह्निविषयकानुमितिवारणाय प्रत्यक्षत्वमपहायानुभवत्वप्रवेशः ।

ननु तथापि स्वतन्त्रनैयायिकनये तद्विशेष्यकत्वतन्निष्ठप्रकारकत्वयोर्द्वयोः कारणत्वकार्यतावच्छेदकाघटकतया प्रत्यक्षत्वमपहायानुभवत्वप्रवेशो न युक्तः प्रत्यक्षत्वानुभवत्वयोः समशरीरत्वेपि अनुभवत्वस्य व्यापकधर्म्मत्वात्, अगुरुव्याप्यधर्म्मसंभवे व्याप्यधर्म्मेण कारणत्वस्येव कार्य्यत्वस्यापि कल्पनात् । नचैवमनुमित्युपमितिशाब्दबोधानामसंग्रह इति वाच्यम् । तेषामसंग्रहेऽपि क्षतिविरहात् । परामर्शातिदेशवाक्यार्थज्ञानपदार्थोपस्थितीनामेव विशेषणतावच्छेदकप्रकारकज्ञानत्वनियमेन तेषां कारणतयैवातिप्रसङ्गभङ्गात् । न चानुमित्यसंग्रहे वह्नित्वरूपेण वह्न्यन्तरज्ञानासमवहितात् वह्नित्वरूपेण महानसीयवह्निमात्रविषयकस्मरणात्मकपरामर्शोदयादपि वह्नित्वरूपेण निखिलवह्न्यनुमानापत्तिरिति वाच्यम् । स्वतन्त्रनैयायिकानामिष्टत्वात्, अन्यथाऽनुभवत्वस्य कार्य्य-

तावच्छेदकत्वेऽपि तन्नये तद्विशेष्यकत्वतन्निष्ठप्रकारत्वयोः कारणत्वकार्य्यतावच्छेदकाघटकतया तदापत्तेर्दुर्वारत्वात् । न च तथाप्यनुमित्यसंग्रहे अप्रसिद्धसाध्यकानुमितेरपि साध्यतावच्छेदकविशिष्टसाध्यप्रकारकत्वापत्तिरिति वाच्यम् । भावसाध्यकानुमितेः प्रतियोग्यविशेषिताभावसाध्यकानुमितेश्च असिद्धसाध्यकत्वाभावात् । प्रतियोगितावच्छेदकविशिष्टप्रतियोगिविशेषिताभाववैशिष्ट्यबुद्धिश्च न स्वरूपतो विशेषणतावच्छेदकीभूतप्रतियोगिविषयिकेति ।

मैवम् । प्रत्यक्षत्वस्य कार्य्यतावच्छेदकत्वे घटो गन्धवान् पृथिवीत्वादित्यादौ असुरभिगन्धबाधज्ञानदशायामज्ञातसुरभिगन्धस्यापि सुरभित्वेन गन्धविधेयकानुमित्यापत्तेः, सुरभिभिन्नगन्धत्वेन गन्धबाधज्ञानस्येवासुरभित्वरूपजातिविशेषरूपेण गन्धबाधज्ञानस्यापि सुरभित्वप्रकारकगन्धानुमितिहेतुत्वात्, अत एव प्रत्यक्षमणिदीधितौ ज्ञप्तिवादे अप्रसिद्धप्रामाण्यसाध्यकानुमानप्रकरणे "न त्वज्ञातसुरभिगन्धस्यासुरभिगन्धबाधे ज्ञायमानगन्धानुमितिर्जात्वपि सुरभित्वेन गन्धं विषयीकरोति" इति भट्टाचार्य्याः । एवञ्च प्रत्यक्षत्वस्य कार्य्यतावच्छेदकत्वे पर्वतो द्रव्यवान् धूमादित्यादावपि वह्नित्वशून्यद्रव्याभाववान् पर्वत इत्यादि स्वरूपतो वह्नित्वविषयकस्मरणदशायामज्ञातवह्नित्वावच्छिन्नवह्निकस्यापि वह्नित्वेन वह्निविधेयकानुमित्यापत्तिः वह्न्यन्तरद्रव्यत्वेन बाधज्ञानस्येव वह्नित्वशून्यत्वेन द्रव्यत्वेन बाधज्ञानस्यापि वह्नित्वरूपेण वह्निविधेयकानुमितिहेतुत्वात् । यद्धर्म्मावच्छिन्नस्य तु स्वप्रकारकव्याप्यत्वपरामर्शस्वघटितबाधज्ञानयोरन्यतरज्ञानं विनानुमितिसम्भवे यद्धर्म्मविशिष्टवैशिष्ट्यबुद्धेः कार्य्यतायां प्रत्यक्षत्वस्यैव कार्यतावच्छेकत्वे चेष्टापत्तिरिति ॥ विशिष्टविशिष्टनिरूपितवैशिष्टबुद्धिं प्रति विशेणतावच्छेदकतावच्छेदकप्रकारकविशेषणतावच्छेदकविशिष्टविशेषणज्ञानस्य कारणत्वन्तु स्वरूपतस्तद्धर्म्मविशिष्टतत्प्रकारकतद्विशेष्यकज्ञानत्वेन । प्रथमतत्पदं विशेषणतावच्छेदकतावच्छेदकपरं, द्वितीयतत्पदं विशेषणतावच्छेदकपरं, तृतीयतत्पदं विशेषणपरम् । जातित्वरूपेण रजतत्वविशेषणकरजतप्रकारकस्मरणाद्रजनमिति (३) स्मरणसहकृताद्रजतवत्वानिति विशिष्टविशिष्टनिरूपितवैशिष्ट्यबुद्धिवारणाय स्वरूपतस्त्वान्तर्भावः ।

मीमांसकानुयायिस्वतन्त्रनैयायिकनये तु स्वरूपतस्तद्धर्म्मविशिष्टप्रकारकज्ञानत्वेनैव कारणत्वम्, नतु द्वितीयस्य तृतीयस्य वा तत्पदस्य प्रवेशः गौरवात्, विशेषणतावच्छेदकप्रकारकविशेषणभेदेनान्तकार्य्यकारण-

भावप्रसङ्गाच्च विशेषणतावच्छेदकतावच्छेदकरूपेणैव स्वरूपतः रजतत्वेन शुक्तिप्रकारककुड्यविशेषणकज्ञानेपि स्वरूपतः रजतत्वेन रजतविशेषणतावच्छेदकैकघटविशेषणकभूतलविशेष्यकज्ञानस्येष्टत्वात्। स्वतन्त्रनैयायिकनये तु स्वरूपतस्तद्धर्म्मविशिष्टावच्छिन्नप्रकारताकानुभवत्वावच्छिन्नं प्रति स्वरूपतस्तद्धर्म्मविशिष्टप्रकारकज्ञानत्वेन कारणत्वम्, वस्तुप्रकारकैकवस्तुविशेषणकज्ञानेऽपि विशेषणतावच्छेदकरूपेण वस्त्वन्तरविशेषणतावच्छेदकैकवस्त्वन्तरविशेषणकज्ञानस्येष्टत्वात्, अतएव पर्वतो वह्निमानित्यादौ विशेषणतावच्छेदकतया वह्निव्याप्यधूमवान् पर्वत इति परामर्शे पर्वतीयवह्न्यादिभानार्थमपि न सामान्यलक्षणा प्रत्यासत्तिरावश्यकी। ज्ञानत्वान्तर्भावस्तु पूर्ववदनुद्बुद्धसंस्कारवारणाय। रङ्गरजतादिविषयकेच्छाद्वेषकृतीनां विशिष्टविषयोपधानेन साक्षात्कारे व्यभिचारवारणमपि पूर्ववत्। तद्धर्मविशिष्टत्वञ्च विशेषणतावच्छेदकतावच्छेदकतानियामकसम्बन्धेन, प्रकारता च विशेषणतावच्छेदकतानियामकसम्बन्धेन ग्राह्या, प्रयोजनञ्चोक्तप्रायम्। न च रजतरजतत्वनिर्विकल्पकविशेष्येन्द्रियसन्निकर्षाभ्यां विशेष्ये विशेषणमिति न्यायेनोत्पन्नाद्रजतवदितिज्ञानाद्रजतवत्त्वानिति विशिष्टविशिष्टनिरूपितवैशिष्ट्यबुद्धिर्न स्यादिति वाच्यम्। इष्टत्वात्, विशिष्टविशिष्टनिरूपितवैशिष्ट्यबुद्धिम्प्रति विशिष्टनिरूपितवैशिष्ट्यबुद्धेर्विशिष्टविशिष्टादिनिरूपितवैशिष्ट्यबुद्धिम्प्रति च विशिष्टविशिष्टादिनिरूपितवैशिष्ट्यबुद्धेर्हेतुत्वादन्यथा वह्निव्याप्यवत्पर्वतवान् देश इति विशिष्टविशिष्टनिरूपितवैशिष्ट्यप्रत्यक्षे पर्वतविशेष्यकवह्निव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्य्यताशालिज्ञानत्वरूपस्यानुमितिलक्षणस्य दीधित्युक्तातिव्याप्तेरसङ्गतत्वापत्तेः। कार्य्यतावच्छेदकञ्चास्य स्वरूपतस्तद्धर्म्मविशिष्टतदवच्छिन्नतन्निष्ठप्रकारताकानुभवत्वम्। प्रथमतत्पदं विशेषणतावच्छेदकतावच्छेदकपरं, द्वितीयतत्पदं विशेषणतावच्छेदकपरं, तृतीयतत्पदं विशेषणपरम्। अवच्छिन्नान्तं प्रकारताविशेषणम्। कारणतावच्छेदके विशेषणतावच्छेदकविशेषणयोर्वैशिष्ट्यप्रवेशात्, कार्य्यतावच्छेदकेपि विशिष्टतत्प्रवेशः, अन्यथा व्यभिचारापत्तेः। स्वतन्त्रनैयायिकनये तु कारणतावच्छेदके विशेषणतावच्छेदकविशेषणयोर्वैशिष्ट्याप्रवेशात्कार्य्यतावच्छेदकेपि तयोर्विशिष्यानन्तर्भावः करणीयः। रजतत्वविशिष्टरजतप्रकारकज्ञानं विनापि तादृशसंस्कारात् जायमानरजतवत्त्वानितिविशिष्टविशिष्टनिरूपितवैशिष्ट्यावगाहिस्मरणे व्यभिचारवारणाय बुद्धित्वमपहायानुभवत्वप्रवेशः। वह्निस्वरूपेण वह्न्यन्तरप्रकारकज्ञान-

१ वाद०

समवहिताद्वह्नित्वरूपेण महानसीयवह्निमात्रप्रकारकात् स्मरणात्मकपरामर्शादपि वह्नित्वरूपेण निखिलवह्निमद्विधेयकानुमितेर्नैयायिकसम्प्रदायसिद्धतया तद्वारणाय प्रत्यक्षत्वस्य परित्यागः।

अथ स्वतन्त्रन्यायनये विशिष्य विशेषणतावच्छेदकविशेषणयोः कारणत्वकार्यत्वावच्छेदकाघटकतया स्वरूपतस्तद्धर्म्मविशिष्टावच्छिन्नप्रकारताकप्रत्यक्षत्वमेव कार्य्यतावच्छेदकं प्रत्यक्षत्वस्य बुद्धित्वव्याप्यधर्म्मत्वात्। तत्पदं विशेषणतावच्छेदकतावच्छेदकपरम्। अनुमित्युपमित्योरसङ्ग्रहेऽपि क्षतिविरहात्। परामर्शातिदेशवाक्यार्थज्ञानयोः कारणतयैवातिप्रसङ्गविरहात्। न च तथापि शाब्दबोधासंग्रहः, खण्डशो नानापदार्थविषयकसमूहालम्बनस्मरणाद्प्येकपदार्थविशिष्टापरपदार्थवैशिष्ट्यावगाहिशाब्दबोधानुत्पत्त्या पदजन्यैकपदार्थप्रकारकापरपदार्थविशेष्यकज्ञानस्यैव पृथक्तादृशशाब्दधीहेतुत्वस्यावश्यकतया तदसङ्ग्रहेऽपि क्षतिविरहात्, अत एव "महावाक्यार्थज्ञानं प्रति पदजन्यैकपदार्थप्रकारकापरपदार्थज्ञानरूपावान्तरवाक्यार्थज्ञानकारणतायामतिरिक्तपदजन्यत्वं प्रविष्टम्" इत्यनुमितिलक्षणे भट्टाचार्य्या इति।

मैवम्। अनुमित्यसङ्ग्रहे धूमव्यापकवह्न्यभाववान् ह्रद इत्यादिप्रतियोगिव्यापकतावगाहिपरामर्शजन्या ह्रदे धूमाभाव इत्याद्यप्रसिद्धसाध्यकानुमितिरिव प्रतियोगितावच्छेदकविशिष्टप्रतियोगिविशेषिताभाववैशिष्ट्यबुद्धिः—ह्रदो धूमाभाववानिति बुद्धिः स्यात्। न च तादृशपरामर्शस्य साध्यविशेष्यकानुमितिं प्रत्येव हेतुतया न ततस्तादृशानुमितिसङ्ग्रह इति वाच्यम्। साध्याप्रसिद्धिसत्त्वदशायां धूमाभाव इति साध्यविषयकज्ञानकाले तादृशपरामर्शादेव ह्रदो धूमाभाववानिति प्रतियोगितावच्छेदकविशिष्टप्रतियोगिविशेषिताभाववैशिष्ट्यावगाह्यनुमितेरभ्युपगमात्। न च यत्र विशेषणतावच्छेदकधर्म्मावच्छिन्नप्रतियोगिताकत्वं विशेषणतावच्छेदकतानियामकः सम्बन्धः, तत्रानुमतिसाधारणानुभवत्वस्यैव कार्य्यतावच्छेदकत्वमस्तु, तदन्यस्थाने प्रत्यक्षत्वमेव व्याप्यधर्म्मत्वात्, विशेषणतावच्छेदकभेदेनेव विशेषणतावच्छेदकनियामकसम्बन्धभेदेनापि कार्य्यकारणभावादिति वाच्यम्। तदन्यस्थाने प्रत्यक्षत्वस्य कार्य्यतावच्छेदकत्वे पर्वतो वह्निमान् धूमादित्यादौ पर्वताभाववद्वह्निरिति बाधज्ञानदशायामज्ञातपर्वतवह्निकस्यापि पर्वतत्वरूपेण वह्न्यनुमित्यापत्तेः, पर्वतवदितरत्वेन बाधज्ञानस्येव पर्वताभाववत्त्वेन बाधज्ञानस्यापि च पर्वतवद्वह्न्यनुमितिहेतुत्वात्, घटो गन्धवत्त्वात् पृथिवीत्वादित्यादौ असुरभिमद्बाधज्ञान-

णायामज्ञातसुरभिमत्कस्यापि सुरभिमत्त्वरूपेणानुमित्यापत्तेः । यद्ध-र्मावच्छिन्नविशिष्टस्य स्वप्रकारकव्याप्यत्वपरामर्शस्वघटितबाधज्ञान-योरन्यतरं विनानुमितिसम्भवः तद्धर्मविशिष्टविशिष्टवैशिष्ट्यबुद्धेः कार्य्य-तायां प्रत्यक्षत्वस्यैवावच्छेदकत्वे इष्टापत्तेरिति । एवं विशिष्ट-विशिष्टवैशिष्ट्यबुद्धिं प्रति एकैकतत्पदमेकैकविशिष्टपदञ्च वर्जयित्वा कार्य्यकारणभावो निर्वक्तव्यः । नन्वेवंरूपेण विशेषणतावच्छेदकप्रका-रकज्ञानस्य कारणत्वे द्रव्यं रजतं चेति समूहालम्बननिर्धर्म्मितावच्छेदककरजतत्वप्रकारकनिश्चयात् तेजो रजतं द्रव्यञ्चेति भिन्नधर्म्मितावच्छेदककरजतत्वप्रकारकनिश्चयाच्च रजतद्रव्यवदिदमिति रजतत्वांशे द्रव्यत्वधर्म्मितावच्छेदककरजतविशिष्टवैशिष्ट्यबोधापत्तिः । इष्टापत्तौ च द्रव्यं रजतं नवेति संशयानन्तरं रजतद्रव्यवदिदमिति रजतत्वांशे द्रव्यत्व-धर्म्मितावच्छेदककरजतत्वविशिष्टवैशिष्ट्यबोधापत्तिर्दुर्व्वारा, संशय-स्यापि रजतत्वप्रकारकज्ञानत्वात् । न च तदनन्तरं रजतभेदस्यापि विशिष्टवैशिष्ट्यबोधसम्भवात् न तथा बोध इति वाच्यम् । तथापि रज-तत्वांशे संशयाकारस्य तादृशविशिष्टवैशिष्ट्यबोधस्य दुर्वारत्वात् । न चेष्टापत्तिः । विशेषणतावच्छेदकांशे संशयाकारस्य विशेषणतावच्छेद-कांशे स्वनिष्ठाप्रामाण्यविषयकस्य तदभावेनाहार्य्यविशिष्टवैशिष्ट्यबो-धस्य न्यायमीमांसादिसकलशास्त्रसिद्धान्ताऽसिद्धत्वात् । अत एव "दण्डी रक्तो नवेति संशयानन्तरं रक्तदण्डवानितिज्ञानानुदयादि"ति अनुमितिलक्षणे भट्टाचार्य्याः । दण्डत्वधर्म्मितावच्छेदककरक्तत्वविशिष्ट-वैशिष्ट्यज्ञानानुदयादिति तदर्थः । स च तत्रैव सुव्यक्तः । अत एव व्याप्त्यंशे निश्चयत्वप्रवेशभीत्या व्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शस्यैव नियम-तोऽनुमितिहेतुत्वाभ्युपगमः, अन्यथा धूमो वह्निव्याप्यो नवेति संशयोत्त-रोत्पन्नात् वह्निव्याप्यत्वतदभाववद्धूमवान् पर्वत इति व्याप्तिविशिष्टवैशि-ष्ट्यावगाहिपरामर्शादनुमितिवारणाय व्याप्त्यंशे निश्चयत्वप्रवेशस्यावश्य-कतया तन्नमाभ्युपगमस्य व्यर्थत्वापत्तेः । न च कारणतावच्छेदके ज्ञानत्वेने-त्यनेन निश्चयत्वप्रवेशान्नायमतिप्रसङ्गः द्रव्यं रजतं नवेति संशयानन्तरमसति निश्चये रजतत्ववदिदमितिनिर्द्धर्म्मितावच्छेदककविशिष्टबोधोऽपि नेष्यत इति वाच्यम् । तथाऽपि द्रव्यं रजतं नवेति द्रव्यं रजतं चेति समूहालम्बननि-र्धर्म्मितावच्छेदककनिश्चयानन्तरं तेजो रजतं द्रव्यं चेति विभिन्नधर्म्मिता-वच्छेदककनिश्चयानन्तरं वा द्रव्यं रजतं नवेति संशयेऽपि रजतद्रव्यवदि-दमिति विशिष्टवैशिष्ट्यबोधापत्तेर्दुर्वारत्वात् । न च विशिष्टनिरूपितवैशि-ष्ट्यविषयकत्वस्य विशेषणतावच्छेदकांशे निश्चयत्वव्याप्यता यन्मते पठ्यते

सधर्म्मितावच्छेदककतद्विषयकप्रत्यक्षनिश्चयं प्रति लौकिकसंशयसाधारणसमानधर्म्मितावच्छेदककतदभावज्ञानत्वेन च प्रतिबन्धकत्वम्, तन्मते प्रतिबन्धकसत्त्वादेव द्रव्यं रजतं नवेति संशयानन्तरमपि रजतद्रव्यवदिदमिति न विशिष्टवैशिष्ट्यबोधः, रजतवदिदमिति निर्धर्म्मितावच्छेदककविशिष्टवैशिष्ट्यबोधोत्पत्त्या च द्रव्यं रजतं नवेति संशयानन्तरमपि रजतवदिदमितिविशिष्टवैशिष्ट्यबोधः सर्वसिद्ध एवेति वाच्यम्। तन्मतेऽप्यभावांशे निश्चिताप्रामाण्यकाद्द्रव्यं रजतं नवेति संशयाद्रजतद्रव्यवदिदमिति रजतत्वविशिष्टवैशिष्ट्यबोधस्य दुर्वारत्वात् निश्चिताप्रामाण्यकतदभावज्ञानस्यैव प्रतिबन्धकत्वात्, द्रव्यं रजतं नवेति अलौकिकरजतत्वसंशयाद्रजतवदिदमितिरजतत्वांशे लौकिकस्य रजतत्वविशिष्टवैशिष्ट्यबोधस्य दुर्वारत्वाच्च लौकिकं प्रत्यलौकिकज्ञानस्याप्रतिबन्धकत्वात्, द्रव्यं रजतं नवेत्यादि एकेन्द्रियजन्यलौकिकसंशयाद्रजतद्रव्यवदिदमितिचाक्षुषादिलौकिकरजतत्वविशिष्टवैशिष्ट्यबोधस्य दुर्वारत्वाच्च लौकिकप्रत्यक्षं प्रति भिन्नेन्द्रियजन्याभावाज्ञानस्याप्रतिबन्धकत्वात्, द्रव्यं रजतं नवेति समानेन्द्रियजलौकिकरजतत्वसंशयादपि रजतद्रव्यवदिदमिति आहार्य्यस्येच्छाप्रयोज्यत्वात् लौकिकरजतत्वविशिष्टवैशिष्ट्यबोधस्य दुर्वारत्वात्। न च आहार्य्यानाहार्य्यलौकिकालौकिकसाधारणसमानधर्मितावच्छेदककरजतत्वादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षसामान्यं प्रत्येवाप्रामाण्यज्ञानास्कन्दितानास्कन्दितलौकिकालौकिकसंशयनिश्चयसाधारण्येन समानधर्म्मितावच्छेदककतदभावज्ञानत्वेनातिरिक्तप्रतिबन्धकत्वाभ्युपगमाद् द्रव्यं रजतं नवेति संशयानन्तरं न रजतद्रव्यवदिदमिति रजतत्वांशे द्रव्यत्वधर्म्मितावच्छेदककविशिष्टवैशिष्ट्यबोधः, एकैकविशेषणतावच्छेदकस्थल एव धर्म्मितावच्छेदकभेदेनानन्तविधप्रतिबध्यप्रतिबन्धकभावस्यानया रीत्याऽभ्युपगमात्।

अथैवं द्रव्यं न रजतमिति गृहीतप्रामाण्यकनिश्चयानन्तरं द्रव्यं रजतमिति चाक्षुषादिलौकिकनिश्चयेपि रजतद्रव्यवदिदमिति चाक्षुषादिरूपं लौकिकविशिष्टवैशिष्ट्यप्रत्यक्षमिति चेन्न। तत्र विपरीतज्ञाननाशानन्तरं चतुर्थक्षण एव विशिष्टवैशिष्ट्यप्रत्यक्षाभ्युपगमात् क्षणैकापलापस्यादोषत्वादित्याहुः। तदसत्। अपेक्षाबुद्ध्यात्मकविपरीतज्ञानस्थले क्षणद्वयापलापापत्तेः, समानधर्म्मितावच्छेदककतदभावज्ञानाभावस्य कारणत्वे गौरवात्। किञ्चैवं यत्रादौ द्रव्यं रजतमित्यलौकिकं ज्ञानं ततः स्वनिष्ठाप्रामाण्यविषयकं द्रव्यं न रजतमिति लौकिकप्रत्यक्षं तत्र, यत्र वाऽऽदौ स्वनिष्ठाप्रामाण्यविषयकं द्रव्यं रजतमिति लौकिकं प्रत्यक्षं

ततो द्रव्यं रजतमित्यलौकिकज्ञानं तत्र च तदनन्तरं रजतद्रव्यवदिदमिति विशिष्टधीर्न स्यात्, न स्याञ्च द्रव्यत्वं धर्म्मितावच्छेदकीकृत्य तत्समानाधिकरण्येन रजतत्वतदभावयोः समुच्चयाद्द्रव्यत्वसामाधिकरण्येन रजतद्रव्यवदिदमिति विशिष्टवैशिष्ट्यधीः । यदि च विशेष्यतावच्छेदकसामानाधिकरण्येन विशेषणतावच्छेदकविशिष्टवैशिष्ट्यधियम्प्रति तदवच्छेदेनतदभावज्ञानं प्रतिबन्धकं, तदवच्छेदेनोक्तधियं प्रति तु विशेषणतावच्छेदकाभावज्ञानमेव विरोधीति प्रतिबध्यप्रतिबन्धकभावभेदोऽभ्युपेयते, तदा द्रव्यत्वसामानाधिकरण्येन रजतत्वाभावविषयकात् द्रव्यं रजतं नवेति संशयानन्तरमपि द्रव्यत्वसामानाधिकरण्येन रजतत्वविषयकसंशयात् ततो रजतद्रव्यवदिदमिति विशिष्टधियो दुर्वारत्वादिति ।

मैवम् । विशिष्टनिरूपितवैशिष्ट्यबुद्धिर्द्विविधा विशेषणतावच्छेदकांशे निर्द्धर्म्मितावच्छेदिका, तदंशे सधर्म्मितावच्छेदिका च । तत्राद्यं प्रति संशयनिश्चयसाधारणं विशेषणतावच्छेदकप्रकारज्ञानमेव हेतुः रजतमिति निर्द्धर्मितावच्छेदककनिश्चयादिव द्रव्यं रजतं नवेति संशयानन्तरमपि रजतवदिदमिति रजतत्वांशे निर्द्धर्म्मितावच्छेदककविशिष्टवैशिष्ट्यबोधस्य सकलसम्प्रदायसिद्धत्वात् । कार्य्यतावच्छेदके कारणतावच्छेदके वा न तस्य निर्द्धर्म्मितावच्छेदकत्वान्तर्भावः, किन्तु निर्द्धर्म्मितावच्छेदकसधर्म्मितावच्छेदकसाधारणपूर्वोक्तधर्म्माभ्यामेव कार्य्यकारणभावः । द्वितीयं प्रति तु पूर्वोक्तरीत्या समानधर्म्मितावच्छेदकविशेषणतावच्छेदकप्रकारकनिश्चयत्वेनैव हेतुता, एकैकविशेषणतावच्छेदकस्थले एव धर्म्मितावच्छेदकभेदेनानन्तकार्य्यकारणभावस्यानायत्या ऽभ्युपगमात् । निश्चयत्वघटकदलद्वयरूचैकत्र द्वयमिति न्यायेनावच्छेदकमतो विशेषणविशेष्यभावे विनिगमकाभावान्न गुरुतरकार्य्यकारणभावद्वयम् । एतेन विशिष्टविशिष्टादिनिरूपितवैशिष्ट्यबुद्धिरपि व्याख्याता । नचैवमेवास्तां किं कार्य्यकारणभावद्वयेन रजतमित्यादिनिर्द्धर्म्मितावच्छेदकज्ञानानन्तरं द्रव्यं रजतं नवेत्यादिसंशयानन्तरं जायमाने रजतवदिदमित्यादिनिर्द्धर्म्मितावच्छेदककज्ञाने विशिष्टनिरूपितवैशिष्ट्यविषयतानभ्युपगमेऽपि क्षतिविरहादिति वाच्यम् । तत्रापि विशिष्टनिरूपितवैशिष्ट्यविषयित्वस्यानुभवसिद्धत्वात् अन्यथाऽनन्तकार्य्यकारणभावापत्त्या सर्वत्रैव तादृशविषयिताविशेषापलापस्यायुक्तत्वात् । न चास्तु तत्रापि तादृशविषयिता तथापि सामान्यतो विशेषणतावच्छेदकप्रकारकज्ञानस्य तत्र हेतुत्वे मानाभावः, विशिष्टानुभवसामान्यकारणाद्विशेषणज्ञानादेव तदुत्पत्तेरिति वाच्यम् । तथासति रजतरजतत्वनिर्विकल्पकधर्म्मीन्द्रियसन्निकर्षानन्तरं

वयोरेकस्यैव निश्चयात्मकविशिष्टबोधस्योत्पत्त्या तस्यैव कार्य्यसहवर्त्तित्वेन प्रतिबन्धकतया न संशयसम्भवः, विशेषणतावच्छेदकांशे संशयाकारविशिष्टवैशिष्ट्यबोधाभ्युपगमेऽपसिद्धान्तापत्त्या तथैव कल्पनादिति वाच्यम् । तथापि यत्रादौ द्रव्यविशेष्यकं रजतत्वप्रकारकं ज्ञानं रजतत्वाभावप्रकारकञ्च ज्ञानमप्रमेति सामान्यतोऽप्रामाण्यविषयको द्रव्यं रजतमितिनिश्चयस्तत्र तदनन्तरं रजतत्वांशे संशयाकारस्य रजतत्वतदभाववद्द्रव्यवदिदमिति विशिष्टवैशिष्ट्यबोधस्य दुर्वारत्वात्, तत्रैकैककोटिनिश्चयोत्पत्त्यभ्युपगमेऽपि तस्याप्रामाण्यज्ञानासमवहिततया प्रतिबन्धकत्वासम्भवादिति चेत् ।

सत्यम्, परन्तु तत्रैवोपनयलक्षणसन्निकर्षसत्त्वे फलीभूतसंशयस्य सामान्यतोऽप्रामाण्यविषयकत्वे बाधकाभावात्, विशेषणतावच्छेदकांशे स्वनिष्ठाप्रामाण्याविषयकस्यैव विशेष्यतावच्छेदकांशे संशयाभावविशिष्टवैशिष्ट्यबोधस्य सिद्धान्तासिद्धत्वात् । न च तथापि यत्र विशेष्यतावच्छेदकद्रव्यत्वसामानाधिकरण्येन द्रव्यं रजतमिति निश्चयो रजतत्वाभावोपस्थितिश्च तत्र तदनन्तरं विशेष्यतावच्छेदकद्रव्यत्वावच्छेदतत्सामानाधिकरण्याभ्यां रजतत्वतदभावकोटिकरजतत्वतदभाववद्द्रव्यवदिदमिति संशयात्मकविशिष्टवैशिष्ट्यबोधो दुर्वारः, विशेष्यतावच्छेदकसामानाधिकरण्येन रजतवत्तानिश्चयात् तदवच्छेदेन रजतत्वविशिष्टवैशिष्ट्यबोधासम्भवात् । अत्र रजततदभावयोरेकस्यैव निश्चयात्मकविशिष्टबोधोत्पत्त्या विशेष्यतावच्छेदकसामानाधिकरण्येनोभयोरेव समुच्चयात्मकनिश्चयोत्पत्त्या वा तस्यैव कार्य्यसहवर्त्तितया प्रतिबन्धकत्वेन संशयासम्भवाच्च विशेषणतावच्छेदकांशे संशयाकारविशिष्टवैशिष्ट्यबोधाभ्युपगमेऽपसिद्धान्तापत्त्या तथैव कल्पनात् । न च तथापि विशेषणतावच्छेदकप्रकारकनिश्चयसत्त्वे विशेषणतावच्छेदकाभावांशे आहार्य्यलौकिकात्मको विशेषणतावच्छेदकांशे च लौकिकसंशयाकारो विशिष्टवैशिष्ट्यबोधो दुर्वार इति वाच्यम् । विशेषणतावच्छेदकांशे तादृशसंशयात्मकस्य विशिष्टवैशिष्ट्यबोधस्याभ्युपगमात् विशेषणतावच्छेदकांशेऽनाहार्य्यस्यैव विशिष्टवैशिष्ट्यबोधस्य सिद्धान्तसिद्धत्वात् । न चैवं व्याप्त्यंशे निश्चयत्वप्रवेशभीत्या व्याप्तिविशिष्टवैशिष्ट्यावगाहिपरामर्शत्वेन हेतुत्वाभ्युपगमेपि वह्निव्याप्यो धूम इति निश्चयोत्तरोत्पन्नस्य व्याप्त्यभावांशे आहार्यात्मकवह्निव्याप्यत्वतदभाववद्धूमवान् पर्वत इति परामर्शस्य व्याप्त्यंशे संशयात्मकस्यानुमितिजनकत्वापत्तिर्दुर्वारेति वाच्यम् । वह्निव्याप्यत्वतदभाववद्धूमवान् पर्वत इति व्याप्त्यंशे समु-

च्चयाकारपरामर्शस्यैव तस्यानुमितिजनकताया इष्टत्वादिति समासः।

एतेन विशिष्टे वैशिष्ट्यमिति न्यायेन विशिष्टवैशिष्ट्यबुद्धौ विशेष्यतावच्छेदकप्रकारकविशिष्टज्ञानस्य हेतुहेतुमद्भावो व्याख्यातः।

इयांस्तु विशेषो यद्विशेषणतावच्छेदकादिप्रकारकज्ञानस्य कार्य्यतावच्छेदके तद्धर्म्मावच्छिन्नप्रकारकत्वं घटकम्। अत्र तद्धर्म्मावच्छिन्नविशेष्यताकत्वं, कार्य्यतावच्छेदकमत्र प्रत्यक्षत्वमेव व्याप्यधर्म्मत्वात् अनुमित्युपमितिशाब्दबोधानामसंग्रहस्येष्टत्वात्परामर्शशाब्दज्ञानयोर्विशेष्यतानवच्छेदकस्य धर्म्मस्यानुमित्युपमित्युद्देश्यतावच्छेदकत्वात्। अत एव ह्रदे धूमाभाव इत्याद्यप्रसिद्धसाध्यकानुमितेः साध्यतावच्छेदकविशिष्टसाध्यविशेष्यतापि नानुपन्ना। नचैवं पक्षतावच्छेदकरूपेणैकपरामर्शादितोपि पक्षतावच्छेदकरूपेणान्यपक्षकानुमित्यापत्तिरिति वाच्यम्। परामर्शाद्यविषयीभूतपक्षकस्यानुमित्यादिविषयत्वानङ्गीकर्तृनये पक्षतावच्छेदकरूपेण स्वतन्त्रोपस्थितस्य परामर्शाद्यविषयीभूतस्य पक्षस्यानुमित्यादौ भानवारणाय परामर्शादेस्तत्तत्पक्षान्तर्भावेण कारणत्वस्यावश्यकतया तत्र तद्वारणात्। तदन्यतमे चेष्टापादनात्।

केचित्तु विशेषणतावच्छेदकविशेष्यतावच्छेदकादिप्रकारकज्ञानयोः न पृथक् पृथक् कार्य्यकारणभावः करणतावच्छेदकभेदाभावस्य सर्वसिद्धत्वात्। विशेष्यतात्वप्रकारतात्वमपहाय सामान्यतस्तद्धर्म्मावच्छिन्नसांसर्गिकविषयतानिरूपितविषयताकत्वस्य कार्य्यतावच्छेदकघटकत्वाभ्युपगमे कार्य्यतावच्छेदकस्यापि सम्भवात् अवच्छिन्नान्तं द्वितीयविषयताविशेषणम्। आदिना विशिष्टविशिष्टादिनिरूपितवैशिष्ट्यबोधस्थले तद्धर्म्मविशिष्टादिपरिग्रहः। सांसर्गिकविषयतावारणाय निरूपितान्तं विषयताविशेषणम्, तथाचानुभवत्वमेवोभयोः कार्य्यतावच्छेदकघटकम्। न चैवं ह्रदे धूमाभाव इत्याद्यप्रसिद्धसाध्यकानुमितिः कथं स्यादिति वाच्यम्। तत्र प्रतियोगिपक्षयोरेकत्र द्वयमिति न्यायेनाभावत्वविशिष्टेपिप्रकारत्वाभ्युपगमात्।

ननु तथापि विशेष्यतावच्छेदकप्रकारकज्ञानस्यापि सामान्यतोऽनुभवत्वस्यैव कार्य्यतावच्छेदकत्वे पक्षतावच्छेदकतानियामकसम्बन्धेन साध्यवदन्यावृत्तित्वरूपसाध्यव्याप्यत्वविशिष्टपक्षतावच्छेदकप्रकारिकानुमितिः पक्षतावच्छेदकावच्छेदेनानुमितिः तज्जनकीभूतः पक्षतावच्छेदकावच्छेदेन परामर्शः साध्यव्याप्यहेतुमदन्यावृत्तित्वहेतुव्याप्यत्वविशिष्टपक्षतावच्छेदकतानियामकसम्बन्धेन पक्षतावच्छेदकप्रकारकपरामर्शः केवलान्वयिसाध्यकपक्षतावच्छेदकावच्छेदेनानुमितिश्च खण्डशः प्रसिद्धा।

नियमतो भ्रमरूपैवेति पारिभाषिकमते तादृशसाध्यव्याप्यत्वविशिष्टसमवायसम्बन्धेन पर्वतत्वादिप्रकारकज्ञानं विनापि तादृशहेतुव्याप्यत्वविशिष्टसमवायादिसम्बन्धेन पर्वतत्वादिप्रकारकात् परामर्शात् पर्वतत्वाद्यवच्छेदेनानुमितिः कथं स्यात्। न च यत्र तादृशसाध्यव्याप्यत्वविशिष्टसम्बन्धो विशेष्यतावच्छेदकतानियामकस्तत्र कार्य्यतावच्छेदके प्रत्यक्षत्वमेव घटकं न त्वनुभवत्वं विशेषणत्वविशेष्यत्वावच्छेदकतानियामकसम्बन्धभेदेन कार्य्यकारणभावभेदादिति वाच्यम्। तथासति पर्वतवान् धूमादित्यादौ वह्निमदन्यावृत्तित्वरूपवह्निव्याप्यत्वविशिष्टसमवायसम्बन्धेन पर्वतत्वप्रकारकपर्वतज्ञानं विनापि तेन सम्बन्धेन पर्वतत्ववतो बाधज्ञानसहकारात् तादृशवह्निव्याप्यत्वविशिष्टसमवायसम्बन्धेन पर्वतत्ववतोऽपि अनुमित्यापत्तेरिति चेन्न।

तादृशपरिभाषालघुत्वेऽपि स्वत एव इष्टत्वात् तादृशपरिभाषावादिना बाधादिसहकारात् व्यापकतावच्छेदकधर्म्मसम्बन्धाभ्यामनुमित्यभ्युपगमे त्वेकसम्बन्धेन व्यापकतावच्छेदकवतो बाधादिज्ञानादपरसम्बन्धेन व्यापकतावच्छेदकस्यानुमितौ विधेयतावच्छेदकतया भानानभ्युपगमाच्च क्वापि प्रामाणिकग्रन्थे तथालिखनविरहात्। अत एव बाधादिसहकारात् पक्षतावच्छेदकधर्म्मप्रकारेण कदाचिदनुमित्युपगमेऽपि एकसम्बन्धेन पक्षतावच्छेदकवति बाधादिज्ञानादपरसम्बन्धेन पक्षतावच्छेदकस्यानुमितौ पक्षे प्रकारतया भानमपि तैर्नाभ्युपेयते, तथाच साध्यव्याप्यत्वविशिष्टस्य विशेषणतावच्छेदकतादिनियामकसम्बन्धत्वे प्रत्यक्षत्वमेव तन्नये कार्य्यतावच्छेदकघटकमतो न काप्यनुपपत्तिरिति प्राहुः॥

॥ इति विशिष्टवैशिष्ट्यवादवीचिः(४) समाप्तः॥

अथ (५) विशिष्टवैशिष्ट्यबोधवादवीचिः।

गदाधरभट्टाचार्यविरचितः।

तद्धर्म्मनिर्विकल्पकानन्तरन्तद्विशिष्टवैशिष्ट्यबोधानुदयात्तत्र तद्धर्मप्रकारकं ज्ञानं कारणम्। विशिष्टवैशिष्ट्यबोधश्च द्विविधः–विशिष्टप्रतियोगिको वैशिष्ट्यबोधो विशिष्टानुयोगिको वैशिष्ट्यबोधश्च। यथा कारणतावच्छेदकत्वमेव कारणादौ विशेषणत्वं यथा वा शक्यवच्छेदकत्वमेव शक्ये विशेषणत्वं तथा प्रतियोगित्वानुयोगित्वयोरवच्छेदकत्वमेव प्रतियोग्यनुयोगिनोर्विशेषणत्वमिति तदवच्छिन्नप्रतियोगिताकत्वमेव तद्वि-

शिष्टप्रतियोगिकत्वम् , तदवच्छिन्नानुयोगिताकत्वमेव च तद्विशिष्टानुयो-
गिकत्वम् , न तु विशेषणविशेष्योभयपर्याप्तप्रतियोगिताकत्वं तद्विशिष्टप्र-
तियोगिताकत्वम् तादृशोभयपर्याप्तानुयोगिताकत्वं तद्विशिष्टानुयोगिता
कत्वम्, भूतलाद्यनुयोगिकदण्डादिविशिष्टपुरुषादिवैशिष्ट्यप्रतियोगिताया
दण्डादिविशिष्टपुरुषादिनिष्ठकुण्डलादिवैशिष्ट्यानुयोगितायाश्च दण्डा-
द्यवृत्तितया दण्डाद्यन्तर्भावेण तत्पर्याप्त्यसम्भवात् , तयोर्दण्डादिनिष्ठत्वे
भूतल रुषादौ पुरुषकुण्डलादेरिव भूतलदण्डादौ दण्डकुण्डलादेर्विशि-
ष्टधीप्रमात्वप्रसङ्गात् , तत्र तदभावासत्वप्रसङ्गाच्च । वैशिष्ट्यप्रति-
योगित्वानुयोगित्वयोरवच्छेदकत्वे तद्वैशिष्ट्यसमयावच्छेदेन तद्वति
सत्त्वं तन्त्रं विभिन्नकालावच्छिन्नवृत्तिकयोरवच्छेद्यावच्छेदकभावविरहा-
त् , तद्वैशिष्ट्यप्रतियोगित्वानुयोगित्वयोश्च वैशिष्ट्यस्वरूपानतिरिक्ततया
तद्वैशिष्ट्यावच्छेदककालावच्छेदेनावर्त्तमानयोः तत्प्रतियोगित्वानुयोगि-
त्वयोः समानकालावच्छिन्नत्वासम्भवेन तदवच्छेदकत्वासम्भवात् । अतो
यदा भूतले पुरुषवैशिष्ट्यन्तदन्यकाल एव च पुरुषे दण्डवैशिष्ट्यन्तदा न
भूतले दण्डविशिष्टपुरुषवैशिष्ट्यमपि तु दण्डोपलक्षिततद्वैशिष्ट्यमेव । एवं
यत्र विभिन्नसमयावच्छेदेनैव पुरुषे दण्डकुण्डलयोवशिष्ट्यं तत्र न
एकविशिष्टानुयोगिकमपरवैशिष्ट्यमपि त्वेकोपलक्षितानुयोगिकमेव । अत
एव च पक्षतावच्छेदकविशिष्टे साध्यवैशिष्ट्यं गन्धप्रागभावकालीनघटो
गन्धवान् पृथिवीत्वादित्यत्रानुमितिर्नावगाहते, अपि तु सामानाधिकर-
ण्यमात्रं साध्यस्येत्युपाध्यायाः(१) । एवं तद्धर्मसामानाधिकरण्यस्य
सामानाधिकरण्यसम्बन्धेन तद्धर्मस्य वा वैशिष्ट्यप्रतियोगितावच्छेदक-
त्वे वशिष्ट्यानुयोगिनस्तादृशसामानाधिकरण्यनिरूपकाधिकरणत्वं तन्त्र-
म् , अतो गुणान्यत्वसामानाधिकरण्येन सामानाधिकरण्यसम्बन्धेन गु-
णान्यत्वेन वा विशिष्टस्य सत्त्वादेर्गुणादौ न वैशिष्ट्यम् । नचैवं भूतलादिदेश-
स्य पटादिसमयवृत्तित्वविशेषविशिष्टघटाद्यधिकरणत्वानुपपत्तिरेवेति वा-
च्यम् । तत्सम्बन्धघटितसामानाधिकरण्यादेस्तत्सम्बन्धप्रतियोगितावच्छे-
दकत्वे (तत्सम्बन्धप्रतियोगितावच्छेदकप्रतियोगिकत्वे)(२)एव वा उक्तस्य
नियामकत्वात्, कालिकसम्बन्धेन महाकालान्यवृत्तित्वविशिष्टघटादेस्तेन
सम्बन्धेन वैशिष्ट्यं महाकाले नोपेयत एव । एवं च महाकालो घटवान्काल-

---

(१) वैशिष्ट्यस्य गन्धप्रागभाववान् घटो न गन्धवान् पृथ्वीत्वादित्यनुमितावमवगा-
हने सल्लिङ्गपरामर्षादिविभ्रमः स्यादिति तदसहमानास्तादृशानुमितेर्विशिष्टवैशिष्ट्याव-
गाहित्वं नानुमन्यन्ते यज्ञपत्युपाध्यायाः इति मि० पु० पाठः ।

(२) ( ) चिह्नान्तर्गतपाठो मि० पु० नास्ति ।

परिमाणादित्यादौ प्रतियोगितावच्छेदकविशिष्टप्रतियोगिव्यधिकरणाभावाप्रसिद्धिशङ्का दीधितिकृतां कथंचिदुपपादनीया। इत्थञ्च वैशिष्ट्यप्रतियोगिताऽनुयोगितावच्छेदकप्रकारकज्ञानयोर्विशिष्टवैशिष्ट्यप्रत्ययहेतुत्वपर्यवसानात् विशेषणतावच्छेदकविशेष्यतावच्छेदकप्रकारकज्ञानन्तद्धेतुरिति प्रवादः, वैशिष्ट्यप्रतियोगित्वादेरेव विशेषणत्वादिपदार्थत्वात्। वैशिष्ट्यांशे विशिष्टनिरूपितत्वविशिष्टानुयोगिकत्वावगाहिबुद्धावेव विशेषणतानुयोगितावच्छेदकप्रकारकज्ञानं हेतुः न तु वास्तवविशिष्टनिरूपितविशिष्टानुयोगिकवैशिष्ट्यबुद्धौ, तेन दण्डादिप्रतियोगिकस्य तदनुयोगिकस्य च संयोगसमवायादिरूपवैशिष्ट्यस्य निखिलस्यैव दण्डत्वादिविशिष्टनिरूपितत्वेऽपि दण्डत्वादिनिर्विकल्पकानन्तरं विशेष्ये विशेषणं तत्रापि च विशेषणान्तरमितिरीत्या एकत्र द्वयमितिरीत्या च दण्डी पुरुषः दण्डो रूपवानित्यादिप्रत्ययस्य नानुपपत्तिः, न वा पीतः शङ्खो नास्तीत्यादिबुद्धेः शङ्खत्वाद्यवच्छिन्नप्रतियोगितांशे पीतत्वाद्यवच्छिन्नत्वभ्रमात्मिकाया वास्तवपीतत्वादिविशिष्टनिरूपितवैशिष्ट्यानवगाहित्वेऽपि पीतत्वादिनिर्विकल्पकानन्तरमापत्तिः।

अथ सोन्दडोपाध्यायमते शशीयतया शृङ्गं नास्ति समवायितया वाच्यत्वं नास्तीत्याद्याकारिकायाः व्यधिकरणधर्मावच्छिन्नाभावबुद्धेः शशीयत्वसमवायित्वाद्यवच्छिन्नप्रतियोगिताकत्वरूपतद्धर्मविशिष्टनिरूपितत्वावगाहितया तत्तद्धर्मप्रकारेण शृङ्गवाच्यत्वादिरूपविशेषणज्ञानं बिना तादृशबुद्ध्यनुदयप्रसङ्गः। न च शृङ्गं शशीयं वाच्यत्वं समवायीति भ्रमानन्तरमेव तादृशबुद्ध्युपगमान्न दोष इति वाच्यम्। शृङ्गं न शशीयं वाच्यत्वं न समवायीतिविशेषदर्शनदशायामपि तादृशप्रतीत्योरानुभविकत्वात्तदपलापे सर्वत्रैव तदपलापसम्भवात् सोन्दडोपाध्यायमतस्यात्यन्तनिर्युक्तिकत्वापत्तेः। तादृशविशेषदर्शनकालीनतद्बुद्धेः शृङ्गवाच्यत्वादौ शशीयत्वसमवायित्वाद्यभावावगाहितास्वीकारे सर्वत्रैव तत्सम्भवेन तद्दोषतादवस्थ्यादिति चेत्।

सत्यम्। उक्त एव दोषस्तन्मतपरित्यागे बीजम्। दीधितिकृतापि तद्विशिष्टज्ञानस्याभावधीहेतुत्वादिति मूलं विशेषणतावच्छेदकप्रकारकविशेषणज्ञानरूपकारणबाधप्रदर्शनपरतयैव व्याख्यातम्। अस्य च दोषस्य नावकाशः विशेषदर्शनदशायामाहार्यविशेषणतावच्छेदप्रकारकविशेषणज्ञानस्य सम्भवात् तद्बलादेव व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रतीतिः सम्भवतीति।। न चानाहार्यमेव विशेषणतावच्छेदकप्रकारकज्ञानं विशिष्टप्रत्ययहेतुर्गौरवात्। अत एव शङ्खो न पीत इत्यादिविशेषदर्शनवतापि

प्रतारकेण पीतः शङ्खोऽत्र नास्ति किन्तु द्वीपान्तरे इत्यादिवाक्यं प्रयुज्यते, नहि वाक्यार्थमजानानस्य वाक्यरचना सम्भवति, येन पीतः शङ्खो नास्तीत्याद्याकारकविशिष्टवैशिष्ट्यबोधमन्तरेणापि विशेषदर्शनवता तादृशं वाक्यं प्रयोक्तव्यम् । यदि चानाहार्य एव विशेषणतावच्छेदकप्रकारकबोधो विशिष्टवैशिष्ट्यप्रत्ययहेतुः, अन्यथा दण्डो रक्त इत्याद्याकाराहार्यनिश्चयानन्तरं रक्तारक्तदण्डो नास्तीत्याद्याकारस्य विशेषणतावच्छेदकांशे संशयात्मकस्यापि विशिष्टवैशिष्ट्यबोधस्यापत्तेः, विशिष्टवाक्यार्थबोधमन्तरेणापि तत्प्रकारकतद्विशेष्यकज्ञानत्वादिना वाक्यार्थज्ञानेन परकीयतादृशज्ञानेच्छया वाक्यप्रयोगः सम्भवतीति न प्रतारकस्य पीतः शङ्खो नास्तीत्यादिप्रतीतेरावश्यकतेति मन्यते, तदापि न क्षतिः वैशिष्ट्यप्रतियोगितांशे विशेषणतावच्छेदकविशेषितमवच्छिन्नत्वं यत्र संसर्गघटकतया भासते तत्रैव विशेषणतावच्छेदकप्रकारकज्ञानस्यापेक्षिततया स्वावच्छिन्नप्रतियोगिताकानुयोगित्वसम्बन्धेनाभावांशे शशीयत्वादिप्रकारकस्य शशीयतया शृङ्गं नास्तीत्याकारकव्यधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावप्रत्ययस्योक्तविशेषदर्शनदशायां निष्प्रत्यूहत्वात् । दण्डी चैत्रः घटो नास्तीत्याद्याकारकविशिष्टवैशिष्ट्यबोधे तु दण्डत्वघटत्वाद्यवच्छिन्नप्रतियोगिताकत्वविशिष्ट एव संयोगानुयोगित्वादिः संबन्ध इति तत्र दण्डत्वघटत्वादिज्ञानापेक्षा । यदि च तत्रापि शुद्ध एव संयोगानुयोगित्वप्रतियोगित्वादिश्चैत्राभावादौ दण्डघटादेस्संसर्गः, दण्डत्वघटत्वादेस्तु स्वावच्छिन्नप्रतियोगिताकसंयोगतथाविधानुयोगित्वादिकं तथा, तदा स्वावच्छिन्नप्रतियोगिताकत्वविशिष्टसंसर्गावच्छिन्ना या विशेषणपारतन्त्र्येण विशेष्यनिरूपिततद्धर्मप्रकारता तच्छालिबुद्धावेव विशेषणतावच्छेदकप्रकारकज्ञानस्य कारणता कल्पनीया । शशीयतया शृङ्गं नास्तीत्यादौ चाभावांशे तादृशसम्बन्धेन शशीयत्वादेः स्वातन्त्र्येणैव प्रकारता न तु विशेषणीभूतशृङ्गादिपारतन्त्र्येण तस्य शृङ्गादावविशेषणत्वात्, तन्निरूपितप्रकारतावच्छिन्नप्रकारताया एव तत्पारतन्त्र्येण प्रकारतापदार्थत्वादित्युद्धारप्रकारमाकूल्प्याभावप्रत्यये प्रतियोगिविशेषणतापन्नस्यैव धर्मस्य प्रतियोगितावच्छेदकतया भानमनुभवसिद्धमित्युक्तया प्रतियोग्यवृत्तिश्च धर्मो न प्रतियोगितावच्छेदक इत्यनेन प्रतियोग्यवृत्तिधर्मस्य प्रतियोगितावच्छेदकत्वन्निराकृतम् ।

अथैवमपि व्यधिकरणधर्मावच्छिन्नस्यैव प्रतियोगिनो व्यधिकरणधर्मावच्छिन्नाभावप्रतीत्या विषयीकरणे उक्तकारणबाधरूपबाधकस्य(१) जा-

(१) उक्तकारणबाधस्येति सि० पु० पाठः ।

गरूकतया 'अथावगाहत' इत्याशङ्काया अनुत्थितिरिति वाच्यम् । भ्रमात्मकविशेषणतावच्छेदकप्रकारकज्ञानादेव व्यधिकरणधर्मावच्छिन्नाभावप्रतीतिरुत्पद्यते, विशेषदर्शनकालीनं शशीयतया शृङ्गं नास्तीत्याकारकं ज्ञानं शृङ्गादौ शशीयत्वाभावविषयकमेव यत्र बाधकं तत्रैव प्रतीतेरन्यविषयकता न तु बाधकविरहस्थलेऽपि, अन्यथा यत्र यत्किञ्चिदवयवनाशान्महाघटनाशो नैयायिकादिसम्मतः तत्रत्यायाः स एवायङ्घट इत्यादिप्रत्यभिज्ञायाः तज्जातीयत्वावलम्बनत्वमावश्यकमिति सर्वत्रैव तदवलम्बनतासम्भवात् भेदावगाहिन्याः प्रत्यभिज्ञाया असिध्या स्थैर्यमात्रोच्छेदप्रसङ्गादित्याशयेन तादृशशङ्कासम्भवात् । अथ यदि वैशिष्ट्यांशे तद्धर्मावच्छिन्नप्रतियोगिकत्वावगाहिन्येव बोधे तद्धर्मप्रकारकबोधो हेतुस्तदा घटत्वादिनिर्विकल्पकानन्तरं घटत्वाद्यवच्छिन्नप्रतियोगिकत्वानवगाही घटो नास्तीत्याकारकाभावप्रत्ययः कथं नोत्पद्यते ? स्वमतेऽभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानस्य पृथक्कारणताविरहादिति चेन्न । तद्धर्मविशिष्टनिरूपितत्वेन वैशिष्ट्यानवगाहिनस्तद्धर्मविशेषितप्रतियोगिप्रकारकाभावभानस्य क्वचिदप्यनभ्युपगमेनापाद्याप्रसिद्धेः । एतेन घटत्वावच्छिन्नप्रतियोगिताकाभावे द्रव्यत्वादिविशिष्टवैशिष्ट्यस्यासत्त्वेऽपि केवलं विशेष्ये विशेषणमित्यादिरीत्या द्रव्यत्वादिविशेषितघटत्वादिप्रकारकतादृशाभावज्ञानापत्तेर्दुर्वार्यतया घटादिशून्ये द्रव्यान्तरवत्यपि द्रव्यं नास्तीत्याकारकप्रत्ययापत्तिरित्यपि परास्तम् ।

अथ सोन्दडोपाध्यायमते पटत्वेन घटो नास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावबुद्धेर्घटत्वविशिष्टवैशिष्ट्यानवगाहितया घटत्वादिप्रकारकज्ञानजन्यतावच्छेदकानाक्रान्ततया घटत्वादिनिर्विकल्पकोत्तरन्तादृशबुद्ध्यापत्तिः ।

अत्र केचित् । पटत्वादिना घटात्यन्ताभावस्य प्रतियोगिताया व्यधिकरणतया पटत्वादेरिव समानाधिकरणतया घटत्वादेरप्यवच्छेदकत्वं स्वीक्रियते अतस्तादृशबुद्धेर्घटत्वादिविशिष्टवैशिष्ट्यावगाहित्वमक्षतमेव घटत्वावच्छिन्नत्वेनैव तत्र प्रतियोगिताभानोपगमादिति नातिप्रसङ्गः । प्रतियोगितावच्छेदकत्वञ्चोभयत्र व्यासज्यवृत्ति, अतः प्रतियोगितावच्छेदकघटत्वावच्छिन्नवति न तादृशाभावासत्त्वप्रसङ्गः प्रतियोतावच्छेदकतापर्याप्त्यधिकरणसमुदायावच्छिन्नेनैव सममभावस्य विरोधादन्यथा महानसीयवह्नित्वाद्यवच्छिन्नाभावस्य वह्नित्वाद्यवच्छिन्नाधिकरणपर्वतादावसत्त्वप्रसङ्गात् । एतेन समानाधिकरणतया घटत्वादेस्तादृशाभावप्रतियोगितावच्छेदकत्वे घटत्वादिना घटादिमत्त्वोपलम्भस्य

तादृशाभावबुद्धिविरोधित्वप्रसङ्ग इत्यपि परास्तम् । प्रतियोगितावच्छेदकतापर्य्याप्त्यधिकरणसमुदायप्रकारेण प्रतियोगिमत्त्वोपलम्भस्यैवाभावबुद्धिप्रतिबन्धकत्वात्, अन्यथा शुद्धवह्नित्वादिप्रकारेण वह्न्यादिप्रकारकोपलम्भस्यापि महानसीयवह्नित्वाद्यवच्छिन्नाभावधीविरोधितापत्तेः । विरोधी च शशीयतया शृङ्गन्नास्तीत्यादिव्यधिकरणधर्मावच्छिन्नाभावबुद्धेः शशीयत्वशृङ्गत्वादिसमुदायप्रकारकशशशृङ्गवानयमित्याद्याकारको भ्रमात्मकप्रतियोग्युपलम्भ एव, तस्य च प्रतिबध्यतावच्छेदकन्न वास्तवशशीयत्वशृङ्गत्वादिपर्याप्तावच्छेदकताप्रतियोगिताकाभावविशिष्टबुद्धित्वं शृङ्गत्वाद्यवच्छिन्नप्रतियोगितायां शशीयत्वाद्यवच्छिन्नत्वभ्रमात्मकशशशृङ्गन्नास्तीतिप्रत्ययासङ्ग्रहात्, किन्तु प्रतियोगित्वांशे शशीयत्वावच्छिन्नत्वशृङ्गत्वावच्छिन्नत्वाद्यवगाह्यभावविशिष्टबुद्धित्वमेव, एवं च सर्ववादिसिद्धप्रतिबध्यप्रतिबन्धकभावेनैवोपपत्तिः ।

अथ शृङ्गत्वेन शृङ्गोपलम्भस्य प्रतिबध्यतावच्छेदकं यदि प्रतियोगितांशे शृङ्गत्वाद्यवच्छिन्नत्वावगाह्येतादृशबुद्धित्वन्तदा शृङ्गवानयमितिज्ञानस्य शशीयतया शृङ्गं नास्तीतिबुद्धिविरोधित्वन्दुर्वारमेव, यदि च शृङ्गत्वान्यधर्मावच्छिन्नत्वानवगाहिबुद्धित्वं तदा शृङ्गन्नास्ति शशीयन्नास्तीति समूहालम्बनबुद्धौ तदविरोधित्वप्रसङ्ग इति चेन्न । शृङ्गत्वाद्यवच्छिन्नत्वनिष्ठावच्छेदकताभिन्ना याऽवच्छिन्नत्वनिष्ठावच्छेदकता तदनिरूपकप्रतियोगितानिष्ठसांसर्गिकविषयतायाः प्रतिबध्यतावच्छेदकत्वोपगमेनानुपपत्त्यभावात् उक्तसमूहालम्बनज्ञानीयशृङ्गत्वाद्यवच्छिन्नप्रतियोगितानिष्ठसंसर्गतायाः शशीयत्वावच्छिन्नप्रतियोगितानिष्ठसंसर्गतातो भिन्नतया शशीयत्वावच्छिन्नप्रतियोगितासंसर्गकतादृशज्ञानसङ्ग्रहात् । न च शशीयतया शृङ्गं नास्तीत्यादौ शशीयत्वप्रकारतानिरूपितदर्शितपरम्परासंसर्गनिष्ठसंसर्गतान्तःपातिनी या प्रतियोगित्वीयसंसर्गतातोऽन्यैव शृङ्गप्रकारतानिरूपितसंसर्गतान्तःपातिनी प्रतियोगित्वीयसंसर्गता, सा च शशीयत्वावच्छिन्नत्वेनानवच्छिन्नैवेति कथं व्यधिकरणधर्मावच्छिन्नाभावबुद्धेः शुद्धशृङ्गत्वेन शृङ्गोपलम्भाप्रतिबध्यतेति वाच्यम् । तादृशबुद्धौ शृङ्गप्रकारतानिरूपितसंसर्गतान्तःपातिप्रतियोगित्वीयसंसर्गतायाः शशीयत्वप्रकारतानिरूपितावच्छिन्नत्वीयसंसर्गताख्यविषयतानिरूपितत्वस्वीकारात्तस्या उपदर्शितपरम्परासम्बन्धेनाभावांशे शशीयत्वादिप्रकारतानिर्वाहेण प्रतियोगित्वादिसंसर्गताभेदे मानाभावात् । एवं च शुद्धमणित्वावच्छिन्नाभावस्यैव दाहादिहेतुतया मण्यादिसमवधानकाले व्यधिकरणधर्मावच्छिन्नतदभावबलाद्दाहाद्यापत्तिरपि परास्तेति वदन्ति ।

यत्तु–तद्धर्मप्रकारतानिरूपितविशेष्यतापन्नदण्डादिनिष्ठप्रकारताशालित्वरूपतद्विशिष्टप्रकारकत्वावच्छिन्नबुद्धावेव तद्धर्मप्रकारकज्ञानं हेतुः, (न तु) तदवच्छिन्नप्रतियोगिताकत्वविशिष्टसंसर्गकत्वमपि कार्य्यतावच्छेदककोटौ निवेश्यते, दण्डत्वादिनिर्विकल्पकानन्तरञ्च दण्ड इत्याद्याकारकं ज्ञानम्प्रथमत उपेयते, विशेष्ये विशेषणमित्यादिरीत्यापि दण्डीत्याकारकं ज्ञानन्तदनन्तरमेव क्षणैकापलापे क्षतिविरहात्, तादृशविशेष्यतापन्ननिष्ठप्रकारताशालित्वन्तु तादृशविशेष्यतयाऽवच्छिन्नाऽभिन्ना वा या प्रकारता तच्छालित्वमतो दण्डत्वनिर्विकल्पकद्रव्यत्वादिप्रकारकज्ञानानन्तरोत्पन्नद्रव्यवान्दण्डश्चेत्याकारकतादृशविशेष्यतासमानाधिकरणप्रकारताशालिसमूहालम्बने न व्यभिचार इति । तत्तुच्छम् । घटमानयेतिवाक्यात्कर्मत्वङ्घटीयमित्याकारकावान्तरवाक्यार्थज्ञानं विनापि विशकलितघटकर्मत्वादिसकलपदार्थविषयकसमूहालम्बनोपस्थितिबलाद्विशेष्ये विशेषणमितिरीत्या घटादिप्रकारतानिरूपितविशेष्यतावच्छिन्नकर्मत्वादिप्रकारताशालिशाब्दबोधस्य सर्ववादिसिद्धस्यानुपपत्तेः । नच तत्र कर्मत्वादिप्रकारताया घटात्वादिप्रकारतानिरूपितविशेष्यतानवच्छिन्नत्वे कर्मत्वङ्घटीयमानयनं सकर्मकमित्यादिसमूहालम्बनानां तादृशवैचित्र्यानुपपत्तिर्नहि विशेष्ये विशेषणमितिरीत्या बोधस्समूहालम्बनादविलक्षण एवेति वाच्यम्(१) । तथासति तादृशबोधेनैकवाक्यतानुपपत्तेः व्याप्तिघटकपदार्थानां विशकलितसमूहालम्बनोपस्थितिमूलकात् विशेष्ये विशेषणमितिरीत्या परामर्शादनुमित्युत्पत्तेर्मिश्रादिसंमताया अनुपपत्तेः । एवन्दीधितिकृतां तादृशरीत्या जायमानायाः काञ्चनमयवह्निमान्पर्वत इत्येतादृशानुमितेः काञ्चनमयत्वावच्छिन्नवह्न्यभावनिश्चयप्रतिबध्याया विशिष्टवह्निसिद्ध्यनपेक्षत्वाभिधानासङ्गतिः ।

परे तु तद्धर्मविशिष्टप्रकारकबुद्धावेव तद्धर्मप्रकारकज्ञानं हेतुः । तद्विशिष्ट कारकत्वञ्च तदवच्छिन्नप्रकारकत्मेव न तु तदवच्छिन्नप्रतियोगिताकत्वविशिष्टसंसर्गकत्वमपि कार्यतावच्छेदककोटौ निवेश्यते तद्विशिष्टनिरूपितवैशिष्ट्यावगाहिज्ञाने तद्धर्मस्य प्रकारतावच्छेदकतानियमात् तत्र नियमतस्तद्धर्मप्रकारकज्ञानापेक्षया घटत्वेन घटो नास्तीत्यादिबुद्धेर्घटत्वावच्छिन्नप्रतियोगिताकत्वानवगाहित्वेऽपि घटत्वावच्छिन्नप्रकारताशालित्वेन घटत्वादिप्रकारकज्ञानजन्यतावच्छेदकाक्रान्तत्वमक्षतमेवेति नोक्तातिप्रसङ्गः । यथा विशेष्यांशे प्रकारत्वमेव न विशेष्यतावच्छेदकत्वम्, तथासति भूतलङ्घटवदित्यादौ घटादेः स्वस्य च भूतलत्वादिधर्मि-

(१) नच वाच्यमिति मि० नास्ति पुस्तके ।

तावच्छेदकत्वापत्तेः, किन्तु विषयताविशेष एव, स च प्रकारताविशेषः प्रकारताभिन्नो वेत्यन्यदेतत्। तथा प्रकारतावच्छेदकत्वमपि विषयताविशेष एव नतु प्रकारांशे प्रकारत्वमेव तत्। एवं च दण्डत्वादिनिर्विकल्पकानन्तरं विशेष्ये विशेषणमितिरीत्या जायमानस्य दण्डीत्याकारकज्ञानस्य दण्डत्वादौ प्रकारतावच्छेदकताख्यविषयताविशेषस्यानभ्युपगमात् न तदनुपपत्तिः। घटत्वादिनिष्ठतादृशविलक्षणविषयतारहितस्य घटो नास्तीत्याकारकाभावप्रत्ययस्य क्वचिदप्यनभ्युपगमात् न घटत्वादिनिर्विकल्पकानन्तरन्तदापत्तिः, अत एवावच्छेदकताया अव्यासज्यवृत्तित्वमते महानसीयवह्निर्नास्तीत्याद्याकारकाभावप्रत्ययस्य महानसीयत्ववह्नित्वाद्यवच्छिन्नप्रतियोगिकत्वावगाहित्वं न सम्भवति, महानसीयत्वादेर्वह्नित्वादिनिष्ठायाम्प्रतियोगितावच्छेदकतायामेव सामानाधिकरण्यप्रत्यासत्त्याऽवच्छेदकत्वोपगमात्, तथाच तस्य महानसीयत्वादिविशिष्टवैशिष्ट्यावगाहितया वह्न्यादौ महानसीयत्वादिप्रकारकज्ञानशून्यकाले आपत्तिः। न च वह्नित्वविशिष्टमहानसीयत्वादेरपि महानसीयवह्न्याद्यभावप्रतियोगितायां विनिगमनाविरहादवच्छेदकतया अवच्छेदकताया अव्यासज्यवृत्तित्वेऽपि कथितप्रत्ययस्य महानसीयत्वावच्छिन्नप्रतियोगिताकत्वावगाहित्वं सम्भवतीति वाच्यम्। अवच्छेदकताया अव्यासज्यवृत्तित्वे विनिगमनाविरहेणोभयस्य तत्प्रतियोगितावच्छेदकत्वेऽपि अवच्छेदकताभेदेन प्रतियोगिताभेदादेकस्याः प्रतियोगिताया उभयधर्मावच्छिन्नत्वभानासम्भवात् तादृशाभावबुद्धेर्वह्नित्वमहानसीयत्वोभयावच्छिन्नप्रतियोगिताकत्वनिष्ठसंसर्गताकत्वघटितवह्नित्वधर्मितावच्छेदककमहानसीयत्वप्रकारकज्ञानजन्यतावच्छेदकाक्रान्ततया घटयितुमशक्यत्वात्। न च वह्नित्वावच्छिन्नत्वविशिष्टप्रतियोगितासंसर्गकत्वे सति महानसीयत्वावच्छिन्नत्वविशिष्टप्रतियोगितासंसर्गकत्वस्य तादृशज्ञानजन्यतावच्छेदकत्वोपगमात् महानसीयवह्निर्नास्तीत्यादौ च तादृशधर्माभ्याम्प्रत्येकमवच्छिन्नस्य प्रतियोगिताद्वयस्यैव(१) संसर्गतोपगमेन नायं दोष इति वाच्यम्। तादृशधर्मस्य जन्यतावच्छेदकत्वे महानसीयो नास्ति वह्निर्नास्तीति समूहालम्बनबुद्धौ तथाविधज्ञानस्य व्यभिचारात्। वार्यतां वा तत्र कथंचिद्व्यभिचारः, तथापि सुरभिजलं नास्तीत्यादावगतिरेव, तत्र जलत्वावच्छिन्नस्य सौरभादेः परम्परासंबन्धेनैवावच्छेदकताया वक्तव्यतया सौरभविशिष्टजलत्वादेः साक्षात्सम्बन्धेनावच्छेदकत्वे लाघवस्यैव विनिगमकत्वात्, सौरभादेः प्रतियोगितानवच्छेदकतया तदवच्छिन्नप्रतियोगिताकत्वावगाहि-

(१) तादृशप्रत्येकधर्मावच्छिन्नप्रतियोगित्वस्यैवेति मि० पु० पाठः।

त्वासंभवात् इत्यनुपपत्तिरपि समाहिता । उक्तप्रतीतेर्महानसीयत्वावच्छिन्नप्रतियोगिताकत्वावगाहनेऽपि महानसीयत्वादेः प्रकारतावच्छेदकतया तत्प्रकारकज्ञानसापेक्षत्वात् ।

अथ तद्धर्मावच्छिन्नप्रतियोगिताकत्वानवगाहिन्यभावप्रत्यये तद्धर्मस्य प्रतियोगिनिष्ठप्रकारताया अवच्छेदकत्वोपगमे वह्न्यादिसामान्याभावबोधेऽपि महानसीयत्वादि प्रकारतया भासतामिति चेत् । इष्टमेवैतत्सोन्दडोपाध्यायमतानुयायिनां, तन्मते प्रतियोगितावच्छेदकप्रकारेणैव प्रतियोगिनो भानमिति नियमस्यासिद्धेः।अथैवम्महानसीयवह्न्यभावप्रत्ययस्य वह्न्याद्यंशे उपलक्षणविधया महानसीयत्वावगाहिनो वह्न्यादिसामान्याभावप्रत्ययस्य चाविलक्षणतया महानसीयत्वाद्यविषयकवह्निमानयमित्यादिबुद्धौ तयोर्धर्मयोरेव प्रतिबन्धकत्वमप्रतिबन्धकत्वं वा स्यात् ,नतु प्रथमस्यातथात्वं द्वितीयस्य च तथात्वमिति चेत् अनुयुज्यते, तदाऽऽकर्णयतामवधानपरेण-महानसीयवह्नित्वाद्यवच्छिन्नाभावबुद्धाववच्छेदकताया अव्यासज्यवृत्तित्वकल्पे महानसीयत्वावच्छिन्नत्वविशेषितावच्छेदकतानिरूपकत्वं प्रतियोगितांशे भासते वह्निसामान्याभावबोधे च महानसीयत्वाद्यवच्छिन्नत्वं नावच्छेदकतायाम्भासते इति विशेषः । न च प्रतियोगितावच्छेदकांशे विशेषणतापन्नस्यैव प्रतियोगितावच्छेदकतावच्छेदकत्वम्भासत इति नियमः, यथा दण्डीनास्तीत्यादौ दण्डत्वादेः, इत्थञ्च महानसीयवह्निर्नास्तीत्यादौ वह्नित्वांशेऽविशेषणस्य महानसीयत्वादेः कथन्तथा भानमिति वाच्यम् । सोन्दडमते समवायितया वाच्यत्ववान्नेत्यादिभेदप्रत्यये प्रतियोगितावच्छेदकांशेऽविशेषणस्यापि समवायित्वादेः प्रतियोगितावच्छेदकतावच्छेदकत्वभानेन तादृशनियमस्यासिद्धेः।। अन्यमते आश्रयतासम्बन्धेनावच्छेदकतावच्छेदकत्वस्य भान एव तथा नियमो न तु सामानाधिकरण्यप्रत्यासत्त्यवच्छिन्नस्य तस्य भाने। तादृशावच्छेदकतावच्छेदकत्वमवच्छेदकविशिष्टे विशेषणतापन्न एव भासते इति नियमः, अतो वह्निर्नास्तीत्याद्याकारकप्रतीतौ महानसीयत्वविशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकत्वञ्च भासते इति न पर्वतादौ वह्निर्नास्तीत्याकारकप्रतीत्यापत्तिः। एवं व्यधिकरणधर्मावच्छिन्नाभावानभ्युपगन्तृमते प्रतियोगितावच्छेदकधर्मप्रकारेणैव प्रतियोगिभाननियमेऽपि साक्षात्परम्परासाधारणप्रतियोगितानिरूपितमवच्छेदकत्वमेव विवक्षितन्तच्चावच्छेदकतावच्छेदकसाधारणमिति न दोषः। एवं घटो भविष्यति घटो नष्ट इत्याकारकप्रागभावध्वंसप्रतीतौ घटत्वादेरतिप्रसक्ततया ध्वंसप्राग-

भावप्रतियोगितानवच्छेदकत्वेनोपलक्षणतयैव प्रतियोग्यंशे भानात् तद्वि-
शिष्टवैशिष्ट्यानवगाहितया घटत्वादिनिर्विकल्पकानन्तरन्तदापत्तिरित्य-
स्यापि ईदृशप्रकारानुसरणमन्तराऽशक्यवारणमेव । एवमनुयोगिताव-
च्छेदकप्रकारकज्ञानस्यापि तद्धर्मनिष्ठधर्मितावच्छेदकताकबुद्धावेव हेतुता
न तु तद्धर्मविशिष्टानुयोगिकत्वावच्छिन्नसंसर्गताकत्वमपि कार्यतावच्छे-
दककोटौ निवेशनीयं गौरवात् तद्विशिष्टानुयोगिकत्वावच्छिन्नसंसर्ग-
कबुद्धौ तद्धर्मस्य धर्मितावच्छेदकत्वनियमादेव तादृशबुद्धौ नियम-
तस्तद्धर्मप्रकारज्ञानापेक्षोपपत्तिः । दण्डादिविषयकनिर्विकल्पकानन्तर-
न्दण्डीत्याकारकज्ञानोत्पत्ताविव क्षणैकव्याजेन एकत्र द्वयमिति रीत्यापि
दण्डकुण्डलाद्युभयप्रकारकदण्डादिधर्मितावच्छेदकज्ञानमुत्पद्यते । द-
ण्डी कुण्डलीत्यादिवाक्याच्चैत्रत्वावच्छिन्नविशेष्यकदण्डसम्बन्धादिप्रका-
रकावान्तरवाक्यार्थज्ञानरहितस्य पुंसः खले कपोतन्यायेन जायमाना-
यामन्वयबुद्धौ दण्डसम्बन्धादेर्न कुण्डलसम्बन्धादिधर्मितावच्छेदकत्व-
मुपगम्यते, अपि तु चैत्रत्वादावेव तदुभयधर्मितावच्छेदकत्वम्,
चैत्रत्वादेः पदार्थतावच्छेदकतया तत्प्रकारकपदार्थोपस्थितेः खले कपोत-
न्यायेनापि शाब्दबोधस्य प्राक्सत्त्वनियमात्तावतैवान्वयबोधस्य सधर्मि-
तावच्छेदकत्वनियमोपपत्तेः । एवञ्च संशये धर्मितावच्छेदकप्रकारकज्ञा-
नस्यापि स्वतन्त्रहेतुताकल्पनेनापि लाघवम्, अन्यथा गन्धप्रागभाववान्
गन्धवान् न वा गोसदृशो गवयपदवाच्यो नवा द्रव्यावृत्तिर्गगनवृत्तिर्नवे-
त्याकारकसंशयेषु गन्धप्रागभावगोसादृश्यद्रव्यावृत्तित्वाद्युपलक्षिते धर्मिणि
कोटिवैशिष्ट्यावगाहिषु विशिष्टानुयोगिकवैशिष्ट्यानवगाहितयाऽनुयोगि-
तावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकानाक्रान्तेषु तत्तद्धर्मितावच्छेदक-
ज्ञानानां स्वातन्त्र्येण हेतुताकल्पनस्यावश्यकतापत्तेः । एवं विशेष्यताप्रका-
रते विषयतात्वेनानुगमय्य तद्धर्मवृत्तिविषयतावच्छेदकताकबुद्धित्वमेव
तद्धर्मप्रकारकज्ञानजन्यतावच्छेदकमङ्गीकार्यमित्येकैव विशेषणताऽनुयोगि-
तावच्छेदकप्रकारकज्ञानयोर्द्विविधविशिष्टवैशिष्ट्यबोधहेतुता इत्यपि लाघ-
वम् । तद्धर्मप्रकारकज्ञानशून्यकालीनतद्धर्मविशिष्टसंसर्गकबुद्धौ तद्धर्म-
स्य सांसर्गिकविषयतानिरूपितविषयताविशेषात्मकमवच्छेदकत्वञ्च स्वी-
क्रियते दण्डत्वादिनिर्विकल्पकानन्तरञ्जायमानायान्दण्डीत्यादिबुद्धौ द-
ण्डत्वादेः प्रकारतावच्छेदकतात्मकविषयताविशेषवत्, एवञ्च प्रतियोग्यंशे
प्रकारतापन्नस्य व्यधिकरणधर्मावच्छिन्नाभावप्रतियोगितानवच्छेदकत्वे-
ऽपि न क्षतिः इत्यभिसन्धायैव दीधितिकारः चक्रवर्त्तिलक्षणे व्यधिकर-
णधर्मावच्छिन्नसाध्यसामान्याभावमुपेक्ष्य ह्रदत्ववह्नित्वाभ्यां वह्निर्नास्ती-

त्यादिप्रत्ययविषयाभावमवच्छेदकतापर्य्याप्तिनिवेशनप्रयोजनप्रदर्शनायानुसृतवानित्याहुः ।

अन्ये तु विशिष्टपर्य्याप्तप्रकारताकत्वं विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकम्, दण्डत्वादिनिर्विकल्पकानन्तरोत्पन्नस्य दण्डीत्याकारकज्ञानस्य पुरुषादिविशेष्यतानिरूपितप्रकारता शुद्धदण्डित्वादावेव पर्य्याप्ता न तु दण्डत्वादिरूपविशेषणान्तर्भावेन (तत्पर्य्याप्तिः) । अभावबुद्धौ प्रतियोगिनिष्ठप्रकारतायास्तद्विशेषणीभूतधर्मान्तर्भावेन पर्याप्तिनियमात् घटत्वेन घटो नास्ति घटो भविष्यति घटो नष्ट इत्यादिबुद्धेर्घटत्वादिविशिष्टनिरूपितत्वावच्छिन्नसंसर्गानवगाहित्वेऽपि न घटत्वादिनिर्विकल्पकानन्तरमापत्तिः । अथ पुरुषादिनिष्ठविशेष्यतानिरूपितप्रकारताया दण्डत्वाद्यन्तर्भावेण पर्याप्तौ न कथन्दण्डी पुरुष इत्यादिबुद्धेः पुरुषाद्यंशे दण्डत्वादिप्रकारकतया भ्रमत्वापत्तिः, न वा पुरुषो न दण्ड इत्याकारकज्ञानप्रतिबध्यत्वम् । तदभाववतीतरविशेषणतानापन्नतद्धर्मप्रकारकत्वस्य भ्रमत्वरूपत्वे धर्मिणि इतरविशेषणतानापन्नतद्धर्मप्रकारकत्वस्य तद्विरोधिज्ञानप्रतिबध्यतावच्छेदकत्वे चाभावांशे स्वावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन प्रतियोगिरूपविशेष्यपारतन्त्र्येण प्रमेयत्वप्रकारिकायाः प्रमेयं नास्तीत्यादिबुद्धेर्भ्रमत्वानुपपपत्तिः तदंशे तादृशसम्बन्धेन प्रमेयत्वादेर्बाधग्रहेऽपि तादृशबुद्ध्यापत्तिश्चेति चेन्न । तन्मात्रपर्याप्तप्रकारतायास्तत्र तत्र निवेशनैवोपपत्तेः इतरविशिष्टतद्धर्मवैशिष्ट्यावगाहिबुद्धौ अव्यासज्यवृत्तेरपि प्रकारतायास्तद्धर्मे स्वीकारेणैव तस्याः तद्धर्माभावनिश्चयप्रतिबध्यत्वनिर्वाहस्तादृशी च प्रकारता निर्विकल्पकानन्तरजातबुद्धावेव क्लृप्ता । यदि च केवलं विशेष्ये विशेषणमित्यादिरीत्या बुद्धेर्विषयता न विशिष्टवैशिष्ट्यधीत्व(१)व्यापिका, तदा तद्धर्मविशेष्यतापन्नवृत्तितदीयप्रकारतैव तत्र तत्र निवेश्यते । तत्र तन्निरूपितविशेष्यताभिन्नत्वन्तन्निरूपितविशेष्यतानवच्छिन्नत्वं वा वृत्त्यन्तार्थः । दण्डी पुरुष इत्यादिविशिष्टवैशिष्ट्यबोधीयदण्डत्वादिविशिष्टपर्याप्तप्रकारता दण्डत्वादिप्रकारतानिरूपितविशेष्यतारूपा तदवच्छिन्नैव वा । अत एव विशिष्टघटकतद्विशेष्यविशेषणसम्बन्धानां विशेषणविशेष्यभावे वैपरीत्येऽप्यविलक्षणतया तत्तद्वैपरीत्ये विशिष्टप्रकारताया वैलक्षण्यानुपपत्तिरित्यपि समाहितम् । उक्तदिशाऽवान्तरविशेष्यविशेषणभाववैलक्षण्यस्य विशिष्टपर्याप्तविषयतावैलक्षण्यनिर्वाहकत्वान्नोक्तातिप्रसङ्गः । एतेनाभावबुद्धेः प्रतियोगिकोटौ विशेष्ये विशेषणमितिरीत्या विषयत्वस्याप्रामाणिकत्वेऽपि कस्याश्चित्तस्याः प्रतियोगिवैशि-

(१) विषयतात्वव्यापिकेति मि० पु० पाठः ।

ष्यांशे भ्रमत्वमुपपद्यते । तत्तद्विशेषणतावच्छेदकप्रकारकज्ञानस्यापि तद्धर्मवृत्तिः सतो तद्धर्मप्रकारतानिरूपितविशेष्यतापन्नवृत्तिर्या प्रकारता तच्छालिबुद्धित्वमेव जन्यतावच्छेदकमतो लोहितवह्निमानित्यादौ लौहित्यविशिष्टवह्नेरप्रसिद्धावपि न क्षतिः । न वा इतरविशिष्टतद्धर्मवैशिष्ट्यबुद्धौ तद्धर्मप्रकारकधियो व्यभिचार इति वदन्ति ।

इमौ च द्वावेव पन्थानौ 'विशेषणावच्छिन्नविशेष्यविशेषणयोर्व्यासज्यवृत्तिर्वा व्याप्तिर्विशिष्टव्याप्त्यर्थः' इत्यभिहितवतो मणिकार(१)स्य 'यावद्विशेषाभावाधिकरणवृत्तित्वरूपविशेषणान्तर्भावेन सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्य पर्याप्तिस्तादृशाधिकरणावृत्तित्वन्तदवच्छेदकं वेति' वदतो दीधितिका(२)रस्याप्यभ्युपगमाभावेन सिद्धान्तविरोधमावहतः । अनयोरुपादेयानुपादेयताप्रयोजकविशेषः स्फुट एवेति स्वयमूहनीयम् ।

अथ विशिष्टनिरूपितविलक्षणसंसर्गानवगाहिज्ञाने केवलं विशेष्ये विशेषणमितिरीत्या विषयतातो विलक्षणायां विशिष्टवैशिष्ट्यविषयताया मानाभावः । विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकस्योपदर्शिताभावधीसाधारण्यानुरोधेन तत्सिद्धिरिति तु नाशङ्कनीयम्, तस्य तत्साधारण्यविरहेऽपि अभावबुद्धौ प्रतियोगिविशेषणीभूतधर्म्मप्रकारकधियः स्वतन्त्रहेतुतया तद्धर्मादिविषयकनिर्विकल्पकानन्तरन्तद्धर्मविशेषितप्रतियोगिकनाशादप्रत्यक्षस्य वारणसम्भवात्, लाघवेन विलक्षणविषयतासिद्धेः सिद्धान्तविरुद्धत्वात् ज्ञानाकारवैलक्षण्ये वैलक्षण्यस्य सविवादत्वादिति चेन्न । यतो विशिष्टनिरूपितविलक्षणसंसर्गावच्छिन्नप्रकारता शुद्धसंयोगादिसंसर्गावच्छिन्नप्रकारतातोऽतिरिक्तेत्यत्र सर्वेषामविवादः । घटो नष्टः घटत्वेन पटो नास्तीत्यभावबुद्धेरपि अनुयोगिनाविशेषसम्बन्धावच्छिन्नप्रकारताया विशेष्यांशे निर्विकल्पकान्तरं जायमानघटवद्भूतलमित्यादिज्ञानीयघटादिप्रकारतोऽतिरिक्तत्वं सर्ववादिसम्मतत्वात् । अभावबुद्धौ प्रतियोगिविशेषणधर्मप्रकारकधियः स्वातन्त्र्येण हेतुताऽकल्पनाप्रयुक्तलाघवानुरोधेन तादृशप्रकारताया विशेषणान्तर्भावेन पर्याप्तिः तदवच्छिन्नत्वं वा कल्प्यते न त्वतिरिक्तविषयतेति । विशिष्टसंसर्गकबाधादिकालीनघटत्वादिप्रकारकज्ञानोत्तरजायमानतद्विशिष्टप्रतियोगिकत्वानवच्छिन्नवैशिष्ट्यावगाहिभूतलं घटवदित्यादिज्ञाने च या घटादिप्रकारता तत्र तादृशवैलक्षण्यं नास्माभिरुपगम्यते येन घटादिनिर्विकल्पकानन्तरं जायमानज्ञानीयतथाविधविषयतातोऽतिरिक्तविषयता

(१) इत्यभिहितवन्तं मणिकारं ।

(२) वदन्तं दीधिकारमप्यनुसरत इति न सिद्धान्तविरोध मावहतः इति का० पु० पाठः।

तत्रापद्येत । अथ तद्धर्मप्रकारतानिरूपितविशेष्यतापन्नप्रकारताकबुद्धित्वमेव तद्धर्मप्रकारकधीजन्यतावच्छेदकमस्तु किं वैलक्षण्यकल्पनया, सर्वत्र घटवदित्याकारकज्ञानं घट इत्याकारकज्ञानपूर्वकमेवास्तु एकपदार्थविशेष्यकापरपदार्थप्रकारकशाब्दबोधोऽपि सर्वत्रावान्तरवाक्यार्थज्ञानपूर्वक एवास्ताम्, अस्तु प्रत्यक्षत्वमेव तज्जन्यतावच्छेदकम्, एवं च महानसीयत्वादिविशिष्टबुद्धेः प्रागनुपस्थितावपि लाघवोपनीतमहानसीयत्वविशेषितवह्निविशेष्यकानुमित्युत्पादेऽपि न क्षतिरिति चेन्न । घटवदित्याकारकविशिष्टवैशिष्ट्यानवगाहिज्ञानपूर्वं सर्वत्र घट इत्याकारकज्ञानव्यक्तीनामनन्तानाङ्कल्पनापेक्षयोक्तवैलक्षण्यकल्पनाया एवोचितत्वात् । घटत्वादिप्रकारतानिरूपितविशेष्यतापन्नप्रकारताया घटत्वादिवृत्तित्वानिवेशेन घटत्वादिप्रकारकज्ञानस्य कार्यतावच्छेदकत्वे पर्याप्तिघटकभिन्नत्वनिवेशेन च लाघवमेतन्मते ज्ञानव्यक्तिकल्पनागौरवं फलमुखमिति चेत् । अस्तु व्यासज्यवृत्तिविषयतापक्षीयकार्यतावच्छेकापेक्षयैतन्मते कार्यतावच्छेदकलाघवं विशेषणावच्छिन्नप्रकारताकल्पे तु एतन्मतापेक्षयाऽपि कार्यतावच्छेदकलाघवमित्यलमतिविस्तरेण ।

विशिष्टवैशिष्ट्यबोधश्च द्विविधः—अनवच्छिन्नविशेषणतावच्छेदकताकोऽवच्छिन्नविशेषणतावच्छेदकताकश्च । तत्रानवच्छिन्नदण्डत्वादिविशेषणतावच्छेदकताकदण्डीत्यादिबोधे स्वरूपतो दण्डत्वादिप्रकारकं ज्ञानं हेतुः, अन्यथा जातित्वादिना दण्डत्वादिप्रकारकजातिमानित्यादिज्ञानाद्दण्डीत्यादिविशिष्टवैशिष्ट्यबोधापत्तेः । न च स्वरूपतो दण्डत्वादिप्रकारकबोधे स्वरूपतो दण्डत्वादिविषयकज्ञानस्य हेतुतया तादृशकारणाभावादेव नोक्तापत्तिरिति वाच्यम् । यत्र दण्डत्वादिनिर्विकल्पकद्वितीयक्षणे जातित्वेन दण्डत्वादिप्रकारकस्मरणं तदुत्तरन्तादृशबोधापत्तेर्दुर्वारत्वात् । किञ्चिद्धर्मावच्छिन्नविशेषणतावच्छेदकताकदण्डिमानित्यादिबोधे च विशेषणतावच्छेदकतावच्छेदकप्रकारेण विशेषणतावच्छेदकप्रकारकज्ञानं हेतुः । यत्र द्रव्यत्वादिना दण्डादिप्रकारकज्ञानं दण्डत्वादिना दण्डादिमुख्यविशेष्यकज्ञानं च वर्त्तते तत्र दण्डिमानित्याकारकविशिष्टवैशिष्ट्यबोधानुदयात् तत्र विशेषणतावच्छेदकीभूततत्तद्दण्डादिविषयतामनिवेश्य दण्डत्वादिप्रकारतानिरूपितप्रकारताशालिज्ञानत्वेनैव हेतुत्वं, तथा च दण्डत्वादिना दण्डान्तरज्ञानादप्यपूर्वदण्डादिविषयकदण्डिमानित्यादिविशिष्टवैशिष्ट्यबोधो जायत इति सामान्यलक्षणप्रत्यासत्तिमनङ्गीकुर्वन्तो नवीना वदन्ति । यत्र विशेषणतावच्छेदकतावच्छेदकं दण्डत्वादिकमपि किञ्चिद्धर्मावच्छिन्नं तत्रापीदृशी रीतिरनुसन्धेया । ए-

तादृशदिशा च विशिष्टानुयोगिकवैशिष्ट्यबोधे तद्बोधकारणीभूतविशेष्यतावच्छेदकप्रकारकज्ञानयोर्विशेषोऽवसेयः । एवं विशिष्टवैशिष्ट्यबोधः क्वचिद्विशेषणतावच्छेदकांशे निर्धर्मितावच्छेदककः यथा दण्डवानित्यादि । तत्र दण्डत्वादिरूपविशेषणतावच्छेदकस्य धर्मस्य धर्मितावच्छेदकमुद्रया कस्याप्यभानात् । क्वचिच्च तदंशे सधर्मितावच्छेदककः यथा रक्तत्वदण्डत्वादिनानाधर्मावच्छिन्नविशेषणताको रक्तदण्डवानित्यादिबोधः, तत्र दण्डत्वादिरूपैकविशेषणतावच्छेदकस्य रक्तत्वादिरूपापरविशेषणतावच्छेदकधर्मितावच्छेदकमुद्रया भानात् । यत्र फलीभूतज्ञाने यं धर्मं धर्मितावच्छेदकीकृत्य विशेषणतावच्छेदकभानं तत्र तद्धर्मधर्मितावच्छेदककविशेषणतावच्छेदकप्रकारकज्ञानं हेतुः, एवं च तत्र दण्डत्वादिरूपधर्मितावच्छेदकताकरक्तत्वादिप्रकारकज्ञानत्वेन हेतुता, तज्जन्यतावच्छेदकं च दण्डत्वादिरूपधर्मितावच्छेदकविशिष्टविशेषणतापन्नरक्तत्वादिविशिष्टवैशिष्ट्यबुद्धित्वम्, तदर्थश्च दण्डत्वादिनिष्ठधर्मितावच्छेदकतानिरूपकरक्तत्वादिप्रकारतानिरूपिता या रक्तत्वावच्छिन्नप्रतियोगिताकत्वावच्छिन्नसंसर्गतानिरूपकप्रकारता तच्छालिबुद्धित्वम् । यत्र परस्परविशेषणविशेष्यतावच्छेदकभावानापन्नतुल्यकक्षरक्तत्वदण्डत्वाद्युभयविशिष्टदण्डादेर्वैशिष्ट्यं भासते यत्र वा दण्डत्वादिधर्मितावच्छेदकतापन्नरक्तत्वादिविशिष्टस्य वैशिष्ट्यम्भासते, तत्र व्यभिचारवारणाय दण्डत्वादिनिष्ठधर्मितावच्छेदकतानिरूपकत्वं रक्तत्वादिप्रकारताविशेषणमुपात्तम् । केवलं विशेष्ये विशेषणमिति रीत्या जायमाने रक्तदण्डवानित्यादिबोधे व्यभिचारवारणाय निरुक्तसंसर्गतानिरूपकत्वं रक्तत्वादिप्रकारतानिरूपितप्रकारताविशेषणमुपात्तम् । एवमनुयोगितावच्छेदकांशे सधर्मितावच्छेदककविशिष्टानुयोगिकवैशिष्ट्यबोधे सधर्मितावच्छेदककानुयोगितावच्छेदकप्रकारकज्ञानस्य हेतुता कल्पनीया । केवलं विशेष्ये विशेषणमित्यादिरीत्या यो रक्तदण्डवानित्यादिबोधस्तद्व्यावृत्तविशिष्टपर्याप्तप्रकारताविशेषस्य विशिष्टवैशिष्ट्यबोधस्वीकारपक्षे रक्तत्वादिप्रकारतानिरूपितदण्डत्वाद्यवच्छिन्नविशेष्यतयाऽवच्छिन्ना तदभिन्ना वा या दण्डत्वसाधारणप्रकारता तच्छालिबुद्धित्वम् । विशेषणतावच्छेदकतारूपविषयताविशेषस्य विशिष्टवैशिष्ट्यबोधीयस्य रक्तत्वादावभ्युपगमपक्षे तु दण्डत्वादिनिष्ठधर्मितावच्छेदकतानिरूपकरक्तत्वादिप्रकारतयाऽवच्छिन्ना तदभिन्ना वा या तादृशविलक्षणरक्तत्वादिप्रकारता तच्छालिबुद्धित्वमेव जन्यतावच्छेदकम् (१) । एवं च रक्तो दंडो मेय इत्यादिविशिष्टानुयोगिक-

(१) अभिन्ना वाऽवच्छेदकता तन्निरूपिका या विषयता तच्छालिबुद्धित्वमेव दण्डो रक्त इत्यादि निश्चयजन्यतावच्छेदकमिति मि० पु० पाठः ।

वैशिष्ट्यबोधसाधारण्यमपि उक्तजन्यतावच्छेदकतादृशरूपस्येति न तादृशबोधे कारणत्वान्तरं कल्प्यम्। दण्डो रक्तो नवेति संशयानंतरं रक्तदण्डवानित्यादिबोधस्यानुभवविरुद्धतया विशेषणतावच्छेदकांशे सधर्मितावच्छेदकविशिष्टवैशिष्ट्यबोधजनकतावच्छेदकगर्भे निर्णयत्वन्निवेश्यत इति दीधितिकारः। तन्मते दण्डादौ रक्तत्वादिरूपविशेषणसन्देहाधीनो रक्तदण्डवान्न वा पुरुष इति संशयः केवलं विशेष्ये विशेषणमिति रीत्यैव जायते, नतु रक्तत्वादिविशिष्टदण्डत्वावच्छिन्नवैशिष्ट्यावगाहीति न तदनुपपत्तिः।

अथ तद्धर्मविशिष्टप्रतियोगिप्रकारकाभावबुद्धौ तद्धर्मविशिष्टवैशिष्ट्यावगाहित्वनियमात्कथमभावांशे केवलं विशेष्ये विशेषणमिति रीत्या रक्तत्वादिविशिष्टदण्डादेः प्रतियोगितासम्बन्धेन प्रकारतया भानम्। न चाभावबुद्धेः किंचिद्धर्मविशिष्टप्रतियोगिकवैशिष्ट्यावगाहित्वमेव नियतं तच्च तत्राक्षतमेव तादृशबुद्धेर्दण्डत्वादिविशिष्टवैशिष्ट्यावगाहितायाः सत्वात्। न च प्रतियोगिविशेषणीभूतयावद्धर्मविशिष्टवैशिष्ट्यावगाहित्वमपि तथा, तथा च तस्या रक्तत्वादिविशिष्टदण्डत्वाद्यवच्छिन्नवैशिष्ट्यावगाहित्वविरहेऽपि न क्षतिरिति वाच्यम्। केवलं विशेष्ये विशेषणमित्यादिरीत्यापि यत्किञ्चिद्धर्मविशिष्टप्रतियोगिनोऽभावांशे विशेषणत्वोपगमे दण्डादिसामान्याभावबुद्धावपि उपलक्षणतया रक्तत्वादेः प्रतियोगिविशेषणतया भानापत्तिः, तथाचाभावांशे रक्तत्वाद्युपलक्षितदण्डत्वावच्छिन्नप्रतियोगिताकत्वावगाहिनो रक्तदण्डाभाववानित्याकारकस्य ज्ञानस्यापि दण्डवानित्यादिविशिष्टबुद्धिप्रतिबन्धकत्वान्तरकल्पनापत्तिः रक्तत्वादिनिर्विकल्पकदशायामपि रक्तदण्डो नास्तीत्यादिबुद्ध्यापत्तिश्चेति चेत्। सत्यम्, विशेषणसंदेहाधीनविशिष्टसंदेहे केवलं विशेष्ये विशेषणमित्यादिरीत्या रक्तत्वादिविशिष्टस्य प्रतियोगिनोऽभावांशे विशेषणतया न भानमुपेयते किन्तु तत्र मिथो विशेषणविशेष्यतावच्छेदकभावानापन्नदण्डत्वरक्तत्वाद्युभयविशिष्टप्रतियोगिनिरूपितवैशिष्ट्यमेवाभावांशे भासते, तादृशविशिष्टवैशिष्ट्यबोधस्य च विशषणतावच्छेदकांशे निर्द्धर्मितावच्छेदकतया न तत्र विशेषणतावच्छेदकप्रकारकनिर्णयापेक्षेति। नचैवं दण्डो रक्तो नेत्यादिबाधनिर्णयदशायामपि रक्तदण्डवान्नवेति संशयापत्तिः समानधर्मितावच्छेदककज्ञानस्यैव बाधादिप्रतिबध्यतया निरुक्तसमकक्षरक्तत्वदण्डत्वाद्युभयविशेषणविशिष्टदण्डादिवैशिष्ट्यबुद्धेस्तदप्रतिबध्यत्वादिति वाच्यम्। तथाविधरीत्या उभयविशेषणविशिष्टदंडादिसंशयस्य बाध-

निश्चयदशायामिष्टत्वात् । वस्तुतस्तु दण्डत्वसामानाधिकरण्येन रक्तत्वनिर्णयदशायामेव दण्डत्वावच्छेदेन रक्तत्वं तत्सामानाधिकरण्यमात्रेण च रक्तत्वाभावमवगाहमानात्संशयात् दण्डत्वसामानाधिकरण्येन रक्तत्वावगाहिरक्तदण्डवान्नवेति विशिष्टसंशय उत्पद्यते तथाविधनिर्णयस्य तादृशरक्तत्वाभावकोटिकसंशयाविरोधितया तयोरेकदा सत्त्वमविरुद्धम्, एवं च दण्डत्वावच्छेदेन रक्तत्वाभावकोटिकसंशयाधीनो रक्तदण्डवान्नवा पुरुष इत्याकारकसंशयोऽसिद्ध एव । एवं दण्डत्वावच्छेदेन रक्तत्वावगाही विशेषणसंदेहाधीनस्तथाविधसंशयोऽपि तथेत्येव साधीयः, दण्डत्वावच्छेदेन रक्तत्वनिर्णये पुरुषत्वावच्छेदेन रक्तदण्डवत्तानिर्णयस्यापि संभवात् । दण्डवान्पुरुष इत्येतादृशनिर्णयदशायां विशिष्टसंशयविरोधिविशेषदर्शनसमवधानसंभवान्न विशिष्टसंशयसंभव इति दण्डत्वावच्छेदेन रक्तत्ववत्तानिर्णयविरोधी रक्तत्वसंशयस्तत्र नोत्पद्यते इति बोध्यम् ।

यत्तु तादृशविशिष्टसंशये नोभयधर्मविशिष्टदण्डादिवैशिष्ट्यं भासते अपि तु केवलं रक्तत्वादिविशिष्टवैशिष्ट्यावगाहित्वमेव तस्येति । तदसत् । तथासति रक्तपटवान् पुरुष इत्यादिनिर्णयदशायामप्यनुभूयमानस्य दण्डधर्मिकरक्तत्वसंशयाहितपुरुषधर्मिकरक्तत्वविशिष्टदण्डसंशयस्यापलापापत्तेः शुद्धरक्तत्वावच्छिन्नप्रतियोगिताकाभावकोटिकसंशये रक्तपटवानित्यादिनिर्णयस्यापि विरोधित्वात् ।

केचित्तु तद्धर्मविशिष्टप्रतियोगिविशेषिताभावलौकिकप्रत्यक्षस्यैव तद्विशिष्टवैशिष्ट्यावगाहित्वनियमः, 'प्रतियोगिविशेषिताभावज्ञानं तु विशिष्टवैशिष्ट्यबोधमर्यादां नातिशेत' इति दीधितिग्रन्थोऽपि लौकिकप्रत्यक्षपर एव, एवं च विशेषणसंदेहाहितविशिष्टसन्देहे विशिष्टाभाव उपनीत एव भासते न तु तदंशे तस्य लौकिकत्वमुपेयते तत्संशयानन्तरं साक्षात्कारित्वरूपेण तद्विशेषिताभावावगाहिनोऽनुव्यवसायस्य केनाप्यनभ्युपगमात्, अतस्तत्र केवलं विशेष्ये विशेषणमिति रीत्यैव दण्डत्वादिविशिष्टप्रतियोग्यभावांशे भासत इति वदन्ति । तदपि न श्रद्धेयम्–तादृशसंशये रक्तत्वादेः प्रतियोग्यंशे उपलक्षणतया भानोपगमे तस्य शुद्धदण्डत्वावच्छिन्नप्रतियोगिताकत्वेनाभावावगाहितया शुद्धदण्डत्वादिना दण्डादिमत्तानिर्णयप्रतिबध्यतापत्तेः, रक्तत्वादिवत् दण्डत्वादेरप्युपलक्षणतया भानोपगमे रक्तदण्डवान् पुरुष इत्यादिनिर्णयस्यापि तदप्रतिबन्धकतापत्तेः, रक्तत्वादण्डत्वाद्युपलक्षितरक्तदण्डादिप्रतियोगिकत्वस्य रक्तदण्डाद्युभयाभावादिसाधारणतया तादृशप्रतियोगित्वावगाहिनोऽभाववत्ताज्ञानस्य रक्तदण्डत्वादिविशिष्टप्रतियोगिमत्तानिर्णयाप्रतिबध्यत्वात् । एवं प्रतियोगि-

कोटौ उपलक्षणविधया यदि कश्चिदभाव उपनीतज्ञाने भासते तदा धूमादिहेत्वंशे उपलक्षणतया पक्षधर्मत्वावगाहिनः पक्षधर्मधूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकं साध्यतावच्छेदकमित्याकारकस्य धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावावगाहिव्यापकतापरामर्शस्यानुमितिहेतुतासम्भवात्, यत्र पर्वतवृत्तिधूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नाभावः साध्यतावच्छेदके न गृहीतः अपि तु धूमसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपशुद्धधूमत्वावच्छिन्ननिरूपितव्यापकतावच्छेदकत्वमेव तत्रानुमित्यनुपपत्तिरूपदूषणेन दीधितिकृतां व्यापकतापरामर्शहेतुतावादिमतखण्डनस्यासङ्गत्यापत्तेश्चेत्यस्मदुक्तसमाधानमेव सम्यक्।

अथ विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुत्वे दण्डो रक्तो नवेति संशयानन्तरं रक्तदण्डं सन्देह्मीत्याकारकविशिष्टवैशिष्ट्यावगाहिसंशयानुव्यवसायानुपपत्तिः। न च तत्र विशेष्ये विशेषणमिति रीत्यैव रक्तदण्डत्वादिविशिष्टदण्डादि ज्ञानांशे विषयितासम्बन्धेन भासत इति वाच्यम्। तथासति निर्विकल्पकोपस्थितरक्तत्वादिना विशेषितं दण्डादिकं विषयीकृत्य रक्तदण्डज्ञानामीत्याकारकस्य ज्ञानानुव्यवसायस्योत्पादप्रसङ्गादित्याशङ्काप्युक्तरीत्यैव निरसनीया, अत्रापि तुल्यकक्षताद्रृशविशेषणद्वयविशिष्टवैशिष्ट्यावगाहित्वस्यैव ज्ञानांशे स्वीकारात्।

केचित्तु तादात्म्यसंबन्धेन दण्डत्वाद्यवच्छिन्नविशेष्यकरक्तत्वादिप्रकारकज्ञानस्य रक्तत्वादिविशेषितदण्डादिप्रकारतानिरूपितविशेष्यतासंबन्धेनानुव्यवसायं प्रति हेतुत्वकल्पनमावश्यकम्, अन्यथा यत्र दण्डो रक्त इत्याकारकप्रत्यक्षात्मकं विशेषणतावच्छेदकप्रकारकज्ञानं तदनन्तरं च दण्डांशे रक्तत्वाप्रकारकं दण्ड इत्याकारकं स्मरणं तदनन्तरं च रक्तदण्डं स्मरामीत्याकारकस्मरणानुव्यवसायस्य प्रसङ्गात्, एवं च केवलं विशेष्ये विशेषणमितिरीत्या रक्तत्वादिविशेषितदण्डादिविशेषणकज्ञानभानोपगमेऽपि रक्तत्वादिनिर्विकल्पकस्थले दर्शितातिप्रसङ्गाभाव इत्याहुः।

परे तु दण्डादिधर्मिकरक्तत्वादिप्रकारकज्ञानस्य रक्तत्वादिविशेषितदण्डादिविषयकत्वेनानुव्यवसाये न भानम्, धर्मिणो विशेषणवत्ताया अनुव्यवसायेन ग्रहणे प्रामाण्यस्य स्वतोग्राह्यतापत्तेरिति रक्तत्वेन दण्डं सन्देह्मीत्याद्याकारकज्ञानांशे प्रकारतासम्बन्धेन रक्तत्वप्रकारक एव तादृशज्ञा नाऽनुव्यवसाय इति प्राहुः।

अथ रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यबोधे दण्डत्वाद्यवच्छिन्नध-

र्मिकरक्तत्वादिप्रकारकज्ञानत्वेनैव हेतुताऽस्तु किं गुरुशरीरनिर्णयत्वनिवेशेन, दण्डो रक्तो नवेति संशयानन्तरं रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिज्ञानानुत्पादस्य विवादग्रस्तत्वात् इति चेत्। न, संशयसाधारणज्ञानस्य विशिष्टवैशिष्ट्यबोधहेतुत्ववादिनाऽप्रामाण्यशङ्कास्कन्दितज्ञानादपि विशिष्टवैशिष्ट्यबोधोत्पादः स्वीकरणीयः अप्रामाण्यशङ्कास्कन्दितज्ञानस्य संशयसमशीलतया निर्णयं प्रत्येव समर्थत्वात्(१),अतोऽप्रामाण्यनिर्णयत्वावच्छिन्नाभावविशिष्टविशेषणतावच्छेदकप्रकारकज्ञानत्वेनैव हेतुतोपगन्तव्येति विशेषणतावच्छेदकप्रकारकनिश्चयत्वापेक्षया गुरुशरीरस्यतदीयाप्रामाण्यनिर्णयानास्कन्दितत्वस्य निवेशनीयतया गौरवम्,निर्णयमात्रस्य हेतुतावादिमतेऽप्रामाण्यज्ञानास्कन्दितनिश्चयादपि फलानुदयात् तन्मतेऽप्रामाण्यज्ञानत्वावच्छिन्नाभावस्यैव जनकतावच्छेदकत्वे लाघवमिति फलितम्। न च तन्मतेऽप्रामाण्यज्ञानत्वावच्छिन्नाभावस्यैवाखण्डस्य तत्तद्व्यक्तित्वेनैव जनकतावच्छेदकत्वमुपगन्तव्यमिति नाप्रामाण्यनिश्चयत्वनिवेश इति वाच्यम्। अभावस्य तत्तद्व्यक्तित्वेन जनकत्वतदवच्छेदकत्वयोः सिद्धान्तविरुद्धत्वात्, तथासति अप्रामाण्यनिश्चयघटाद्यन्यतरत्वावच्छिन्नप्रतियोगिताकानामखण्डाभावव्यक्तीनामपि(२) तत्तद्व्यक्तित्वेन निवेशे विनिगमनाविरहप्रसङ्गात्। एवं विशिष्टवैशिष्ट्यबोधं प्रति निर्णयत्वेन हेतुत्वे रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षं प्रति तादृशप्रत्यक्षेच्छाविरहविशिष्टाया रक्तत्वाभावादिसाध्यकदण्डादिपक्षकानुमितिसामग्र्यास्तथाविधानुमित्यादिकं प्रति तथाविधानुमितीच्छा(३)विरहविशिष्टतथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्र्याश्च प्रतिबन्धकत्वाकल्पनेन लाघवं,तथाविधविशिष्टवैशिष्ट्यबोधजनकनिर्णयस्य विपरीतनिर्णयविधया तादृशानुमित्यादिप्रतिबन्धकतया तादृशसामग्र्याः संवलनस्यैवासम्भवात्(४)। संशयसाधारणज्ञानस्य हेतुतावादिमते च संशयघटितविशिष्टवैशिष्ट्यबोधजनकसामग्र्या सह तादृशानुमित्यादिसामग्र्यास्संवलनं सम्भवतीति (५)तादृशप्रतिबन्धकताकल्पनमावश्यकमेवेति गौरवम्।

अत्र केचित्। रक्तारक्तदण्डवान्पुरुष इत्याकारको विशेषणधर्मिकसं-

(१) कार्यं प्रति समर्थत्वात् इति मि० पु० पाठः।

(२) अनन्तव्यक्तीनामपीति मि० पु० पाठः।

(३) तद्गोचरेच्छेति मि० पु० पाठः।

(४) सामग्र्याः प्रतिबन्धकत्वाकल्पनादिति मि० पु० पाठः।

(५) सामग्र्यास्तादृशानुमित्यादिसामग्र्याश्च संवलनसम्भवादिति मि० पु० पाठः।

शयोऽनुभवविरुद्धः सर्वत्र संशये धर्मिणो मुख्यविशेष्यतयैवानुभवात्, एवं च निश्चयस्य संशयविरोधितया विशिष्टस्य वैशिष्ट्यमितिरीत्या तादृशसंशयापत्त्यसम्भवेऽपि रक्तत्व तदभावादीनां स्वतन्त्रोपस्थितिदशायां विशेष्ये विशेषणमिति रीत्या तादृशसंशयापत्तिरस्त्येवेति विशेष्ये विशेषणमिति रीत्या रक्तत्वविशिष्टदण्डादिप्रकारकबोधे दण्डादिधर्मिकरक्तत्वादिप्रकारकसंशयस्य प्रतिबन्धकत्वं स्वीकरणीयम्, तदभावस्य कार्यसहभावेन हेतुत्वात्पूर्वक्षणे तत्सत्त्वेपि(१)कार्यकालेऽसत्त्वान्न तथाविधसंशयापत्तिः, इत्थं च तादृशसंशयप्रतिबध्यतावच्छेदकरक्तत्वादिप्रकारतानिरूपितदण्डत्वाद्यवच्छिन्नविशेष्यतापन्ननिष्ठप्रकारताशालित्वस्य रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यबोधसाधारणतया संशयानन्तरं तथाविधविशिष्टवैशिष्ट्यबोधापत्त्यसम्भवात् तज्जनकतावच्छेदके निर्णयत्वस्यानिवेशेपि न क्षतिः ।

अथ यत्र दण्डो रक्तो नवा इति संशयानन्तरं द्वितीयक्षणे दण्डो रक्त इत्याकारकस्मरणात्मकनिश्चयस्तद्द्वितीयक्षणे विशिष्टवैशिष्ट्यविषयताशालिरक्तदण्डवानितिज्ञानोपपत्तये विशिष्टवैशिष्ट्यानवगाहित्वमवश्यं तादृशप्रतिबध्यतावच्छेदककोटौ निवेशनीयमिति कथं तादृशसंशयप्रतिबध्यतावच्छेदकस्य विशिष्टवैशिष्ट्यबोधसाधारण्यम् । न च विशिष्टवैशिष्ट्यानवगाहित्वस्य संशयाभावजन्यतावच्छेदकत्वे विशिष्टवैशिष्ट्यबोधोत्पत्तिदशायां संशयाभावरूपकारणवशाद्विशिष्टवैशिष्ट्यानवगाहिज्ञानत्वावच्छिन्नापत्तिरिति संशयप्रतिबन्धकतायां निश्चयमुत्तेजकीकृत्यैव दर्शितस्थले रक्तदण्डवानितिज्ञानोत्पाद इति वाच्यम् । संशयप्रतिबन्धकतायां निर्णयस्योत्तेजकत्वे निश्चयाभावविशिष्टसंशयस्य तद्विशिष्टस्य तादृशाभावस्य वा प्रतिबन्धकत्वे विनिगमकविरहेण प्रतिबन्धकताबाहुल्यस्यावच्छेदकगौरवस्य च प्रसङ्गात् संशयप्रतिबध्यतावच्छेदके विशिष्टवैशिष्ट्यानवगाहित्वनिवेशस्य तदवच्छिन्नं प्रति निर्णयत्वेन प्रतिबन्धकत्वस्य च स्वीकारात् ।

वस्तुतो विशिष्टवैशिष्ट्यानवगाहित्वं न संशयप्रतिबध्यतावच्छेदकमुच्यते किन्तु रक्तत्वविशिष्टप्रतियोगिताकत्वानवच्छिन्नसंसर्गतानिरूपकीभूता या रक्तत्वप्रकारतानिरूपितदण्डत्वाद्यवच्छिन्नविशेष्यतापन्नवृत्तिप्रकारता तच्छालित्वं, संशयानन्तरोत्पन्ननिश्चयद्वितीयक्षणोत्पन्नरक्तदण्डवानिति बोधे च न तथाविधदण्डप्रकारतेति न तदनुपपत्तिः । संशयशून्यकालीनविशिष्टवैशिष्ट्यबोधे च रक्तत्वादिविशिष्टप्रतियोगिकत्वावच्छिन्ना तदनवच्छिन्ना च संयोगनिष्ठसंसर्गता स्वीक्रियते द्विविध-

(१) रक्तत्वतदभावकोटिकसंशयसत्त्वेपीति मि० पु० पाठः ।

सांसर्गिकविषयताया विरुद्धत्वे मानाभावात् । विशिष्टवैशिष्ट्यबोधे विशेषणीयप्रकारतायाः विशेषणान्तरविशिष्टतत्तद्विशिष्टपर्याप्ततया विशेषणान्तरावच्छिन्नतया वा वैलक्षण्यमते रक्तत्वादिनिरूपितविशेष्यतयाऽवच्छिन्नातद्भिन्ना वा रक्तत्वावृत्ती रक्तत्वानवच्छिन्ना वा या प्रकारता सा संशयप्रतिबध्यतावच्छेदके निवेशनीया न तु तत्तद्विशेषणसंसर्गताविशेषनिरूपकत्वमपि, संशयानुत्तरबोधे च द्विविधप्रकारता स्वीक्रियते अविरोधात्, तथाच निरुक्तसंशयाभावजन्यतावच्छेदकावच्छिन्नोत्पत्तिस्तत्र इष्टैवेति न दोष इति चेन्न ।

संशयानन्तरनिश्चयोत्पत्तिस्थले तद्वद्वितीयक्षणे संशयविनाशे तृतीयक्षण एव रक्तदण्डवानितिबोधः स्वीक्रियते क्षणैकापलापे क्षतिविरहात्, तथाच विशिष्टवैशिष्ट्यबोधत्वव्यापकस्याविशेषितरक्तत्वप्रकारतानिरूपितदण्डत्वाद्यवच्छिन्नप्रकारताशालिज्ञानत्वस्यैव संशयप्रतिबध्यतावच्छेदकत्वसम्भवात्संशयप्रतिबन्धकतायामप्रामाण्यज्ञानाभावो न निवेशनीयः, अप्रामाण्यज्ञानास्कन्दितसंशयस्थलेऽपि तादृशसंशयनाशानन्तरमेव रक्तदण्डवानिति बोधोपगमात्, अतोऽप्रामाण्यग्रहदशायां न रक्तारक्तदण्डवानित्याकारकज्ञानापत्तिः, न वा रक्तत्वाभावांशेऽप्रामाण्यग्रहास्कन्दितसंशयाद्रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यबोधानुपपत्तिः ।

यत्तु–संशयस्य विशेष्ये विशेषणमितिरीत्या बोधे रक्तत्वप्रकारकदण्डत्वाद्यवच्छिन्नविशेष्यकज्ञानत्वेनैव प्रतिबन्धकता न तु रक्तत्वतदभावोभयप्रकारकदण्डत्वावच्छिन्नविशेष्यकज्ञानत्वरूपसंशयत्वेन दण्डत्वावच्छिन्नविशेष्यकरक्तत्वाभावप्रकारकज्ञानत्वेन वा गौरवात्, तथाच विशिष्टवैशिष्ट्यबोधव्यावृत्तधर्मोऽवश्यं प्रतिबध्यतावच्छेदको वाच्यः, अन्यथा विशिष्टवैशिष्ट्यबोधविलयप्रसङ्गात्—इति ।

तदसत्, रक्तत्वप्रकारकज्ञानत्वेन प्रतिबन्धकत्वे रक्तदण्डवानित्येतादृशज्ञानोत्पत्तिकाले तदवच्छिन्नाभावासत्त्वेन तदभावस्य कार्यसहभावेन हेतुत्वासम्भवात् रक्तारक्तदण्डवानित्येतादृशज्ञानस्य दुर्वारत्वात् । अथ रक्तारक्तदण्डवानित्येतादृशज्ञानानुत्पादस्य विवादग्रस्ततया संशयप्रतिबन्धकत्वमेवासिद्धमिति चेन्न । दण्डो रक्तो नवेतिसंशयस्य रक्तदण्डवानित्येतादृशज्ञानप्रतिबन्धकत्वे दण्डपक्षकरक्तत्वाभावहेतुकानुमितिरक्तत्वाभावविशिष्टदण्डपक्षकानुमित्यादिसामग्र्या रक्तदण्डवानित्यादिलौकिकप्रत्यक्षे प्रतिबन्धकत्वाकल्पनात् लाघवादेव तत्सिद्धेः संशयस्य दण्डत्वावच्छिन्नधर्मिकरक्तत्वाभावप्रकारकज्ञानत्वेनैव प्रतिबन्धकत्वोपगमात् तादृशसाम-

ग्रीकाले तथाविधज्ञानत्वावच्छिन्नसत्ताया आवश्यकत्वात् तादृशप्रतिबध्यप्रतिबन्धकभावकल्पने तादृशसामग्रीप्रतिबन्धकताया अफलत्वात् । यत्र च भिन्नेन्द्रियादिजन्यं दण्डो न रक्त इत्याकारकनिर्णयात्मकज्ञानं तत्र तन्नाश एव रक्तत्वांशे लौकिकमपि रक्तदण्डवानितिज्ञानं स्वीक्रियतेऽतो नोक्तरूपेण प्रतिबन्धकत्वानुपपत्तिरिति वदन्ति ।

अत्रोच्यते । रक्तदण्डवानित्येतादृशज्ञानं प्रति उक्तसंशयस्य प्रतिबन्धकत्वे भिन्नविषयकानुमित्यादिकं प्रति तादृशप्रत्यक्षेच्छाविशिष्टप्रत्यक्षसामग्रीप्रतिबन्धकतायां तथाविधसंशयाभावनिवेशाधिक्यात् गौरवम् , तादृशसंशयस्य दर्शितबाधसाधारणरूपेणाभावनिवेशे दण्डो न रक्त इत्येतादृशबाधाभावस्य तत्रानिवेशाल्लाघवमिति तु न सम्भवदुक्तिकम् , इच्छाकाले बाधसत्त्वेऽपि आहार्यप्रत्यक्षोत्पत्त्या इच्छाविशिष्टप्रत्यक्षसामग्रीप्रतिबन्धकतायां बाधाभावस्य ममाप्यनिवेशनीयत्वात् । यदि च बाधबुद्धाविव संशयेऽपि इच्छाया उत्तेजकत्वं स्वीक्रियते तदेच्छाकालीनसंशयाद्विशिष्टवैशिष्ट्यबोधापत्तिरिति तन्निर्णयत्वेन हेतुत्वमावश्यकमेव, एवमितरांशे विशेषणतापन्नस्यापि संशयधर्मितया भानं भवत्येव, अन्यथा पक्षेस । ध्यसन्देहदशायामनुमित्युपपादनाय संशयसाधारणव्यभिचारज्ञानप्रतिबन्धकतायां प्राचां साध्याभावांशे निश्चयत्वनिवेशनस्यासङ्गत्यापत्तेः, व्यभिचारज्ञानस्याधेयत्वांशे विशेषणतापन्नेऽधिकरणे साध्याभावसंशयायोगादिति रक्तारक्तदण्डवानितिबोधवारणाय संशयप्रतिबन्धकत्वमयुक्तमेव । यदि च—रक्तारक्तदण्डवानित्यादिबोधवारणाय माभूत्संशयः प्रतिबन्धकः, तदाप्युक्तसामग्रीप्रतिबन्धकत्वाकल्पनप्रयुक्तलाघवानुरोधेन संशयस्य प्रतिबन्धकत्वं कल्प्यमेव। यच्चोक्तं संशयप्रतिबन्धकतामते इच्छाविशिष्टरक्तदण्डवानित्यादिप्रत्यक्षसामग्रीप्रतिबंधकतायां संशयाभावनिवेशाधिक्यात् गौरवमिति, तदप्यकिंचित्करम् , सिद्ध्यभावबाधाभावतदभावव्याप्यवत्ताज्ञानाभावादिरूपबहुतरकारणघटितोक्तानुमितिसामग्र्या रक्तदण्डवानित्येतादृशप्रत्यक्षप्रतिबन्धकत्वाधिक्यापेक्षया इच्छाविशिष्टतादृशप्रत्यक्षसामग्र्यां संशयाभावनिवेशस्यैवोचितत्वात्-इति विभाव्यते,तदापि व्याप्त्यादिरूपातीन्द्रियधर्मविशिष्टविशेषणकबोधे तादृशसंशयस्य प्रतिबन्धकत्वं निर्युक्तिकमेव विशेषणधर्मिकतादृशधर्माभावप्रकारकज्ञाननियतानुमितिसामग्रीकाले तादृशधर्मविशिष्टवैशिष्ट्यावगाहिज्ञानप्रतिबन्धकबाधसत्ताया आवश्यकत्वात् तत एव तथाविधप्रत्यक्षवारणसम्भवात् , तत्र केनापि तादृशसामग्रीप्रतिबन्धकत्वाकल्पनात् अतीन्द्रियधर्मप्रकारकलौकिकप्रत्यक्षं न सम्भवत्येव, येन भिन्नेन्द्रियादिजन्यतदभावप्रकारकज्ञान-

घटितोक्तसामग्रीकाले तदापत्तिः स्यादिति तादृशस्थलीयविशिष्टवैशिष्ट्यबोधे निश्चयत्वेन हेतुत्वमावश्यकमेव, तावतैवानुमितिलक्षणस्य विशिष्टवैशिष्ट्यबोधातिव्याप्तिशङ्का दीधितिकृतः संगच्छते । न च व्याप्त्यादिविशिष्टधूमादिविशेषणकबोधे धूमादिधर्मिकव्याप्त्यादिसंशयस्य तद्धर्मिकतदभावप्रकारकज्ञानत्वेन प्रतिबन्धकत्वे व्याप्त्यभावप्रकारकधूमादिविशेष्यकशाब्दबोधसामग्र्यास्तादृशप्रत्यक्षप्रतिबन्धकत्वाकल्पनेन लाघवम्, तादृशशाब्दबोधसामग्रीकाले तादृशाभावप्रकारकतद्विशेष्यकयोग्यताज्ञानस्यावश्यकत्वात्,भवतान्तु तत्र तादृशसामग्रीप्रतिबन्धकत्वकल्पनमावश्यकम्, अन्यथा संशयात्मकयोग्यताज्ञानघटिततादृशशाब्दसामग्रीकाले तथाविधप्रत्यक्षस्य दुर्वारत्वादिति वाच्यम् । शाब्दबोधं प्रति योग्यताज्ञानहेतुताया निर्युक्तिकत्वात् तादृशशाब्दसामग्रीप्रतिबन्धकताया मतद्वय एवावश्यकत्वात् । योग्यताज्ञानहेतुतामते तु रक्तत्वादिविशेषितदण्डादिविशेषणकबोधे रक्तत्वादिसंशयस्य न प्रतिबन्धकत्वं खले कपोतन्यायेन तादृशशाब्दबोधे दण्डो रक्तो नवेति योग्यतासंशयस्य हेतुत्वात् प्रत्यक्षस्वस्य प्रतिबध्यतावच्छेदकत्वेऽपि न कार्यसहभावेन तत्प्रतिबन्धकत्वसम्भवः । रक्तत्वांशे संशयाकारतद्विशेषितदण्डादिसंशयस्य योग्यताज्ञानविधया तादृशाब्दबोधहेतुताया आवश्यकत्वात् दण्डे रक्तत्वनिर्णयस्य प्रागसत्त्वेऽपि तादृशशाब्दबोधस्य सर्वानुभवसिद्धत्वात् । न च दण्डो रक्तो नवा पुरुषो दण्डी नवेतिसंशयद्वयात समूहालम्बनरूपैकसंशयाद्वा तादृशशाब्दबोधो भविष्यतीति वाच्यम् । रक्तदण्डाभाववानित्यादिनिश्चयकाले तथाविधसंशयस्य रक्तो दण्डः पुरुषो दण्डीति निर्णयस्य च सम्भवेन तदानीं तादृशशाब्दबोधातिप्रसङ्गवारणाय तत्र पुरुषविशेषणतापन्नदण्डांशे रक्तत्वादिप्रकारस्य समूहालम्बनविलक्षणयोग्यताज्ञानस्य हेतुताया आवश्यकत्वात् ।

वस्तुतस्तु दण्डत्वधूमत्वाद्यवच्छिन्नधर्मिकरक्तत्वाभावव्याप्त्यभावादिप्रकारकज्ञाननियतानुमितिशाब्दबोधसामग्रीकाले रक्तत्वादिव्याप्त्यादिविशिष्टद्रव्यत्वावच्छिन्नविशेषणकप्रत्यक्षवारणाय तत्र तादृशसामग्रीणां प्रतिबन्धकतायाः सर्वैरेव कल्पनीयतया तत्रैव प्रतिबध्यतावच्छेदके विशिष्य रक्तत्वव्याप्त्यादिधर्मितावच्छेदकधर्मानिवेश्य सामान्यतः प्रतिबध्यप्रतिबन्धकभावकल्पनेनैवोपपत्तेः रक्तदण्डवान्वह्निव्याप्यधूमवानित्यादिप्रत्यक्षे तादृशसामग्रीप्रतिबन्धकताधिक्यमस्माकमपि । न च रक्तत्वविशिष्टद्रव्यत्वावच्छिन्नप्रकारताकप्रत्यक्षं जायतामित्येतादृशेच्छाकालेऽसत्यां तादृशप्रत्यक्षसामग्र्यामुक्तसामग्रीकाले रक्तदण्डवानित्यादिप्रत्यक्षवारणाय इच्छा-

विशेषान् विशिष्योत्तअङ्गीकृत्य द्रव्यत्वदण्डत्वादिरूपधर्मितावच्छेदकभेदेन भिन्नभिन्नप्रतिबन्धकताकल्पनमावश्यकमिति वाच्यम्। उक्तसामग्रीविशिष्टस्य स्वीयप्रत्यक्षनिष्ठविशेष्यतानिरूपिता या रक्तत्वप्रकारतानिरूपितप्रकारता तन्निरूपितावच्छिन्नत्वनिष्ठावच्छेदकतावच्छेदकत्वरूपद्रव्यत्वादिनिष्ठसम्बन्धावच्छिन्नप्रतियोगिताकेच्छाभावस्य रक्तत्वधर्मितावच्छेदकधर्मनिष्ठप्रत्यासत्त्या रक्तत्वविशिष्टप्रकारकबोधम्प्रतिताद्वशधर्मान् विशिष्यानिवेश्यैव प्रतिबन्धकताकल्पनात्।

यत्तु–माभूद्विशेष्ये विशेषणमिति रीत्या बोधम्प्रति संशयः प्रतिबन्धकः तथापि रक्तदण्डवानित्यादिबोधम्प्रति दण्डत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वाद्यभावप्रकारताशालिज्ञानत्वेन दण्डो रक्तो नवेतिसंशयस्य प्रतिबन्धकता कल्प्तेय, ताद्वशरक्तत्वाभावप्रकारताशून्यतथाविधरक्तत्वप्रकारताशालिज्ञानत्वरूपनिर्णयत्वेन हेतुत्वे ताद्वशप्रकारताशून्यत्वताद्वशप्रकारताशालित्वज्ञानत्वानां त्रयाणां विशेषणविशेष्यभावे विनिगमनाविरहेण षट्कारणताकल्पनापत्तेः, अस्मन्मते रक्तत्वाभावप्रकारताशालित्वज्ञानत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण संशयाभावस्य कारणताद्वयम्, रक्तत्वप्रकारताशालित्वज्ञानत्वयोस्तथात्वेऽपि विनिगमनाविरहाद्दण्डो रक्त इत्येताद्वशज्ञानस्य कारणताद्वयमिति चतुष्टयमात्रकल्पनात्। अथ रक्तत्वाभावप्रकारकज्ञानस्यात्मनिष्ठप्रत्यासत्त्या प्रतिबन्धकत्वे कायव्यूहस्थले एकस्मिन्नेवात्मनि शरीरान्तरावच्छेदेन दण्डो रक्तो नवेति संशयसत्त्वेऽपि(१)शरीरान्तरावच्छेदेन रक्तदण्डवानितिबोधोत्पत्त्या व्यभिचार इति तत्तच्छरीरनिष्ठप्रत्यासत्त्या तथात्वे च परपुरप्रवेशस्थले तच्छरीरावच्छेदेनाभिभाव्यसंशयसम्बन्धेऽपि तदवच्छेदेनाभिभावकस्यात्मनि विशिष्टवैशिष्ट्यबोधोत्पत्त्या व्यभिचार इति तच्छरीरावच्छिन्नत्वं निवेश्यात्मनिष्ठ(२)प्रत्यासत्त्या तस्य प्रतिबन्धकता वाच्येति अनन्तशरीरभेदेन प्रतिबन्धकताभेदाद्गौरवम्, मन्मते समवायावच्छेदकत्वघटितसामानाधिकरण्योभयसम्बन्धेन रक्तत्वप्रकारकज्ञानहेतुतायां ताद्वशाभावप्रकारताशून्यत्वनिवेशाद्विनिगमनाविरहेण तस्य कतिपयकारणतावृद्धावपि लाघवस्यानपायात्, विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां शरीरविशेषावच्छिन्नत्वानिवेशे कायव्यूहवत्यात्मनि एकशरीरावच्छेदेन ताद्वशज्ञानसत्त्वे तदीयान्यशरीरावच्छेदेनाभिभावकान्तरे ताद्वशज्ञानासत्त्वे च ताद्वशशरीरावच्छेदेन तदात्मनि विशिष्टवैशिष्ट्यबोधापत्तेः प्रागुक्तदिशा वारणासम्भवेन तत्र

(१) दण्डत्वावच्छिन्नविशेष्यकरक्तत्वाभावप्रकारकज्ञानसत्त्वेपीति मि० पु० पाठः।
(२) तत्तच्छरीरावच्छिन्नत्वं निवेश्यात्मनिष्ठेति मि० पु० पाठः।

तन्निवेशादिति चेन्न । अस्तु संशयप्रतिबन्धकतायां शरीरविशेषावच्छिन्नत्वनिवेशात्तद्भेदेन भेदः । तथाप्येतन्मतापेक्षया संशयभेदस्य कारणतावच्छेदकत्वमते रक्तदण्डवान् रक्तदण्डवत्पुरुषवान् रक्तदण्डिमद् भूतलमित्याद्यनन्तविधविशिष्टवैशिष्ट्यबोधहेतुतावच्छेदककोटौ रक्तत्वाद्यभावप्रकारकैकविधसंशयभेदस्य निवेशनीयतया भवन्मते गौरवं रक्तदण्डवत्पुरुषवानित्यादिबोधजनकतायान्तदनिवेशे रक्तत्वांशे संशयात्मकदण्डाद्यंशे निर्णयात्मकरक्तत्वविशिष्टदण्डादिप्रकारकज्ञानात्तथाविधविशिष्टवैशिष्ट्यबोधापत्तेः । विशेषणतावच्छेदकतावच्छेदकाद्यंशेऽपि निर्णयात्मकादेव ज्ञानात्तदवच्छिन्नविशेषणतावच्छेदकताकविशिष्टवैशिष्ट्यबोधोत्पत्त्या तत्रेष्टापत्तेरयोगात् । अत एवानुमितिजनकतायामिव वह्निव्याप्यधूमवत्पर्वतवानित्यादिविशिष्टवैशिष्ट्यबोधजनकतायामपि व्याप्त्यंशे निश्चयत्वनिवेशात्तत्रानुमितिलक्षणातिव्याप्तिराशङ्किता(१) दीधितिकारेण । नच रक्तत्वप्रकारकनिर्णयजन्यतावच्छेदकीभूतरक्तदण्डवानित्येतादृशबोधनिष्ठरक्तत्वविशिष्टवैशिष्ट्यावगाहिज्ञानत्वस्य रक्तत्वविशिष्टदण्डविशिष्टपुरुषवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नतादृशयावद्विशिष्टवैशिष्ट्यबोधसाधारणतया रक्तत्वांशे संशयात्मकज्ञानसत्त्वे न तादृशविशिष्टवैशिष्ट्यबोधापत्तिरुक्तकारणविरहादिति वाच्यम् । रक्तत्वविशिष्टवैशिष्ट्यावगाहित्वस्य रक्तदण्डवत्पुरुषवानित्यादिबोधत्वव्यापकत्वेऽपि यत्र रक्तत्वांशे संशयात्मकरक्तारक्तदण्डवान् पुरुष इत्यादिज्ञानोत्तरं रक्तो दण्ड इति स्मरणात्मकनिश्चयस्तदुत्तरं तथाविधबोधापत्तेर्दुर्वारत्वात् , अस्मन्मते तु तथाविधसकलबोधसाधारणरक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नं प्रति तथाविधसंशयस्यैकप्रतिबध्यप्रतिबन्धकभावेनैवोपपत्तिरिति । न च रक्तदण्डवत्पुरुषवानित्यादिबोधे रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिज्ञानत्वेनैव हेतुता रक्तत्वांशे संशयात्मकज्ञानस्य न रक्तत्वविशिष्टदण्डादिवैशिष्ट्यावगाहिज्ञानत्वमिति न तदंशे निश्चयत्वनिवेशनं कस्यापि सम्भवतीति वाच्यम् । संशयस्याप्रतिबन्धकतामते दण्डो रक्त इति निर्णयानन्तरमिच्छाबलाद्दण्डे रक्तत्वाभावावगाहिनो रक्तत्वांशे संशयात्मकरक्तदण्डवत्ताज्ञानस्य रक्तत्वविशिष्टदण्डादिवैशिष्ट्यावगाहित्वे बाधकाभावात् । वस्तुतस्तु कायव्यूहस्थले एकस्मिन्नात्मनि एकशरीरावच्छेदेन संशयसत्त्वे शरीरान्तरावच्छेदेन विशिष्टवैशिष्ट्यबोधोत्पत्तावपि प्रमाणाभावात् शरीरविशेषावच्छिन्नत्वमनन्तर्भाव्यैवात्मनिष्ठप्रत्यासत्त्या संशयस्य प्रतिबन्धकत्वं कल्पनीयमिति न संशयस्य

(१) शंका निराकृतेति मि० पु०.पाठः ।

प्रतिबन्धकतामते उक्तगौरवावकाश—इति ।

तदपि न युक्तम्। विशिष्टवैशिष्ट्यबोधं प्रति संशयस्य प्रतिबन्धकत्वे-भिन्नविषयकानुमित्यादिकं प्रति विशिष्टवैशिष्ट्यबोधात्मकप्रत्यक्षेच्छाविशिष्टतादृशप्रत्यक्षसामग्रीप्रतिबन्धकतायां विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावस्य निवेशनीयतया तस्य कारणान्तरेणेच्छया च समं विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबन्धकताबाहुल्यप्रसङ्गात्, निश्चयत्वेन हेतुतामते सामग्रीघटकतत्प्रकारकज्ञाने विशेषणतया निविष्टस्य तदभावाप्रकारकत्वस्यान्यत्र विशेषणतया निवेशासम्भवात् । संशयस्य प्रतिबन्धकतामते निर्णयत्वावच्छिन्नस्य सामग्रीप्रतिबन्धकतायां निवेशे संशयानन्तरं निश्चयद्वितीयक्षणे तन्मतसिद्धानुमित्यादेरनुपपत्तिः । न च संशयनिर्णयेच्छानां युगपदवस्थानासम्भवेन संशयदशायामिच्छाविशिष्टविशेषणतावच्छेदकप्रकारकनिर्णयसमवधानमेव न सम्भवति इति नेयमनुपपत्तिः, अपेक्षाबुद्धेः क्षणत्रयावस्थायित्वमते अपेक्षाबुद्धिद्वितीयक्षणे तत्समानाधिकरणविशेषगुणानुत्पत्तेः, संशयस्यापेक्षाबुद्ध्यात्मकत्वेऽपि च तेषां युगपदवस्थानस्य दुरुपपादत्वमिति वाच्यम् । ज्ञानेच्छयोर्युगपदुत्पादस्य नवीनैरुपगमात् निर्णयेच्छयोर्युगपदुत्पादस्थले एव तादृशानुपपत्तिसत्त्वात् । एवं संशयस्य प्रतिबन्धकतामते दण्डत्वसामानाधिकरण्येन रक्तत्वावगाहिनि विशिष्टवैशिष्ट्यबोधे दण्डत्वसामानाधिकरण्येन रक्तत्वाभावावगाहिज्ञानत्वेन प्रतिबन्धकत्वे सामाधिकरण्यमात्रेण कोटिद्वयावगाहिनिर्णयात्तादृशविशिष्टवैशिष्ट्यबोधानुपपत्तिः, दण्डत्वावच्छेदेन तदभावावगाहिज्ञानत्वेन प्रतिबन्धकत्वे दण्डत्वसामानाधिकरण्येन रक्तत्वाभावं तदवच्छेदेन रक्तत्वमवगाहमानात्संशयादपि तथाविधविशिष्टवैशिष्ट्यबोधापत्तिः, रक्तत्वांशे दण्डत्वसामानाधिकरण्यमात्रावगाहिनि विशिष्टवैशिष्ट्यावगाहिबोधे तादृशज्ञानत्वेन हेतुत्वे फलीभूतज्ञाने दण्डत्वावच्छेदेन रक्तत्वभानप्रतिबन्धकदोषसमवहिताद्दण्डत्वावच्छेदेन रक्तत्वनिर्णयात् रक्तत्वे दण्डत्वसामानाधिकरण्यमात्रावगाहिविशिष्टवैशिष्ट्यबोधानुपपत्त्या तत्कल्पनेन तादृशापत्तिवारणासम्भवात्, अस्मन्मते च स्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकोभूतप्रकारताशून्यत्वविशिष्टस्वनिरूपकत्वसम्बन्धेन रक्तत्वप्रकारतावज्ज्ञानत्वरूपनिर्णयत्वस्य दर्शितनिर्णयसाधारणस्य दर्शितसंशयव्यावृत्तस्य जनकतावच्छेदकत्वोपगमात् नानुपपत्तिलेशोऽपीत्यपि वदन्ति ।

अत्र चानुद्बुद्धसंस्काराद्विशिष्टवैशिष्ट्यावगाह्यनुभववारणाय का-



रणतावच्छेदककोटौ ज्ञानत्वनिवेशनं, तथा च सत्यन्तरा विशेषणतावच्छेदकप्रकारकस्मरणमभ्युपगम्यैव विशिष्टवैशिष्ट्यावगाहिसंस्कारात् स्मरणात्मकतादृशबोधः स्वीकरणीयः, विशिष्टविषयोपहितव्यक्तिसाक्षात्कारपूर्वं च नियमतो विशिष्टविषयस्य स्मरणं कल्पनीयम् , संस्कारव्यावृत्तसविषयकव्यक्तिवृत्तिजातिविशेष एव वा कारणतावच्छेदकतया उपगन्तव्यः। तथाच कार्यतावच्छेदकेऽपि ज्ञानत्वन्न निवेशनीयं, विशिष्टप्रकारककृतौ च विशेष्ये विशेषणमितिरीत्या विषयत्वं स्वीकरणीयम् , ईश्वरज्ञाने च तदेव विषयत्वम् न तु विशिष्टवैशिष्ट्यबोधीयविलक्षणविषयत्वमपीति न नित्यसाधारणत्वं जन्यतावच्छेदकस्य, आस्तां वा जन्यप्रत्यक्षवृत्तिजातिविशेष एव तथा। यदि च यादृशादेवाप्रसिद्धसाध्यकपरामर्शाद्विशिष्टवैशिष्ट्यावगाह्यनुमितिः स्वतन्त्रविशेषणतावच्छेदकप्रकारकज्ञानदशायामुत्पद्यते, तादृशादपि परामर्शाद्विशेषणतावच्छेदकप्रकारकज्ञानासत्त्वे केवलं विशेष्ये विशेषणमिति रीत्या साध्यविशेषणिकाया साध्यविशेष्यिकाया वाऽनुमितेरुत्पत्त्यातिप्रसङ्ग इति विभाव्यते, तदाऽनुमितित्वावच्छिन्नम्प्रत्यपि तस्य हेतुत्वान्तरमास्थेयं, शाब्दस्थले च पदजन्यस्मरणशाब्दबोधानात्मकविशेषणतावच्छेदकप्रकारकज्ञानाच्छाब्दविशिष्टवैशिष्ट्यावगाहिज्ञानानुत्पादेन तादृशबोधस्य पृथक् कारणताया आवश्यकत्वात् तत एवोपपत्तिः। अस्तु वा कालिकविशेषणतादैशिकविशेषणतोभयसम्बन्धेन प्रत्यक्षानुमित्यादिसाधारणं किंचिदविशेषितं विशिष्टवैशिष्ट्यावगाहित्वं जन्यतावच्छेदकमेवेति दिक्(१)।

अथ निर्विकल्पकानन्तरन्तद्विशिष्टवैशिष्ट्यबोधोपगमे तद्विरहाद्विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वं निर्युक्तिकम्। कदाचित्तद्विशिष्टवैशिष्ट्यबोधः कदाचिच्च तदुपलक्षितवैशिष्ट्यबोधः इत्यत्रासंसर्गाग्रह एव नियामकः, तद्विशिष्टाभावाद्यग्रहदशायां तत्प्रकारकज्ञानासत्त्वे इव तन्निर्विकल्पकादपीष्यत एव नियमतस्तद्विशिष्टवैशिष्ट्यबोधः। यत्र विशिष्टवैशिष्ट्यं वस्तुतो बाधितं तादृशविषयबोधस्थले च तज्ज्ञाने तत्तद्दोषाणां नियामकतया कदाचित्केवलतदुपलक्षितवैशिष्ट्यबोधोऽप्युपपद्यते। तद्धर्मप्रकारकज्ञानवति तादृशस्थले विशिष्टांशे भ्रमस्य कदाचिदेव उत्पत्त्या दोषस्य तन्नियामकताया भवतोऽप्यावश्यकत्वात् इति चेन्न।

विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकज्ञानस्याहेतुत्वे घटत्वादिनिर्विकल्पकानन्तरं घटो नास्तीत्याकारकाभावप्रत्यक्षवारणायाभावबुद्धौ प्रतियोगितावच्छेदकप्रकारकज्ञानहेतुताया: कल्पनीयतया गौरवात्,

(१) त्वमेव जन्यतावच्छेदकमिति दिगिति मि० पु० पाठः।

एतन्मते पुनस्तादृशाभावबुद्धेः घटत्वादिविशिष्टवैशिष्ट्यावगाहितया तत्र विशेषणतावच्छेदकप्रकारकज्ञानमुद्रयैव घटत्वादिप्रकारकज्ञानस्य हेतुत्वात् उक्तापत्त्यसम्भवेन प्रतियोगितावच्छेदकप्रकारकज्ञानस्य स्वतन्त्रहेतुत्वाकल्पनात् । नचानुयोगित्वसंयोगादिसाधारणवैशिष्ट्यत्वस्यैकस्य दुर्वचतया वैशिष्ट्यानां विशिष्योपादेयतया विशिष्टनिरूपितानुयोगिताख्यवैशिष्ट्यावगाहिन्यामभावबुद्धौ घटत्वादिप्रकारकज्ञानस्य हेतुत्वमस्तु विशिष्टनिरूपितसंयोगाद्यवगाहिबुद्धौ तत्तद्धेतुत्वं निर्युक्तिकमिति वाच्यम्। विशिष्टप्रतियोगिकत्वाद्यवच्छिन्नसंसर्गताकत्वस्य विशेषणावच्छिन्नप्रकारताकत्वादेरनुगतस्य विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकतायाः प्रागुक्तत्वात् वैशिष्ट्यभेदेन कारणताभेदाभावात् । घटवद्भूतलमित्यादिविशिष्टवैशिष्ट्यबोधे घटत्वादिप्रकारकज्ञानस्य हेतुत्वे विशिष्टवैशिष्ट्यबोधेच्छाविशिष्टतादृशप्रत्यक्षात्मकबोधसामग्र्या भिन्नविषयकानुमित्यादिकं प्रति प्रतिबन्धकतायां तादृशज्ञानरूपकारणस्याधिकस्य निवेशनीयतया गौरवमिति तु नाशङ्कनीयम्। भवन्मतेऽपि तत्र विशेषणज्ञाननिवेशेन साम्यात् । विशकलितदण्डरक्तत्वादिप्रकारकज्ञानदशायां रक्तदण्डो नास्तीत्याद्यभावप्रत्यक्षवारणाय दण्डत्वादिधर्मितावच्छेदककरक्तत्वादिप्रकारकज्ञानस्य स्वतन्त्रहेतुताकल्पनप्रयुक्तलाघवानुरोधेन विशेषणतावच्छेदकांशे सधर्मितावच्छेदकविशिष्टवैशिष्ट्यबोधे तत्तद्धर्मितावच्छेदककविशेषणतावच्छेदकप्रकारकज्ञानस्य हेतुतासिद्धिरपि द्रष्टव्या । एवमेव तादृशहेतुत्वाकल्पने इच्छाविशिष्टरक्तदण्डवानित्याद्युपनीतभानसामग्र्या अनुमित्यादिप्रतिबन्धकतायामुपनायकज्ञानविधया हेतुभूतानां रक्तत्वदण्डत्वविषयकज्ञानानां रक्तत्वदण्डत्वज्ञानत्वरूपभिन्नभिन्नरूपेण निवेशनीयतया तेषां मिथो विशेषणविशेष्यभावे कारणान्तरेण सममनेकेषां तथात्वे विनिगमनाविरहेण गौरवम् अस्माकं च तथाविधनानाज्ञाननिवेशस्थले दण्डत्वादिधर्मितावच्छेदककरक्तत्वादिप्रकारकैकैकज्ञानस्य निवेशनीयतया लाघवमित्यादि बोध्यम् । विशिष्टप्रतियोगिकवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकविशिष्टानुयोगिकवैशिष्ट्यबोधेऽनुयोगितावच्छेदकप्रकारकज्ञानं हेतुस्तद्धर्मनिर्विकल्पकानन्तरं तद्विशिष्टवैशिष्ट्यावगाहिज्ञानानुदयात् । तयोस्तद्धर्मावच्छिन्नानुयोगिताकत्वावच्छिन्नसंसर्गतानिरूपकतद्धर्मावच्छिन्नविशेष्यताशालित्वतद्धर्मप्रकारकज्ञानत्वाभ्यां कार्यकारणभावः । केवलमेकत्रोभयमितिरीत्या धर्मितावच्छेदकविशेषणतापन्नरक्तदण्डत्वादिबुद्धौ च वैशिष्ट्यांशे विशेष्यतावच्छेदकावच्छिन्नानुयोगिताकत्वं न भासतेऽतो न व्यभिचारः । यत्तु एकत्र द्वयमिति रीत्या बोधे एकविशेषणस्य

नापरविशेषणतावच्छेदकत्वं भासते, अपि तु विशिष्टानुयोगिकवैशिष्ट्य-बोधे एव, तथा च कार्यतावच्छेदककोटौ निरूपकान्तं विशेषणं नोपादेय-मिति। तन्न श्रद्धेयम्। गन्ध ।गभावोपलक्षितधर्मिणि गन्धानुमितेः तद्वि-शिष्टवैशिष्ट्यावगाहितया निर्धर्मितावच्छेदकत्वापातात्। यदि च तत्प्रका-रकज्ञानं विना विशिष्टानुयोगिकवैशिष्ट्यविषयकसद्धर्मितावच्छेदकक-बोधो न स्वीक्रियते, किन्तु तुल्यकक्षोभयविशेषणकबोध एव, तदा तद्धर्मावच्छिन्नविशेषणताकबुद्धित्वमात्रम्, संसर्गतावच्छेदकप्रकारकज्ञा-नस्य विशिष्टसंसर्गकबुद्धिपूर्वं नियमतः स्वीकारे संसर्गताया विषयता-त्वानभ्युपगमेन वा विशिष्टज्ञानसाधारण तद्धर्मावच्छिन्नविषयता-कबुद्धित्वमात्रं वा जन्यतावच्छेदकं वाच्यमनुयोगितावच्छेदकांशे सधर्मि-तावच्छेदक-चैत्रो दण्डी कुण्डली-त्यादिबोधे चैत्रत्वादिधर्मितावच्छेदक-दण्डादिप्रकारकज्ञानत्वेन हेतुता पूर्वोक्तरीत्या बोध्या। अत्र निश्चयत्व-निवेशनं पूर्ववत्। एवमधिकरणतावच्छेदकनिर्विकल्पकानन्तरमभावबु-द्धेर्वारणायाभावबुद्धावधिकरणतावच्छेदकप्रकारकज्ञानस्य स्वतन्त्र-हेतुत्वाकल्पनप्रयुक्तलाघवेनानुयोगितावच्छेदकप्रकारकज्ञानस्य विशि-ष्टवैशिष्ट्यबोधे हेतुत्वासिद्धिः। भूतलङ्घटवदित्यादिबुद्धेर्भूतलत्वावच्छि-न्नानुयोगिताकविशिष्टवैशिष्ट्यावगाहितया तत्रानुयोगितावच्छेदकप्रका-रकज्ञानमुद्रयैव भूतलत्वादिप्रकारकज्ञानस्यापेक्षितत्वात् विशिष्टप्रतियो-गिकवैशिष्ट्यबोधसाधारणतद्धर्मावच्छिन्नविषयताकबुद्धित्वस्य तत्प्रकार-कज्ञानजन्यतावच्छेदकत्वसम्भवे विशेषणतावच्छेदकविशेष्यतावच्छेदक-प्रकारकज्ञानहेतुतायाश्चैक्यादेकयुक्त्यैवोभयहेतुतासिद्धिरित्यालोचनीय-मिति दिक्॥

इति विशिष्टवैशिष्ट्यबोधवादवीचिः (५) समाप्तः॥ शम्॥

(६) विशेषणतावच्छेदकज्ञानहेतुतावादवीचिः।

विशेषणतावच्छेदकप्रकारकनिर्णयशून्यकाले विशिष्टवैशिष्ट्यबोधा-पत्तिवारणाय विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुत्वं कल्प्यते। तद्धेतुता च न सामान्यतो विशिष्टवैशिष्ट्यबुद्धित्वावच्छि-न्नं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन, सर्वसाधारणविशिष्टवै-शिष्ट्यबुद्धित्वस्य विशेषणतावच्छेदकप्रकारकनिर्णयत्वस्य चैक्याभा-वात्, एकविशेषणतावच्छेदकप्रकारकज्ञानादपरविशिष्टवैशिष्ट्यबोधाप-त्तेश्च, किन्तु एकस्वविशिष्टदण्डादिवैशिष्ट्यावगाहिज्ञानत्वावच्छिन्नं

प्रति दण्डत्वावच्छिन्नविशेष्यताकरक्तत्वप्रकारकनिर्णयत्वेन विशिष्यैव हेतुता। न च विशेष्ये विशेषणं तत्रापि विशेषणान्तरमिति रीत्या जायमानस्यापि बोधस्य रक्तत्वविशिष्टो यो दण्डस्तन्निरूपितसंयोगरूपवैशिष्ट्यावगाहितया तत्र व्यभिचार इति वाच्यम्। रक्तत्वदण्डत्वोभयावच्छिन्नप्रकारताकत्वस्यैव तदर्थत्वात्। विशेष्ये विशेषणमित्यादिक्रमेण रक्तत्वविषयकज्ञानीयदण्डादिप्रकारताया रक्तत्वानवच्छिन्नतया तत्र व्यभिचाराभावात्।

केचित्तु रक्तत्वशिष्टदण्डादौ पुरुषादिविशेष्यतानिरूपितप्रकारतायाः पर्याप्तिर्विशिष्टवैशिष्ट्यबोधस्थले स्वीक्रियते, तथाच तादृशविशिष्टपर्याप्तप्रकारताकत्वमेव रक्तो दण्ड इति निर्णयजन्यतावच्छेदकमित्युपेयते, विशेष्ये विशेषणमिति रीत्या रक्तादिविषयकज्ञाने पुरुषादिविशेष्यतानिरूपितप्रकारतायाः शुद्धदण्ड एव पर्याप्ततया न व्यभिचार इत्याहुः।

तदसत्। तथासति दण्डांशे रक्तत्वभ्रमात्मकस्य रक्तदण्डवानिति ज्ञानस्य विशिष्टवैशिष्ट्यबोधत्वात्तत्र रक्तत्वविशिष्टदण्डाभावात्, एवं लोहितवह्निमान् इत्यादिज्ञाने लौहित्यविशिष्टवह्नेरप्रसिद्ध्या अगतिरेव। न च विशिष्टाप्रसिद्धावपि खण्डशः प्रसिद्धयोर्लौहित्यवह्न्योरेव प्रकारतायाः पर्याप्तिः स्वीक्रियते, कार्यतावच्छेदकमपि लौहित्यवह्न्युभयपर्याप्तप्रकारताकत्वमेवेति नानुपपत्तिरिति वाच्यम्। पर्वतादिविशेष्यतानिरूपितप्रकारताया लौहित्यांशे स्वीकारे लौहित्याभाववान् पर्वत इत्याकारकबुद्धिदशायां लोहितवह्निमान्पर्वत इत्येतादृशविशिष्टवैशिष्ट्यबुद्ध्यनुदयापत्तेः, तन्मते लोहितवह्निमान्पर्वत इत्येतादृशविशिष्टवैशिष्ट्यबुद्धेरपि लौहित्यनिष्ठप्रकारतानिरूपितपर्वतविशेष्यताशालित्वेन तादृशबुद्धेर्विरोधित्वात्, तथाच विशिष्टवैशिष्ट्यबोधस्थले विशेषणतावच्छेदकविशेषणयोर्नैकप्रकारतापर्याप्तिः, किन्तु विशेषणनिष्ठप्रकारता विशेषणतावच्छेदकावच्छिन्नैवेति। विशेष्ये विशेषणं तत्र च विशेषणान्तरमित्यत्र तु विशेषणतावच्छेदकप्रकारतानिरूपितैव विशेषणप्रकारता, न तु विशेषणतावच्छेदकावच्छिन्नैवेति तयोर्भेदः।

अथ रक्तत्वदण्डत्वोभयधर्मावच्छिन्नप्रकारताकत्वस्य दण्डो रक्त इति निर्णयजन्यतावच्छेदकत्वेऽपि रक्तत्वधर्मितावच्छेदककदण्डत्वप्रकारकनिर्णयजन्यदण्डरक्तवानितिविशिष्टवैशिष्ट्यबोधे व्यभिचारो दुर्वारः, तत्रापि दण्डनिष्ठप्रकारताया दण्डत्वरक्तत्वोभयावच्छिन्नत्वात्। न च रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यताशालित्वस्य तादृशनिर्णयजन्यतावच्छेदके प्रवेशात् न व्यभिचार इति वाच्यम्। तादृशबोधेनैव यत्र

विशेष्ये विशेषणमिति न्यायेन दण्डत्वावच्छिन्ने रक्तत्वं विषयीकृतं तत्र तादृशसमूहालम्बने च व्यभिचारस्य तावतापि दुर्वारत्वादिति चेन्न।

रक्तदण्डवानित्येतादृशज्ञानीयतादृशोभयधर्मावच्छिन्नदण्डप्रकारताया एव रक्तत्वप्रकारतानिरूपितविशेष्यतास्वरूपत्वाभ्युपगमात्। रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यताभिन्नप्रकारताया एव दण्डो रक्त इत्येतादृशनिर्णयजन्यतावच्छेदकत्वाभ्युपगमेन व्यभिचारानवकाशात्, तादृशसमूहालम्बनबोधीयोभयधर्मावच्छिन्नविषयताया दण्डत्वप्रकारतानिरूपितरक्तत्वावच्छिन्नविशेष्यतारूपाया रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यताभिन्नत्वात्। न च रक्तत्वावच्छिन्नप्रकारताया रक्तत्वप्रकारतानिरूपितविशेष्यतारूपत्वेन रक्तदण्डवानिति बोधस्य रक्तत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वप्रकारताशालित्वप्रसङ्गः, तथा च तादृशज्ञानाद्रक्तत्वावच्छिन्नविशेष्यकरक्तत्वप्रकारक-रक्तो रक्त-इत्याकारकस्मरणापत्तेस्तत्र तथाविधनिर्णयस्य हेतुत्वादिति वाच्यम्। रक्तत्वावच्छिन्नविशेष्यतायास्तत्र रक्तत्वप्रकारतानिरूपितत्वेऽपि रक्तत्वावच्छिन्नविशेष्यतात्वेन तस्यास्तादृशप्रकारतानिरूपितत्वानभ्युपगमात्, तेन रूपेण रक्तत्वप्रकारतानिरूपितविशेष्यताशालिज्ञानस्यैव रक्तो रक्त इत्याकारकस्मृतिजनकत्वात्॥ तादृशस्मरणापत्त्यसम्भवात्। एकसम्बन्धेन रक्तत्वप्रकारकनिर्णयसत्त्वे सम्बन्धान्तरेण रक्तत्वविशिष्टवैशिष्ट्यावगाहिज्ञानवारणाय विशेषणतावच्छेदकीभूतसम्बन्धविषयतां निवेश्य तद्भेदेन विभिन्नकारणत्वं कल्प्यम्। एवं रक्तदण्डवत्पुरुषवानहमित्याकारकविशिष्टवैशिष्ट्यबोधे रक्तदण्डवान्पुरुष इत्यादिनिर्णयत्वेन हेतुता। तत्र च दण्डांशे रक्तांशे च निर्णयत्वं निवेश्यम्। एवमन्यत्राप्यूह्यम्। दण्डवानित्याकारकविशेषणतावच्छेदकांशे निर्धर्मितावच्छेदककदण्डत्वादिविशिष्टवैशिष्ट्यबोधं प्रति निर्णयत्वमनिवेश्य दण्डत्वप्रकारकज्ञानत्वेन हेतुता वाच्या निर्धर्मितावच्छेदककसंशयाभावेन तत्र निर्णयत्वनिवेशे प्रयोजनविरहात्। तद्धेतुता च दण्डत्वादिनिर्विकल्पकदशायां तादृशविशिष्टवैशिष्ट्यबोधवारणाय। एवं दण्डो रक्तो नवेति संशयानन्तरमेकविशेषणविशिष्टे अपरविशेषणस्य वैशिष्ट्य मिति रीत्या रक्तदण्डः प्रमेयः इत्यादिबोधवारणाय तादृशविशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदकप्रकारकनिर्णयस्य हेतुता स्वीकार्या। तद्धेतुतापि दण्डत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वप्रकारताशालिनिर्णयत्वेन, जन्यतावच्छेदकं च रक्तत्वविशिष्टदण्डत्वावच्छिन्नविशेष्यताशालिज्ञानत्वं, तेन मेयत्वादिकमवगाहमानस्य एकत्र द्वयमिति रीत्या तथाविधज्ञानस्य दण्डनिष्ठविशेष्यता

न रक्तत्वावच्छिन्नेति न तत्र व्यभिचारः। एतेन "न च तथापि तद्विशिष्टवैशिष्ट्यावगाहिबुद्धित्वावच्छिन्नं प्रति तद्विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन कारणतया तादृशविशिष्टवैशिष्ट्यबोधे तथाविधप्रत्यक्षे चातिव्याप्तिरि"त्यनेन वह्निव्याप्यधूमवान्पर्वत इत्याकारकविशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतामादाय वह्निव्याप्यधूमवत्पर्वतवानयं देश इत्यादिविशिष्टवैशिष्ट्यबोधे चातिव्याप्त्युद्भावकस्य दीधितिकृतस्तथाविधविशेष्यतावच्छेदकप्रकारकनिश्चयत्वेन हेतुतामादाय वह्निव्याप्यवान्पर्वतो द्रव्यमित्याकारके-विशिष्टे विशिष्ट्यमिति-न्यायेन विषयताशालिबोधे अतिव्याप्तेरनुद्भावनेन न्यूनता परिहृता। उपदर्शितरीत्या एककार्यकारणभावकल्पनेनैव निर्वाहे विशिष्टे वैशिष्ट्यमिति न्यायेन विषयताशालिबोधे विशेष्यतावच्छेदकप्रकारकनिर्णयत्वेन कारणतायाः स्वातन्त्र्येण क्लृप्ततया विशेषणतावच्छेदकनिर्णयत्वेन हेतुतामादायातिव्याप्त्यभिधानस्य कृततया न्यूनताया असम्भवात॥

केचित्तु विशेष्यतावच्छेदकवद्वृत्तित्वसम्बन्धनिष्ठसांसर्गिकविशेषणता विशिष्टवैशिष्ट्यमितिन्यायेन विषयता, एकप्रकारतानिरूपितविशेष्यताप्यन्यप्रकारतानिरूपितशुद्धसांसर्गिकविषयता सैव एकत्र द्वयमिति न्यायेन विषयता। अत एव गामानयेति लौकिकानि वाक्यानि वैदिकानि वा तात्पर्यविषयीभूतस्मारितपदार्थसंसर्गज्ञानपूर्वकाणि आकाङ्क्षादिमत्पदकदम्बत्वाद्घटमानयेत्यादिवाक्यवदिति वैशेषिकानुमाने पदार्थतात्पर्यविशेषणमङ्गीकर्त्तुरुपाध्यायस्य मते दूषणदानप्रस्तावे "एवं विशिष्टवैशिष्ट्यमेकत्र द्वयमित्यादिसंसर्गभेदे विरोध इति द्रष्टव्यमि"ति पक्षधरनिरुक्तमर्थान्तरदूषणम् सङ्गच्छते, अन्यथा पूर्वरीत्या तथाविधविषयताया वैलक्षण्यानङ्गीकारे तथाविधविषयताशालिबोधद्वये एकसम्बन्धस्यैव भाततया भिन्नविषयकत्वाभावे दर्शितपक्षधरमिश्रोक्तविरोधोऽशक्यपरिहार इति।

ननु तादृशविशिष्टसम्बन्धनिष्ठसांसर्गिकविषयतायाः विशिष्टवैशिष्ट्यमिति नोपेयते तथाविधविषयतयोरनुगमासंभवेन विभिन्नकार्यतावच्छेदकतया विशेष्यतावच्छेदकप्रकारकनिर्णयविशेषणतावच्छेदकप्रकारकनिर्णययोरेककारणत्वासम्भवेनोपदर्शितदीधितिकारन्यूनतापि दुःसमाधेयेति किं नाचक्षसे इति चेत्, भावानवबोधपूर्वकानुयोगेन निरनुयोज्यत्वात्, यतो विशेषणतावच्छेकावच्छिन्नप्रकारतैव विशिष्टवैशिष्ट्यमितिन्यायाङ्गविषयतेति न ब्रूमः, अपितु विशेषणतावच्छेदकावच्छिन्ननिरूपितविशिष्टसम्बन्धनिष्ठसांसर्गिकविषयतात्वमेव तत्त्वमिति। तत्र तादृशविषयतयोस्तत्तद्धर्मावच्छिन्ननिरूपितत्वविशिष्टसांसर्गिकविषयतात्वेनानुगमेन कार्यतावच्छेद-

कैक्यसम्भवात् विशेषणतावच्छेदकप्रकारकनिर्णयविशेष्यतावच्छेदकप्रकारकनिर्णययोः कारणताभेदाभावेन कुत्राप्येतदापत्तेरभावात्। व्यधिकरणसम्बन्धविषयकविशिष्टवैशिष्ट्यबोधे तत्तद्धर्मविशिष्टनिरूपितविशिष्टसम्बन्धाप्रसिद्ध्या नायं प्रकारः सम्भवदुक्तिक इति न सचेतसां शङ्कास्पदमपि। तत्तद्धर्मनिष्ठावच्छेदकतानिरूपिताधिकरणनिष्ठावच्छेदकतानिरूपितनिरूपितत्वनिष्ठावच्छेदकतानिरूपितसम्बन्धनिष्ठसांसर्गिकविशेषणताया एव तत्त्वादिति। अत एव विशेष्यतावच्छेदकांशे भ्रमात्मकविशिष्टवैशिष्ट्यबोधो यत्र तत्रापि नानुपपत्तिः, तत्रापि वैज्ञानिकत्वमादाय तथाविधसांसर्गिकविषयताप्रसिद्धिसम्भवादित्याहुः।

न च प्रमेयत्वप्रकारतानिरूपितदण्डनिष्ठविशेष्यताया रक्तत्वाद्यनवच्छिन्नत्वे रक्तत्वं धर्मितावच्छेदकीकृत्य प्रमेयत्वादिबाधकाले तथाविधज्ञानापत्तिरिति तादृशविशेष्यताया रक्तत्वावच्छिन्नत्वमावश्यकमिति वाच्यम्। एवमपि प्रमेयत्वादिप्रकारतानिरूपितदण्डत्वाद्यवच्छिन्नविशेष्यताभिन्नाया एव रक्तत्वाद्यवच्छिन्नविशेष्यताया अभ्युपगमात् एकस्या विशेष्यताया रक्तत्वदण्डत्वोभयानवच्छिन्नत्वेन व्यभिचारानवकाशात्। तत्रापि रक्तत्वधर्मितावच्छेदककदण्डत्वप्रकारकनिर्णयजन्ये दण्डो रक्तः प्रमेयः इत्येतादृशबोधे व्यभिचारवारणाय तादृशविशेष्यतायां रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यतात्वं निवेशनीयम्। इदन्त्ववधेयम्—रक्तदण्डवान् रक्तदण्डः प्रमेय इत्याकारकोभयविशिष्टवैशिष्ट्यबोधसाधारणरक्तत्वविशिष्टदण्डत्वाद्यवच्छिन्नविषयताशालिज्ञानत्वावच्छिन्नं प्रति दण्डो रक्त इत्येतादृशनिर्णयत्वादिनैकहेतुत्वं कल्प्यते कदाचित्तादृशविशिष्टधर्मावच्छिन्नप्रकारताशालिज्ञानं कदाचित्तादृशविशेष्यताशालिज्ञानमुत्पद्यते इत्यत्र विनिगमकगवेषणा उभयवादिनामपीति।

अथ दण्डो रक्तो नवेत्याकारकसंशयानन्तरमपि रक्तं दण्डं सन्देह्मीत्याकारकरक्तत्वविशिष्टवैशिष्ट्यावगाह्यनुव्यवसायोदयात् विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुत्वकल्पनं न सम्भवति। न च तत्र विशेष्ये विशेषणमिति रीत्यैवानुव्यवसायो भवति, न त्वसौ विशिष्टवैशिष्ट्यविषयताशालीति नानुपपत्तिरिति वाच्यम्। विशिष्टविषयताशून्यज्ञानाद्यनुव्यवसायाभ्युपगमे रक्तः पटो दण्डो द्रव्यमित्यादिव्यवसायानन्तरमपि विशेष्ये विशेषणमितिरीत्या रक्तदण्डं जानामीत्याकारकानुव्यवसायापत्तिरिति चेत्। न, दण्डो रक्तो नवेत्यादिसंशयानुव्यवसायो न ज्ञानांशे रक्तत्वविशिष्टदण्डप्रकारकः, किन्तु प्रकारतासम्बन्धे-

न ज्ञानांशे रक्तत्वप्रकारको दण्डे रक्तत्वं सन्देह्मीत्याकारक एव । यदि तत्र ज्ञानांशो रक्तत्वविशिष्टदण्डप्रकारकः, तदंशे च रक्तत्वप्रकारकोऽप्यनुव्यवसायः स्वीक्रियते, तथाप्यसौ विशेष्ये विशेषणमिति रीत्यैव जायते न तु विशिष्टवैशिष्ट्यविषयताशाली । न च पूर्वातिप्रसङ्गः, रक्तत्वविशिष्टदण्डप्रकारतानिरूपितविषयत्वनिष्ठसांसर्गिकविषयतानिरूपितविशेष्यतासम्बन्धेनानुव्यवसायं प्रति रक्तत्वप्रकारतानिरूपितदण्डत्वावच्छिन्नविशेष्यताकज्ञानत्वेन हेतुताया आवश्यकत्वात् पूर्वोक्तसमूहालम्बनानन्तरं तथाविधानुव्यवसायासम्भवात् । आवश्यकत्वं च तादृशहेतुतायाः रक्तो दण्ड इत्याकारकप्रत्यक्षानन्तरं यत्र तादृशसमूहालम्बनस्मरणादिकं तत्र रक्तं दण्डं स्मरामीत्यनुव्यवसायापत्तिवारणायेति ।

अथ रक्तो दण्ड इत्येतादृशज्ञानोपरमेऽपि रक्तदण्डं करोमीत्याकारककृतिसाक्षात्कारोत्पत्त्या व्यभिचारः । न च ज्ञानत्वमनिवेश्य दण्डत्वावच्छिन्नविशेष्यताकरक्तत्वप्रकारकत्वेनैव हेतुत्वान्न व्यभिचार इति वाच्यम् । तथासति रक्तो दण्ड इत्याकारकानुद्बुद्धसंस्कारसत्त्वे रक्तत्वनिर्विकल्पकदशायामपि वैशिष्ट्यबोधापत्तेः । न च संस्कारजन्यविशिष्टवैशिष्ट्यबोधे उद्बोधकस्यापि हेतुत्वेन तदभावान्नापत्तिरिति वाच्यम् । उद्बोधकं विनापि सामान्यसामग्र्या फलजनने विशिष्टवैशिष्ट्यबोधसामान्योपादाने उद्बोधकविरहस्याकिञ्चित्करत्वादिति चेन्न ।

कृतिसाक्षात्कारपूर्वं नियमतो दण्डो रक्त इत्याकारकस्मरणाऽभ्युपगमेन व्यभिचारानवकाशात् ।

वस्तुतस्तु संस्कारव्यावृत्तज्ञानेच्छाकृतिवृत्तिजातिविशेषं कल्पयित्वा विशेषणतावच्छेदकप्रकारकगुणत्वेनैव हेतुत्वं स्वीक्रियते, अनन्तस्मृतिहेतुत्वकल्पनापेक्षया तादृशजातिकल्पनाया एवोचितत्वात् । न च कृतिसाक्षात्कारपूर्वं विषयस्मृतिकल्पनमावश्यकम्, अन्यथा उपनायकज्ञानविरहेण विषयभानासम्भवेन कृतिसाक्षात्कारानुदयप्रसङ्गादिति वाच्यम् । ज्ञानलक्षणप्रत्यासत्तेरपि इच्छाकृतिसाधारणतद्विषयकविजातीयगुणत्वेनैव हेतुत्वोपगमात्, आवश्यकं च गुणमानसजनकतावच्छेदकतया संस्कारादिव्यावृत्तजातिविशेषकल्पनम्, अन्यथा संस्कारादीनां मानसापत्तिरिति विशिष्टवैशिष्ट्यानुभवत्वमेव जन्यतावच्छेदकमास्थीयते । स्मरणे च तादृशसंस्कार एतादृशविषयतानियामक इति बहवः ।

केचित्तु अनुभवत्वजातौ मानाभावेन ज्ञानत्वस्यापि नित्यसाधारणतया तस्य जन्यतानवच्छेदकत्वात् जन्यप्रत्यक्षवृत्तिजातिविशेष एव विशेषणतावच्छेदकप्रकारकनिर्णयादिजन्यतावच्छेदकः, अनुमित्यादौ च

परामर्शादिरेव तादृशविषयतानियामकः, एवं शाब्दबोधेऽवान्तरवाक्यार्थ एव तथा ।

अथ विजातीयप्रत्यक्षत्वस्य तज्जन्यतावच्छेदकत्वे इतरत्वव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवीत्याकारकपरामर्शाद्विशिष्टवैशिष्ट्यविषयताशालिन्या अनुमितेरापत्तिः । तादृशानुमितावन्वयव्याप्तिज्ञानस्यैव हेतुत्वान्नापत्तिरित्युक्तौ च स्वातन्त्र्येण इतरभेदप्रकारकज्ञानस्य सत्त्वे तादृशानुमित्यनुदयापत्तिः । न च पृथिव्यामितरभेदप्रकारकानुमितिरेवोत्पद्यत इति वाच्यम् । साध्यविशेष्यकानुमितौ साध्यप्रसिद्धेर्विरोधितया तत्र तादृशानुमित्युत्पादासम्भवात् । न च विशेष्ये विशेषणमितिरीत्या पृथिवीतरभेदवतीत्याकारकानुमितिस्तत्र जायत एवेति वाच्यम् । तथासति साध्यज्ञानशून्यकाले तादृशपरामर्शात् पृथिव्यामितरभेदः पृथिवीतरभेदवतीत्याकारकद्विविधविषयताशालिन्या अनुमितेरापत्तिः । न च विशिष्टबुद्धि प्रति विशेषणज्ञानस्य हेतुत्वान्नापत्तिरिति वाच्यम् । एवमपि प्रमेयत्वादिना इतरभेदज्ञानकाले तथाविधानुमितेरापत्तिसम्भवात् । न च प्रमेयत्वादिना साध्यज्ञानकाले साध्यविशेष्यकानुमितिप्रतिबन्धकीभूतसाध्यसिद्धिसत्त्वेन न द्विविधविषयताशाल्यनुमित्यापत्तिरिति वाच्यम् । साध्यतावच्छेदकप्रकारकप्रसिद्धेरेव साध्यविशेष्यकानुमितिविरोधित्वात्, अन्यथा इतरभेदत्वरूपेण भेदान्तरावगाहिपृथिव्यामितरभेद इत्याकारकसिद्धिकाले तादृशानुमितिवारणाय तादृशानुमितिं प्रति पक्षविशेष्यतां निवेश्य सिद्धेः प्रतिबध्यप्रतिबन्धकभावान्तरापत्तेरिति । तस्मादितरभेदत्वप्रकारकज्ञानकालीनव्यतिरेकव्याप्तिज्ञानजन्यानुमितौ विशिष्टविषयतास्वीकार आवश्यकः, तत्साधारण्यं च विशेषणतावच्छेदकप्रकारकज्ञानजन्यतावच्छेदकस्याऽऽवश्यकम्, तथा च सति न इतरभेदत्वप्रकारकज्ञानशून्यकाले विशेष्ये विशेषणमिति रीत्या इतरभेदत्वप्रकारकद्विविधविषयताशाल्यनुमित्यापत्तिः विशिष्टवैशिष्ट्यानवगाहिन्या विशेष्ये विशेषणमिति रीत्या जायमानाया अनुमितेरप्रसिद्धेः, विशिष्टवैशिष्ट्यावगाहिन्यां च तस्यां विशेषणतावच्छेदकप्रकारकनिश्चयस्य हेतुत्वादिति चेत् ।

एवमपि अनुमितौ स्वातन्त्र्येणैव हेतुत्वम्, अनुभवत्वस्य तथात्वे नित्यव्यावर्त्तनाय जन्यत्वनिवेशस्यावश्यकतयाऽनुमितौ विशेषणविशेष्यभावे विनिगमनाविरहेण कार्यकारणभावद्वयस्याऽऽवश्यकत्वात् अवच्छेदकगौरवाच्चेत्याहुः ।

परे तु अनुभवत्वादिकमनिवेश्य विशिष्टवैशिष्ट्यविषयतात्वमेव ज-

न्यतावच्छेदकमास्थीयते विशेषणतावच्छेदकज्ञानशून्यकालीनस्मरणे ईश्वरज्ञाने च विशेष्यविशेषणमित्येतादृशविषयतामात्रमभ्युपेयतेऽतो न व्यभिचारः, नवा नित्यसाधारण्यमिति वदन्ति ।

केचित्तु विशेषणतावच्छेदकसंशयकाले विशिष्टवैशिष्ट्यबोधं स्वीकृत्य निर्णयत्वमनिवेश्य विशेषणतावच्छेदकप्रकारज्ञानत्वेनैव हेतुतां कल्पयन्ति । तदसत् । संशयसाधारणज्ञानस्य हेतुत्वेऽप्रामाण्यनिर्णयस्यैवोत्तेजकतया निर्णयत्वेन हेतुत्वे चाप्रामाण्यज्ञानसामान्यस्यैव तथात्वेन निर्णयत्वेनैव हेतुत्वकल्पनस्योचितत्वात्, अन्यथा विशेषणतावच्छेदकप्रकारकज्ञानीयनिर्णयत्वापेक्षया गुरुशरीरस्या प्रामाण्यनिर्णयत्वस्य निवेशने महागौरवप्रसङ्गात् ।

अथ विशेषणतावच्छेदकप्रकारकसंशयकाले तत्र चाप्रामाण्यशङ्कायां भवन्मत इव मयापि विशिष्टवैशिष्ट्यबोधानङ्गीकारादप्रामाण्यज्ञानत्वावच्छिन्नाभावो विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां निवेश्यते न तु निर्णयत्वघटितगुरुशरीरावच्छिन्नाभाव इति चेत् । एवमपि संशयसाधारणज्ञानस्य विशिष्टवैशिष्ट्यबोधहेतुत्वेऽनुमित्यादिकं प्रति परामर्शहेतुत्वे वह्निव्याप्यधूमवान्पर्वतः वह्निव्याप्यधूमवन्महानसमित्याद्यनेकविधज्ञाने व्याप्त्यंशे निर्णयत्वनिवेशाद्गौरवमस्माकं तु तत्र व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानत्वादिना हेतुत्वस्वीकारात् विशेषणतावच्छेदकांशे संशयात्मकविशिष्टवैशिष्ट्यबोधाप्रसिद्ध्या व्याप्त्यंशे निर्णयत्वानिवेशेऽपि क्षतिविरहात् । न चाऽऽहार्यविशेषणतावच्छेदकप्रकारकनिर्णयोत्तरोत्पन्नस्य विशेषणतावच्छेदकांशे संशयात्मकज्ञानस्य विशिष्टवैशिष्ट्यविषयताशालित्वे बाधकाभावात्तादृशज्ञानोत्तरमनुमितिवारणाय विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन विशिष्टवैशिष्ट्यबोधहेतुत्ववादिनापि परामर्शहेतुतायां व्याप्त्यंशे निर्णयत्वमवश्यं निवेश्यमिति न लाघवमिति वाच्यम् । अनाहार्यविशेषणतावच्छेकनिर्णयत्वेनैव विशिष्टवैशिष्ट्यबोधहेतुत्वाभ्युपगमात्; अत एव विशिष्टवैशिष्ट्यबोधेऽनुमितिलक्षणातिव्याप्तिः साधु सङ्गच्छते, अन्यथाऽनुमितिजनकतावच्छेदककोटावनाहार्यत्वस्य निवेशे विशिष्टवैशिष्ट्यबोधहेतुतायां तदनिवेशे एकरूपेण हेतुत्वाभावात् तत्रातिव्याप्तिशङ्काया असङ्गत्यापत्तेः । न च विशेषणतावच्छेदकज्ञानहेतुतायामनाहार्यत्वस्य निर्णयत्वस्य च निवेशापेक्षया परामर्शहेतुतायां व्याप्त्यंशे निर्णयत्वनिवेशनमेवोचितमिति वाच्यम् । वह्निव्याप्यधूमवान्पर्वतः वह्निव्याप्यधूमवन्महानलमित्याद्यनेकविधज्ञानहेतुतायां निर्णयत्वनिवेशापेक्षया धूमो वह्निव्याप्य इत्याकारकस्य एकैकविधज्ञानस्य हेतुतायां तन्निवेशे

लाघवात्। न च धूमो वह्निव्याप्य इत्याकारकधूमत्वसामानाधिकरण्यमात्रावगाहिव्याप्तिनिर्णयदशायां तत्सामानाधिकरण्येन व्याप्त्यभावभाने बाधकाभावात् धूमत्वसामानाधिकरण्येन व्याप्त्यभावकोटिकसंशयस्यापि विशिष्टवैशिष्ट्यविषयताशालित्वात् तदुत्तरमनुमितिवारणाय व्याप्त्यंशे निर्णयत्वनिवेशनमावश्यकमिति वाच्यम्। विशेष्यतावच्छेदकसामानाधिकरण्येनोभयकोट्यवगाहिज्ञाने संशयत्वाभावात्तादृशज्ञानादनुमितिस्वीकारे क्षतिविरहात्। न च धूमत्वसामानाधिकरण्येन व्याप्तिप्रकारकनिर्णयानन्तरोत्पन्नधूमत्वावच्छेद्यव्याप्त्यवगाहिनो धूमत्वसामानाधिकरण्येन व्याप्त्यभावावगाहिनः संशयादनुमित्युत्पादो वारयितुमशक्यः, तादृशज्ञानस्य व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वस्वीकारादिति वाच्यम्। अवच्छेदकावच्छेदेन व्याप्तिप्रकारकविशिष्टवैशिष्ट्यबोधेऽवच्छेदकावच्छेदेन व्याप्तिप्रकारकज्ञानस्य हेतुत्वात, अवच्छेदकावच्छेदेन निर्णयसत्त्वे च धूमत्वं विशेष्यतावच्छेदकीकृत्य व्याप्त्यभावभानासम्भवात्। न चैवमपि धूमो वह्निव्याप्य इत्येतादृशज्ञानस्यैव निर्णयत्वेन हेतुत्वमायातं, रक्तदण्डवानित्यादिविशिष्टवैशिष्ट्यबोधस्थलीयहेतुतायां तु निर्णयत्वनिवेशे युक्तिविरहादिति वाच्यम्। दण्डो रक्त इत्याकारकज्ञानस्य निर्णयत्वेन हेतुत्वे रक्तत्वविशिष्टदण्डादिहेतुकानुमितौ तद्धेतुकपरामर्शहेतुतायां हेतुतावच्छेदकीभूतरक्तत्वांशे निर्णयत्वानिवेशेन लाघवात् विशिष्टवैशिष्ट्यबोधविषयतापर्यन्तनिवेशेन तदंशे संशयात्मकपरामर्शादनुमित्यापत्तेरसम्भवात्।

वस्तुतस्तु विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वे इच्छादिविशिष्टतादृशविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षसामग्रीकाले दण्डो न रक्त इत्याकारकानुमितिशाब्दबोधादिवारणाय तादृशानुमित्यादौ तथाविधसामग्र्याः प्रतिबन्धकत्वकल्पनेन गौरवम्, अस्माकं तु तादृशसामग्रीकाले दण्डो रक्त इत्याकारकनिर्णयस्य नियमतः सत्त्वात्तादृशनिर्णयस्य बाधमुद्रया तथाविधानुमितिप्रतिबन्धकतया तादृशसामग्रीप्रतिबन्धकताया अकल्पनात्। न च तादृशसामग्रीकाले घटानुमितिवारणाय तत्र तादृशसामग्रीप्रतिबन्धकत्वे कल्पनीये तत्र विषयमनिवेश्यानुमितित्वाद्यवच्छिन्नं प्रत्येव तथा कल्पनात् न तदतिरिक्तप्रतिबन्धकताकल्पनाधिक्यमिति वाच्यम्। इच्छाया उत्तेजकत्वानुरोधेन विशिष्टवैशिष्ट्यविषयकानुमितिप्रतिबन्धकताया आवश्यकत्वात्। एतेन–परामर्शहेतुतायां विशिष्टवैशिष्ट्यनिष्ठविषयतानिवेशेऽपि निर्णयत्वनिवेश आवश्यकः, अन्यथा धूमो वह्निव्याप्य इति निर्णयानन्तरं व्याप्त्यभाव-

प्रत्यक्षेच्छावशात् व्याप्त्यभावावगाहिनः संशयात्मकव्याप्यवत्ताज्ञानात् अनुमित्यापत्तेः तादृशज्ञानस्य तथाविधविषयताशालित्वे बाधकाभावादिति न लाघवावकाश इत्यपि परास्तम्, तावताप्युक्तलाघवापरिहारादिति

अत्राहुः—संशयोत्तरं विशिष्टवैशिष्ट्यबोधानभ्युपगमेऽपि विशिष्टवैशिष्ट्यबोधत्वावच्छिन्नं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुत्वमनर्थकम्, दण्डो रक्तो न वेति संशयानन्तरं रक्तदण्डवानिति विशिष्टवैशिष्ट्यबोधवारणाय तादृशविशिष्टवैशिष्ट्यबोधं प्रति दण्डत्वधर्मितावच्छेदककरक्तत्वाभावप्रकारकज्ञानाभावत्वेन हेतुत्वं कल्प्यताम्, संशयानन्तरं निर्णये सति क्षणविलम्बेन विशिष्टवैशिष्ट्यबोधः। न च तादृशकारणताकल्पनमपेक्ष्य लाघवात् दण्डत्वधर्मितावच्छेदककरक्तत्वप्रकारकनिर्णयत्वेन पृथक् हेतुत्वकल्पनं समुचितमिति वाच्यम्। दण्डत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वाभावप्रकारताशून्यदण्डत्वावच्छिन्नविशेष्यतानिरूपितरक्तत्वप्रकारताशालिज्ञानत्वरूपनिर्णयत्वेन हेतुत्वे तादृशप्रकारताशून्यत्वतादृशप्रकारताज्ञानत्वानां मिथो विशेष्यविशेषणभावे विनिगमनाविरहेण षट्सङ्ख्यककार्यकारणभावापत्तेरवच्छेदकगौरवाच्च, मन्मते तादृशरक्तत्वाभावप्रकारकज्ञानाभावहेतुतायां तादृशरक्तत्वाभावप्रकारकत्वज्ञानत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावद्वयं, रक्तत्वप्रकारकज्ञानहेतुतायां च रक्तत्वप्रकारकत्वज्ञानत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण तद्द्वयमिति कार्यकारणभावचतुष्टयकल्पनादवच्छेदकलाघवाच्चेति। एवं रक्तदण्डवद्भूतलवान् रक्तदण्डवत्पुरुषवानित्यादिविशिष्टवैशिष्ट्यबोधे रक्तदण्डवद्भूतलमित्यादिबहुविधज्ञानस्य हेतुतायां दण्डत्वधर्मितावच्छेदकरक्तत्वाभावप्रकारकान्यत्वरूपनिर्णयत्वस्य निवेशेन भवन्मते गौरवम्, तदनिवेशे रक्तत्वांशे संशयात्मकतादृशज्ञानानन्तरं तादृशबोधापत्तेः। न च भवतां तादृशविशिष्टवैशिष्ट्यबोधे तादृशसंशयस्य प्रतिबन्धकत्वं कल्प्यमिति वाच्यम्। मन्मते रक्तत्वविशिष्टवैशिष्ट्यावगाहिज्ञानं प्रति दण्डत्वधर्मितावच्छेदककरक्तत्वाभावप्रकारकज्ञानस्य रक्तदण्डवानित्याकारकज्ञानस्थले प्रतिबन्धकताकल्पनात्प्रतिबध्यतावच्छेदकीभूतविषयतायाश्च व्यापकतया तादृशसंशयकाले व्यापकधर्मावच्छिन्नसामग्र्यभावादेव रक्तदण्डवद्भूतलवान् देश इत्यादिविशिष्टवैशिष्ट्यबोधासम्भवात्तद्वारणाय तत्र रक्तत्वाभावप्रकारकज्ञानस्य प्रतिबन्धकत्वान्तराकल्पनात्, किन्तु रक्तदण्डवद्भूतलवानित्यादिबोधे रक्तदण्डाभावप्रकारकज्ञानमात्रस्य प्रतिबन्धकत्वं कल्प्यते। न च मन्मतेऽपि रक्तदण्डवानिति विशिष्टवैशिष्ट्यबोधहेतुभूतदण्डत्वधर्मितावच्छेदककरक्तत्वप्रकार-

कनिर्णयजन्यतावच्छेदकीभूतविषयताया रक्तदण्डवद्भूतलमित्यादिनिर्णयजन्यतावच्छेदकीभूतविषयताव्यापकतया रक्तांशे संशयकाले व्यापकधर्मावच्छिन्नसामग्रीविरहादेव न रक्तदण्डवद्भूतलमित्याकारकनिर्णयजन्यतावच्छेदकावच्छिन्नापत्तिरिति रक्तदण्डवद्भूतलमिति ज्ञानहेतुतायां न रक्तत्वाभावप्रकारकान्यत्वं निवेश्यत इति वाच्यम् । रक्तांशे संशयात्मकरक्तदण्डवद्भूतलमिति ज्ञानानन्तरं रक्तो दण्ड इति निर्णयोत्पत्तौ रक्तदण्डवद्भूतलवानितिविशिष्टवैशिष्ट्यबोधापत्तेः तदानीं रक्तत्वविशिष्टदण्डवैशिष्ट्यावगाहिज्ञानहेतुभूतस्य रक्तो दण्ड इति निर्णयस्य दण्डांशे निर्णयात्मकस्य रक्तदण्डवद्भूतलमिति ज्ञानस्य च सत्त्वेन सकलकारणसमवधानात् । एतेन–तादृशरक्तत्वाभावज्ञानस्य समवायेन विशिष्टवैशिष्ट्यबोधं प्रति न समवायेन प्रतिबन्धकता कायव्यूहस्थले एकशरीरावच्छेदेन रक्तो न वा दण्ड इत्यादिसंशयवति शरीरान्तरावच्छेदेन रक्तदण्डवानिति विशिष्टवैशिष्ट्यबोधोदयेन व्यभिचारात् । नाप्यवच्छेदकतासम्बन्धेन तादृशविशिष्टवैशिष्ट्यबोधं प्रति अवच्छेदकतासम्बन्धेन तथाविधज्ञानत्वेन प्रतिबन्धकत्वम्, परपुरप्रवेशस्थले तच्छरीरावच्छेदेनाभिभाव्यस्य तथाविधसंशयसत्त्वे तदवच्छेदेनैव भूतात्मनि विशिष्टवैशिष्ट्यबोधोदयेन व्यभिचारादितोऽनायत्याऽवच्छेदकतासम्बन्धेन तदात्मसमवेततादृशविशिष्टवैशिष्ट्यबोधं प्रत्यवच्छेदकतासम्बन्धेन तदात्मसमवेततादृशरक्तत्वाभावप्रकारकज्ञानत्वादिना प्रतिबन्धकत्वं कल्प्यमिति पुरुषभेदेनाऽनन्तप्रतिबध्यप्रतिबन्धकभावकल्पनापत्तिः, अतः प्रतिबन्धकत्वकल्पनापेक्षया लाघवात्समवायेन विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य समवायेन हेतुतायां संशयान्यत्वप्रवेशः समुचित–इत्यपि परास्तम् । निश्चयत्वेन हेतुत्वे रक्तदण्डवद्भूतलवानित्यादिविशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकप्रकारकज्ञानस्य भूतलाद्यनन्तविषयभेदेनानन्तहेतुतायां रक्तत्वाभावाप्रकारकत्वादिरूपनिर्णयत्वनिवेशेन विशेष्यविशेषणभावे विनिगमनाविरहेणानन्तकार्यकारणभावापत्तेः । न च मन्मतेऽपि रक्तदण्डवद्भूतलवानिति विशिष्टवैशिष्ट्यबोधहेतुतायां दण्डत्वधर्मितावच्छेदकरक्तत्वाभावप्रकारकान्यत्वरूपसंशयान्यत्वं न निवेश्यते रक्तत्वविशिष्टवैशिष्ट्यबोधीयाया विषयताया एव कारणतावच्छेदककोटिप्रवेशात् रक्तांशे संशये च तथाविधविषयताया अभावेनैवापत्त्यसम्भवात् इति वाच्यम् । विशकलितोपस्थितिमूलकाद्रक्तदण्डवद्भूतलमित्यादिज्ञानादपि रक्तदण्डवद्भूतलवानित्यादिविशिष्टवैशिष्ट्यबोधोदयेन रक्तदण्डवद्भूतलमित्येतादृशवैशिष्टवैशिष्ट्यबोधत्वादिना कारणतायाः कल्पयितुमशक्यत्वात्, तथाच

तादृशसंशयाद्रक्तदण्डवद्भूतलवान् देश इत्याकारकविशिष्टवैशिष्ट्यबोधवारणाय रक्तत्वांशे निर्णयत्वनिवेशस्यावश्यकत्वमिति ।

अथ विशिष्टवैशिष्ट्यबोधं प्रति विशेषणतावच्छेदकाभावप्रकारकज्ञानस्य प्रतिबन्धकत्वे भिन्नविषयकानुमित्यादिकं प्रति इच्छाघटितविशिष्टवैशिष्ट्यबोधसामग्र्याः प्रतिबन्धकतायामिच्छाविशिष्टेतरकारणविशिष्टदण्डत्वधर्मितावच्छेदककरक्तत्वप्रकारकज्ञानत्वादिना प्रतिबन्धकत्वं कल्प्यं, तत्र च तादृशज्ञानाभावसामानाधिकरण्येन रक्तत्वप्रकारकज्ञाने इच्छायामितरकारणे च वैशिष्ट्यं निवेश्यत इत्यत्र विनिगमनाविरहेण प्रतिबध्यप्रतिबन्धकभावबाहुल्यम् , मन्मते पुनरिच्छाविशिष्टरक्तत्वाभावप्रकारकदण्डत्वधर्मितावच्छेदककरक्तत्वप्रकारकज्ञानत्वेन तथात्वं कल्प्यम् , तथाच रक्तत्वाभावाप्रकारकत्वस्य रक्तत्वप्रकारकज्ञानेतराविशेषणत्वेनाप्यसम्भवेन विनिगमकमस्तीति लाघवम् । न च मन्मतेऽपि सामग्र्याः प्रतिबन्धकतायां निर्णयत्वावच्छिन्नस्यैव निवेशोऽभ्युपेयते, नतु रक्तत्वाभावप्रकारकज्ञानाभावस्येति वाच्यम् । रक्तो दण्डो नवेति संशयानन्तरं रक्तदण्ड इति निर्णयसत्त्वे विशिष्टवैशिष्ट्यबोधोत्पादे भवन्मते संशयेन प्रतिबन्धात् विशिष्टवैशिष्ट्यबोधानुदयात् अनुमित्यादेरेवोत्पत्त्या व्यभिचारादिति चेन्न ।

तथापि विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुत्वे परामर्शादिकारणतायां व्याप्त्याद्यंशे निर्णयत्वनिवेशेनानुमितिसामग्र्याः प्रतिबन्धकतायां । तादृसामग्रीघटकविशिष्टपरामर्शादौ व्याप्त्यभावाप्रकारकत्वादेः प्रवेशेन च गौरवात् , मन्मते तत्र विशिष्टवैशिष्ट्यविषयत्वाभावेनैवोपपत्तौ तदंशे निर्णयत्वानिवेशात् , भवन्मते पूर्वोक्तदिशा संशयेऽपि तादृशविषयतासत्त्वे बाधकाभावेन तादृशविषयतानिवेशेऽपि निर्णयत्वनिवेशं विनाऽनुपपत्तेः । न च भवन्मतेऽपि विशेषणतावच्छेदकनिर्णयकालीनेच्छाजन्यसंशयस्य विशिष्टवैशिष्ट्यावगाहित्वे बाधकाभाव इति वाच्यम् । मन्मते विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावस्य कार्यकालवृत्तितया विशिष्टवैशिष्ट्यबोधहेतुत्वाभ्युपगमात् संशयोत्पत्तिकाले तदभावासत्त्वादेव तस्य विशिष्टवैशिष्ट्यावगाहित्वानुपपत्तेः । अपरं च विशेषणतावच्छेदकसंशयस्याप्रतिबन्धकत्वे दण्डो न रक्त इत्याकारकशाब्दबोधसामग्रीकाले तादृशशाब्दबोधेच्छासत्त्वे रक्तदण्डवानिति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षवारणाय तादृशसामग्र्यास्तथाविधप्रत्यक्षप्रतिबन्धकबोधसामग्रीकाले दण्डत्वधर्मितावच्छेदककरक्तत्वाभावप्रकारकयोग्यताज्ञानस्य नियमतः सत्त्वात्तत्प्रतिबन्धकत्वेनैवोपपत्तेस्तथाविधसामग्र्याः प्रतिबन्धकत्वाकल्पनात् ।

अथ मन्मतेऽपि तदानीं विशेषणतावच्छेदकनिर्णयसत्त्वे तादृशशा-

ब्दबोधप्रतिबन्धकबाधबुद्धेरेव सत्त्वात् शाब्दसामग्र्येव नास्ति । न च दण्डत्वसामानाधिकरण्येन रक्तत्वनिर्णयस्य दण्डत्वसामानाधिकरण्येन रक्तत्वाभावशाब्दबोधाप्रतिबन्धकत्वात् दण्डत्वसामानाधिकरण्येन रक्तत्वनिर्णयकाले रक्तत्वाभावज्ञानसत्त्वे च सामानाधिकरण्येन रक्तत्वाभावशाब्दबोधस्यैवोत्पत्तिरिति वाच्यम् । तदानीं विशिष्टवैशिष्ट्यबोधे दण्डत्वसामानाधिकरण्येन रक्तत्वभाने बाधकाभावात् दण्डत्वसामानाधिकरण्येन रक्तत्वावगाहिविशिष्टवैशिष्ट्यबुद्धिं प्रति अवच्छेदकावच्छेदेन रक्तत्वाभावज्ञानस्यैव प्रतिबन्धकताया भवता वाच्यत्वात् दण्डत्वसामानाधिकरण्येन रक्तत्वाभावशाब्दबोधसामग्र्या दण्डत्वसामानाधिकरण्येन रक्तत्वावगाहिविशिष्टवैशिष्ट्यबोधप्रतिबन्धकत्वकल्पनस्य भवतोऽप्यावश्यकत्वात् । दण्डत्वावच्छिन्नविशिष्टवैशिष्ट्यबोधजनकस्य दण्डत्वावच्छेदेन रक्तत्वप्रकारकनिर्णयस्य सत्त्वे तु बाधात् शाब्दबोध एव नोत्पद्यत इति चेन्न ।

शाब्दबोधे योग्यताज्ञानस्य हेतुतामते बाधबुद्धेः प्रतिबन्धकत्वकल्पनात् दण्डो रक्त इति ज्ञानकाले भिन्नेन्द्रियादिजन्ये च कथंचित् दण्डत्वावच्छेदेन रक्तत्वाभावज्ञाने शाब्दसामग्रीकाले दण्डो न रक्त इति शाब्दबोधस्यैवोदयात्तत्र रक्तदण्डवानिति विशिष्टवैशिष्ट्यबोधवारणाय दण्डत्वावच्छेदेन रक्तत्वाभावशाब्दसामग्र्यास्तादृशविशिष्टवैशिष्ट्यबोधे प्रतिबन्धकत्वकल्पनस्य भवतोऽप्यावश्यकत्वात् । न च तदानीं बाधेन प्रतिबन्धादेव न विशिष्टवैशिष्ट्यबोधः स्यादिति वाच्यम् । लौकिकसन्निकर्षजन्यज्ञानस्य बाधसामान्याप्रतिबध्यतया आनुमानिकादियोग्यताज्ञानघटितसामग्रीकाले लौकिकसन्निकर्षजन्यविशिष्टवैशिष्ट्यबोधस्य संशयात्मकयोग्यताज्ञानानन्तरं रक्तो दण्ड इति निर्णये शाब्दबोधसकलकारणसमवधाने च विशिष्टवैशिष्ट्यबोधस्य चापत्तिवारणाय तादृशसामग्रीप्रतिबन्धकताया आवश्यकत्वात् । न च तादृशशाब्दसामग्रीकाले रक्तो दण्ड इत्याकारकप्रत्यक्षवारणाय विशेष्ये विशेषणमिति रीत्या रक्तदण्डवानित्याकारकप्रत्यक्षस्य च वारणाय शाब्दसामग्र्याः प्रतिबन्धकताया आवश्यकत्वे सर्वसाधारणदण्डत्वधर्मितावच्छेदकरक्तत्वप्रकारकप्रत्यक्षत्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वाभ्युपगमाद्विशिष्टवैशिष्ट्यबोधस्यापत्त्यसम्भवात् विशिष्टवैशिष्ट्यबोधं प्रति प्रतिबन्धकत्वान्तरं मयापि न कल्प्यते इति वाच्यम् । दण्डत्वावच्छिन्नमुख्यविशेष्यकरक्तत्वप्रकारकज्ञानं जायतामित्याकारकेच्छाया उत्तेजकत्वानुरोधात् रक्तत्वप्रकारकदण्डत्वावच्छिन्नमुख्यविशेष्यकज्ञानत्वस्यैव रक्तो दण्ड इत्या-

कारकज्ञानापत्तिवारकप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकत्वस्वीकारात्तादृशप्रतिबध्यप्रतिबन्धकभावेन विशिष्टवैशिष्ट्यबोधापत्तिवारणासम्भवात् । मुख्यविशेष्यताया अनिवेशे किञ्चिद्विशेष्यकरक्तदण्डप्रकारकं ज्ञानं जायतामित्याकारकेच्छाधीने तादृशशाब्दसामग्रीकालीने रक्तदण्डवानितिबोधे पूर्वोक्तेच्छाविरहविशिष्टशाब्दसामग्र्यभावस्य व्यभिचारात् । एतादृशेच्छाया अपि तत्रैवोत्तेजकत्वे पुरुषादिभासकसामग्र्यसत्त्वे तादृशेच्छाबलात् रक्तो दण्ड इति प्रत्यक्षप्रसङ्गात् । एवं विशेष्ये विशेषणमिति रीत्या जायमानतादृशप्रत्यक्षस्थलीयप्रतिबन्धकतयापि न विशिष्टवैशिष्ट्यबोधापत्ति वारणं सम्भवति, विशेष्ये विशेषणमिति रीत्या बोधो जायतामित्येतादृशेच्छायास्तत्रतत्रोत्तेजकताया आवश्यकत्वेन तादृशेच्छां विनापि विशिष्टवैशिष्ट्यावगाहित्वप्रकारकेच्छाधीनविशिष्टवैशिष्ट्यबोधोदयेन व्यभिचारात्तद्वारणाय विशिष्टवैशिष्ट्यबोधीयविषयताशून्यतादृशावच्छेद्यावच्छेदकभावापन्नविषयताशालिप्रत्यक्षत्वस्य तद्व्यावृत्तविलक्षणविषयताशालिप्रत्यक्षत्वस्य वा तादृशेच्छाविरहविशिष्टसामग्रीप्रतिबध्यतावच्छेदकताया आवश्यकत्वात् । विशिष्टवैशिष्ट्यावगाहित्वप्रकारकेच्छाया अपि तत्रोत्तेजकत्वे विशेषणतावच्छेदकप्रकारकनिर्णयशून्यकाले तादृशेच्छाबलात् रक्तदण्डवानिति बोधापत्तिः, तथाच विशिष्टवैशिष्ट्यावगाहित्वप्रकारकेच्छामुत्तेजकीकृत्य विशिष्टवैशिष्ट्यबोधे स्वतन्त्रप्रतिबध्यप्रतिबन्धकभावकल्पनमावश्यकमेव । एतादृशविशिष्टवैशिष्ट्यबोधेच्छाघटितविशिष्टवैशिष्ट्यबोधात्मकप्रत्यक्षसामग्रीकाले दण्डो न रक्त इति शाब्दबोधवारणाय तादृशशाब्दबोधं प्रति तथाविधसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवम्, मन्मते च तादृशशाब्दसामग्रीकाले योग्यताज्ञानघटितविशिष्टवैशिष्ट्यबोधसामग्र्या अभावेन तादृशविशिष्टवैशिष्ट्यबोधसामग्रीकाले च योग्यताज्ञानघटिततादृशशाब्दसामग्र्या असत्त्वेन तादृशसामग्र्योर्मिलनासम्भवात् तथाविधप्रतिबध्यप्रतिबन्धकभावस्याकल्पनात् ।

अथ यदि बाधबुद्धेः शाब्दसाधारणपरोक्षज्ञानत्वावच्छिन्नं प्रति प्रतिबन्धकत्वं कल्प्यते, तदा विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुतामतेऽपि दण्डत्वावच्छेदेन रक्तत्वावगाहिरक्तदण्डवानितिविशिष्टवैशिष्ट्यबोधसामग्र्या दण्डो न रक्त इति शाब्दसामग्र्याश्च मिलनासम्भवात्तादृशप्रतिबध्यप्रतिबन्धकभावाकल्पनान्न गौरवावकाश इति चेन्न ।

मास्त्वेवं गौरवम्, तथापि रक्तत्वाभाववद्दण्डवानित्याकारकविशिष्टवैशिष्ट्यावगाहिमानसादिगोचरेच्छाविशिष्टतादृशविशिष्टवैशिष्ट्यबोधात्मकमानससामग्रीकाले रक्तदण्डवान्पुरुष इत्याकारकचाक्षुषादिविशिष्टवैशि-

ष्ट्यबोधवारणाय तादृशविशिष्टवैशिष्ट्यावगाहिचाक्षुषत्वप्रकारकेच्छाविरहविशिष्टतादृशविशिष्टवैशिष्ट्यावगाहिमानसत्वप्रकारकेच्छाविशिष्टतादृशमानससामग्र्यादेस्तादृशचाक्षुषं प्रति प्रतिबन्धकत्वकल्पने गौरवं दुर्वारमेव, मन्मते तु रक्तत्वाभाववद्दण्डवान्पुरुष इत्याकारकविशिष्टवैशिष्ट्यबोधसामग्र्याः रक्तत्वाभाववान् दण्ड इत्याकारकविशेषणतावच्छेदकप्रकारकज्ञानघटिततया तादृशसामग्रीकाले तदापत्त्यसम्भवात्तस्यास्तत्र प्रतिबन्धकत्वाकल्पनात् । न च तादृशविशिष्टवैशिष्ट्यबोधस्तदा बाधेनैव प्रतिबध्यत इति तत्सामग्र्याः प्रतिबन्धकत्वं न कल्प्यत इति वाच्यम् । लौकिकसन्निकर्षजन्यतादृशज्ञानस्य बाधसामान्याप्रतिबध्यत्वात्, आनुमानिकादिरक्तत्वाभावप्रकारकज्ञानकाले तदापत्तिरिति प्रागेवोक्तत्वात् । न च रक्तो दण्ड इत्याकारकनिर्णयघटितायां रक्तदण्डवानित्याकारकविशिष्टवैशिष्ट्यबोधसामग्र्यां रक्तत्वाभाववद्दण्डवानित्याकारकबोधसामग्र्येव नास्ति तत्र रक्तो दण्ड इति ज्ञानस्य बाधमुद्रया प्रतिबन्धकत्वादिति वाच्यम् । इच्छाकाले बाधसत्वेऽपि आहार्यप्रत्यक्षोदयादिच्छाविरहविशिष्टबाधबुद्धेरेव च मानसादिप्रतिबन्धकत्वात् तदानीमिच्छासत्वेन बाधबुद्धेरकिञ्चित्करत्वात् ।

अथ चवं संशयस्य प्रतिबन्धकतावादिनये रक्तदण्डवानिति विशिष्टवैशिष्ट्यबोधे रक्तत्वाभावहेतुकदण्डपक्षकानुमितिसामग्र्याः प्रतिबन्धकत्वं न कल्प्यते, तत्र तादृशसामग्रीकाले रक्तत्वाभावप्रकारकज्ञानस्यावश्यं सत्त्वेन तत एव तादृशविशिष्टवैशिष्ट्यबोधवारणसम्भवात् । अथ गुरुत्ववद्द्रव्यवान् देश इत्याद्यतीन्द्रियविशेषणतावच्छेदकविशिष्टवैशिष्ट्यबोधस्थले गुरुत्वाभाववद्द्रव्यवानिति विशिष्टवैशिष्ट्यबोधसामग्रीकाले बाधेनानुमितिप्रतिबन्धादेव तादृशविशिष्टवैशिष्ट्यबोधवारणे तादृशसामग्र्याः प्रतिबन्धकताया निर्णयत्वेन हेतुतावादिनाप्यकल्पनात् उक्तगौरवानवकाशात् तत्र तथाविधनिर्णयत्वेन हेतुत्वमेवोचितम्, अन्यथाऽनुमित्यादिकं प्रति विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावघटितविशिष्टवैशिष्ट्यबोधसामग्रीत्वेन प्रतिबन्धकत्वकल्पनापत्त्या पूर्वोक्तगौरवादिति । न च भवन्मते यत्र विशेषणतावच्छेदकसंशयोत्तरक्षणे विशेषणतावच्छेदकनिर्णयो जातः तद्द्वितीयक्षणेऽननुगतानुमित्सादिसत्त्वेनानुमित्युत्पत्तये तत्कालीनानुमित्सादीनां प्रत्यक्षेच्छाविशिष्टविशिष्टवैशिष्ट्यबोधसामग्रीप्रतिबन्धकतायामुत्तेजकत्वं त्वया स्वीकरणीयमिति गौरवम्, मम तु तदा विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावघटितविशिष्टवैशिष्ट्यबोधसामग्र्यभावादेवोपपत्तेस्तादृशेच्छानामुत्तेजक-

त्वानभ्युपगमात् तत्रानुमित्सोत्पत्तिक्षणे विशेषणतावच्छेदकसंशयस्य नाशात् तादृशसंशयाभावघटितविशिष्टवैशिष्ट्यबोधसामग्र्या अपि सत्त्वेन तादृशेच्छायामुत्तेजकत्वमुभयवादिसिद्धमिति नाशङ्कनीयम्, अपेक्षाबुद्ध्यात्मकसंशयस्थले तादृशानुमित्सोत्पत्तिक्षणे तत्सत्त्वात्तादृशानुमित्सादीनामुत्तेजकत्वाकल्पनेन मन्मते न लाघवस्यापहारः, ज्ञानेच्छयोर्यौगपद्याभ्युपगमे तादृशसंशयोत्पत्तिद्वितीयक्षणेऽनुमित्यादिगोचरेच्छाविशेषणतावच्छेदकनिर्णयोत्पत्तौ तु तदव्यवहितोत्तरक्षणेऽनुमित्याद्युत्पत्तिस्तदनुरोधेन तादृशेच्छाया भवन्मते एवोत्तेजकत्वात् मन्मते लाघवस्यातिस्फुटत्वादिति वाच्यम् । यत्र विशेषणतावच्छेदकसंशयकाले विशेषणतावच्छेदकनिर्णयविशिष्टवैशिष्ट्यावगाहिचाक्षुषादिगोचरेच्छायाः समवधानम्, अननुगतघटमानसादिगोचरेच्छा तन्मानससामग्री च समवहिता, तदा भवन्मते घटमानसोदयात् अनुमितिसामग्र्याः प्रतिबन्धकतायां तत्तन्मानसेच्छानामुत्तेजकत्वेन भवन्मते गौरवात्, अस्मन्नये च तदानीं विशिष्टवैशिष्ट्यावगाहिचाक्षुषादेरेवोत्पत्त्या तादृशमानसानुदयेन तथाविधेच्छाया उत्तेजकत्वानभ्युपगमात् । एवं तदानीमनुमितिवारणाय तादृशमानसेच्छाविशिष्टमानससामग्र्या अनुमितिं प्रति प्रतिबन्धकत्वकल्पने गौरवम्, अस्मन्मते तु विशिष्टवैशिष्ट्यावगाहिचाक्षुषसामग्र्याः प्रतिबन्धकत्वादेवानुमितिवारणादिति चेन्न ।

तादृशस्थले एतादृशलाघवविरहेऽपि विशेषणतावच्छेदकप्रकारकनिर्णयत्वेन हेतुत्वे पूर्वोक्तविनिगमनाविरहप्रयुक्तगौरवेण विशेषणतावच्छेदकाभावप्रकारकज्ञानप्रतिबन्धकत्वस्यैवोचितत्वात् । न च प्रागेवोक्तसंशयप्रतिबन्धकत्वमते विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावघटितविशिष्टवैशिष्ट्यबोधसामग्र्याः प्रतिबन्धकत्वकल्पने गौरवमिति वाच्यम् । तादृशसामग्रीप्रतिबन्धकतायां विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावानिवेशे क्षतिविरहात् । न च विशेषणतावच्छेदकसंशयकालीनानुमितौ व्यभिचार इति वाच्यम् । अनुमित्साकालेऽनुमित्युत्पत्त्या इच्छाविशिष्टवैशिष्ट्यबोधसामग्रीरूपप्रतिबन्धकाभावस्य व्यभिचारवारणायेच्छाया उत्तेजकत्वकल्पनापेक्षया लाघवात्तादृशसामग्र्या उत्तरज्ञानत्वस्यैव कार्यतावच्छेदकत्वाभ्युपगमात् तादृशसंशयकालीनज्ञाने व्यभिचाराभावात् । न च तादृशविशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावेतरकारणसमुदायोत्तरोत्पन्नस्य तथाविधसंशयकालीनज्ञानस्य तादृशसामग्र्यभावजन्यतावच्छेदकानाक्रान्तस्य प्रसिद्ध्या विशिष्टवैशिष्ट्यबोधसामग्र्युत्तरमपि तदापत्तिरिति वाच्यम् । अनुमित्साविशिष्टानुमि-

त्यादीनामिव ताद्दृशविशेषणतावच्छेदकाभावप्रकारकज्ञानाभावविशिष्ट-ज्ञानस्यापि स्वतन्त्रहेतुताकल्पनेनापत्त्यभावात्। न च ताद्दृशस्वतन्त्र-हेतुताकल्पनाधिक्याद्गौरवमित्याशङ्कनीयम्। भवन्मते गौरवस्यातिस्फुट-त्वात् ताद्दृशसामग्रीप्रतिबन्धकतायां निर्णयत्वनिवेशाद्विनिगमनाविरहेण सामग्रीप्रतिबन्धकतायाँ बाहुल्यादिति संशयोत्तरोत्पन्ननिर्णयद्वितीयक्षणे फलाय निर्णयत्वेन हेतुत्वं नियुक्तिकमेव।

इदं पुनरवधेयम्। वह्निव्याप्यधूमवत्पर्वतवानिति विशिष्टवैशिष्ट्य-बोधे विषयमनिवेश्य ज्ञानत्वेनात्मत्वेनैव वा हेतुता। न च घटादिज्ञाना-दपि ताद्दृशविशिष्टवैशिष्ट्यबोधापत्तिः धूमलिङ्गकानुमित्यादौ वह्निव्या-प्यधूमवत्तानिर्णयत्वेन हेतुतायाः क्लृप्तत्वात्, तत्र चान्यलिङ्गकानुमितौ व्यभिचारवारणाय ताद्दृशनिर्णयविशिष्टत्वस्यावश्यं निवेशनीयतया सर्व-त्र व्यभिचारवारणसम्भवेनानुमितित्वस्य वह्निविधेयकत्वपर्वतोद्देश्य-त्वादेश्च निवेशे प्रयोजनाभावात्। ताद्दृशनिर्णयविशिष्टत्वं तज्जन्यतावच्छे-दकमास्थीयते ताद्दृशनिर्णयस्य विशेषसामग्रीत्वात्। रक्तदण्डवान् पुरुष इत्यस्यापि स्थानान्तरक्लृप्तेनैव निर्वाहः। यदि दण्डो रक्तत्वाभाववान् स्यादित्यापत्तिं प्रति दण्डो रक्त इति दण्डो रक्तत्वाभावाभाववानिति वा आपाद्यव्यतिरेकज्ञानं कारणम्, तदा व्यभिचारभिया रक्तो दण्ड इति निर्णयविशिष्टत्वावच्छिन्नं प्रति निर्णयत्वेन हेतुता, इत्थं च ताद्दृशविशि-ष्टवैशिष्ट्यबोधस्यापि तज्जन्यतावच्छेदकाक्रान्ततया तत्र ताद्दृशनि-र्णयकल्पनाविरहादिति। विशिष्टवैशिष्ट्यविषयता च विशेष्ये विशेषण-मिति विषयताव्याप्या, विशिष्टवैशिष्ट बोधसामग्रीकाले विशेषणज्ञा-नाऽसंसर्गाऽग्रहादिघटिताया विशेष्ये विशेषणमित्येताद्दृशविषयताशा-लिज्ञानसामग्र्या अवश्यं सम्भवादिति बहवः।

केचित्तु दण्डो रक्तो नवेति संशयकाले रक्तदण्डवानिति विशिष्टवै-शिष्ट्यबोधो विशेष्ये विशेषणमिति रीत्यापि न जायते, दीधितिकृतापि रक्तदण्डवानित्येताद्दृशज्ञानानुदयादित्येवोक्तम्, तथाच ताद्दृशबोधे संश-यस्य प्रतिबन्धकत्वमुपेयम्, इत्थं च दण्डो रक्तो नवेति संशयद्वितीयक्षणे दण्डो रक्त इत्याकारकस्मरणादिसत्त्वे तृतीयक्षणे विशेष्ये विशेषणमित्ये-ताद्दृशविषयताशून्य एव रक्तदण्डवानिति बोध उत्पद्यत इति न ताद्दृश-विषयतयोर्व्याप्यव्यापकभावः सम्भवति। नच ताद्दृशसंशयप्रतिबन्धक-तायां निर्णयस्योत्तेजकत्वं कल्प्यम्, गौरवात्। न च विशेष्ये विशेषणमिति विषयताया व्यापकतानभ्युपगमे रक्तदण्डाभाववान् पुरुष इत्यादिबाध-दशायां विशिष्टवैशिष्ट्यबोधोत्पत्तिवारणाय विशिष्टवैशिष्ट्यबोधं प्रति

बाधबुद्धेः प्रतिबन्धकत्वान्तरकल्पने गौरवम्, तादृशविषयताया व्यापकत्वे
तादृशविषयताशालिज्ञानं प्रति बाधबुद्धेः प्रतिबन्धकतायाः क्लृप्तत्वात्
तत एवोपपत्तेः स्वतन्त्रप्रतिबन्धकतायाः अकल्पनादिति वाच्यम् । उभ-
यसाधारणरक्तत्वप्रकारतानिरूपितदण्डप्रकारताया अवच्छेदकत्वेनैवोप-
पत्तौ तदव्यापकत्वेऽपि स्वतन्त्रप्रतिबन्धकताया अकल्पनात् । न च द-
ण्डो रक्तो नवेति संशयानन्तरं विशेष्ये विशेषणमिति रीत्या रक्तदण्डवा-
निति ज्ञानाभ्युपगमे क्षतिविरहेण तत्र संशयस्य प्रतिबन्धकत्वमेव नास्ति,
दीधितिस्थज्ञानपदं तु विशिष्टवैशिष्ट्यज्ञानपरमेवेति वाच्यम् । तादृशबो-
धं प्रति संशयस्याविरोधित्वे रक्तत्वाभावविशिष्टदण्डादिपक्षकानुमिति-
सामग्र्या विशेष्ये विशेषणमिति रीत्या बोधस्य प्रतिबन्धकत्वाकल्पनात्
तथाविधसंशयस्य उभयप्रकारकत्वेन न विरोधिता, किन्तु रक्तत्वाभाव-
प्रकारकज्ञानत्वेन, तथाच तादृशसामग्रीकाले रक्तत्वाभावप्रकारकज्ञान-
स्यावश्यकतया तत्प्रतिबन्धकतयैवोपपत्तौ सामग्रीप्रतिबन्धकताया अ-
कल्पने क्षतिविरह इति । न च तस्य रक्तत्वाभावप्रकारकज्ञानत्वेन विरो-
धित्वे आनुमानिकादिरक्तत्वाभावप्रकारकनिर्णयदशायां रक्तदण्डवानि-
त्याकारकलौकिकप्रत्यक्षानुदयापत्तिरिति वाच्यम् । विशेष्ये विशेषणमि-
ति रीत्या बोधे संशयस्य प्रामाणिकतया प्रतिबन्धकत्वकल्पनाया अनर्ह-
त्वात्, तथाच विशिष्टवैशिष्ट्यबोधसाधारणरक्तत्वप्रकारतानिरूपितद-
ण्डप्रकारताशालिज्ञानत्वमेव प्रतिबध्यतावच्छेदकमस्तु । न च संशया-
नन्तरोत्पन्ननिश्चयद्वितीयक्षणे विशिष्टवैशिष्ट्यबोधोऽपि न भवतीति तादृ-
शविषयतयोर्व्याप्यव्यापकभावोऽप्यक्षत एवेति वाच्यम् ।तदानीं रक्तद-
ण्डवानित्येतादृशज्ञानस्य प्रामाणिकतया अपलापानर्हत्वात् । तदानीं
तस्यानभ्युपगमे निर्णयत्वेन विशिष्टवैशिष्ट्यबोधं प्रति हेतुताया निर्युक्ति-
कतया विशिष्टवैशिष्ट्यबोधेऽनुमितिलक्षणातिव्याप्तिशङ्काया असङ्गमापत्तेः।
न च विशिष्टवैशिष्ट्यबोधसाधारणतादृशज्ञानत्वस्य संशयप्रतिबध्यतावच्छे-
दकत्वे निर्णयत्वेन हेतुत्वं निर्युक्तिकम्, अप्रामाण्यज्ञानास्कन्दितसंशय-
काले विशेष्ये विशेषणमित्येतादृशविषयताशालिबोधोदयेनाप्रामाण्यज्ञाना-
स्कन्दितसंशयस्यैव प्रतिबन्धकतयाऽप्रामाण्यज्ञानास्कन्दितसंशयकाले
विना निर्णयं विशिष्टवैशिष्ट्यबोधापत्तिवारणाय विशिष्टबोधे निर्णयत्वेन
हेतुताया आवश्यकत्वादिति न मे ग्रन्थासङ्गतिरिति वाच्यम् । एतादृश-
युक्त्या निर्णयत्वेन हेतुत्वे ध्रुवे संशयस्य प्रतिबन्धकताभ्युपगमे प्रयोजन-
विरहात् । अथ संशयानन्तरं निर्णयद्वितीयक्षणे फलाभ्युपगमेऽप्रामाण्य-
ज्ञानमुत्तेजकीकृत्य रक्तत्वाभावप्रकारकज्ञानस्य स्वातन्त्र्येण प्रतिबन्धक-

तायाः कल्पयितुमुचितत्वात् निर्णयत्वेन हेतुत्वमकिञ्चित्करमिति चेन्न । संशयानन्तरं निर्णये सति फलापलापस्यानर्हत्वात्, तथाच विशिष्टवैशिष्ट्यबोधः प्रामाणिक एवेत्याहुः ।

केचित्तु तादृशबोधं प्रति संशयस्य रक्तत्वप्रकारकज्ञानत्वेनैव विरोधिता लाघवात्, रक्तत्वप्रकारकनिर्णयकाले च विशेष्ये विशेषणमित्येतादृशविषयताशून्यविशिष्टवैशिष्ट्यबोध उत्पद्यते, इत्थं च तादृशविषयताविरुद्धैव विशिष्टवैशिष्ट्यविषयता । न च रक्तत्वाभाववद्दण्डवानिति बोधे रक्तत्वाभावाभावप्रकारकज्ञानत्वापेक्षया लाघवेन रक्तत्वप्रकारकज्ञानत्वेनैव विरोधितायाः कल्पयितुमुचितत्वात् रक्तत्वाभाववद्दण्डवानिति बोध उभयविषयविषयताशाली स्यादिति कथनं विरुद्ध्यत इति वाच्यम् । रक्तत्वप्रकारकज्ञानत्वेन तथात्वे रक्तत्वाभावाभावत्वावच्छिन्नकोटिकरक्तत्वाभावसंशयकाले विशेष्ये विशेषणमिति रीत्या तादृशबोधवारणाय रक्तत्वाभावत्वावच्छिन्नप्रकारकज्ञानत्वेनापि प्रतिबन्धकत्वान्तरस्य कल्पनीयतया गौरवादुभयसाधारणरक्तत्वाभावप्रकारकज्ञानत्वेन विरोधिताया एव कल्पयितुमुचितत्वात्, तथाच संशयानन्तरं रक्तत्वाभाववान् दण्ड इति निर्णये सति विशिष्टवैशिष्ट्यबोधः, तादृशोभयसत्त्वे च विशेष्ये विशेषणमिति रीत्या न भवति प्रतिबन्धात् । अथ रक्तदण्डवानित्येतादृशबोधे रक्तत्वप्रकारकज्ञानविरोधित्वेन रक्तत्वाभावांशेऽप्रामाण्यज्ञानास्कन्दितरक्तत्वसन्देहकाले तादृशबोधानुदयापत्तिः, तदुपपत्तये च तादृशाप्रामाण्यग्रहस्य तत्रोत्तेजकत्वे तादृशाप्रामाण्यग्रहकालीनरक्तत्वनिर्णयजन्यविशिष्टवैशिष्ट्यबोधस्य विशेष्ये विशेषणमित्येतादृशविषयताशालित्वे बाधकाभावात्, एवं रक्तत्वाभाववति रक्तत्वप्रकारकत्वरूपाप्रामाण्यग्रहविषयीभूतरक्तत्वनिर्णयोत्तरोत्पन्नरक्तदण्डवानिति ज्ञानस्यापि विशिष्टवैशिष्ट्यविषयताशालित्वेन तत्र विशेष्ये विशेषणमित्येतादृशविषयतास्वीकारस्यावश्यकतया व्यभिचारः स्यात्तद्वारणाय रक्तत्वांशेऽप्रामाण्यज्ञानस्य रक्तत्वप्रकारकज्ञानप्रतिबन्धकतायामुत्तेजकत्वस्यावश्यकत्वात् रक्तो न वा दण्ड इत्येतादृशसंशये रक्तत्वांशेऽप्रामाण्यग्रहसत्त्वे विशेष्ये विशेषणमिति रीत्या बोधो न भवति, तदाऽप्रामाण्यग्रहाभावविशिष्टरक्तत्वप्रकारकज्ञानाभावसत्त्वात्तदापत्तिः, एवं द्विविधाऽप्रामाण्यग्रहस्योत्तेजकतया गौरवं च, रक्तत्वाभावप्रकारकज्ञानप्रतिबन्धकतायां तु रक्तत्वाभावांशेऽप्रामाण्यज्ञानस्यैव तथात्वेन लाघवमिति चेत् । रक्तत्वाभावांशेऽप्रामाण्यज्ञानास्कन्दितरक्तत्वाभावज्ञानत्वेन रक्तत्वाभावविशिष्टदण्डपक्षकानुमितिसामग्र्यादीनां च प्रतिबन्धकत्वाकल्पनेन लाघवात् । इत्थं च तादृशविषयता-

द्वयसामानाधिकरण्यं नोपपद्यत इति। अथ संशयस्य तादृशविषयताशालिज्ञानविरोधित्वे दण्डा रक्तो नवेत्यादिविशेषणसंशयाधीनस्य रक्तदण्डवान्न वेति विशिष्टवैशिष्ट्यबोधस्यानुपपत्तिरिति चेन्न। एवमपि तादृशबोधं प्रति रक्तत्वप्रकारकनिर्णयत्वेनैव विरोधित्वमस्तु, उक्तसामग्रीप्रतिबन्धकत्वाकल्पने लाघवात्, भवतामपि तादृशविषयतयोर्विरोधः स्यादेवेति प्राहुः।

अथ संशये निर्विकल्पोत्तरोत्पन्नज्ञानाद्विशेषणतावच्छेदकप्रकारकनिर्णयोत्तरोत्पन्नज्ञानस्य विलक्षणविषयतासत्वेनुभवविवादाद्विशिष्टवैशिष्ट्यविषयतायां मानाभावः।

अत्राहुः-विशिष्टवैशिष्ट्यविषयताभ्युपगमे परामर्शादिजनकतायामपि तादृशविषयतानिवेशात् व्याप्त्यंशे निर्णयत्वं न निवेश्यते इति लाघवेन तत्सिद्धिः। न च पूर्वोक्तरीत्या संशयात्मकविशिष्टवैशिष्ट्यबोधस्यापि प्रसिद्ध्या निश्चयत्वनिवेश आवश्यक इति वाच्यम्। एवमपि यत्र तादृशविषये व्याप्तिनिर्णयोत्तरमिच्छाधीनव्याप्यभावावगाहिसंशयकालेऽनुमितेरितरकारणसमवधानं नासीत्, तत्र निर्णयत्वानिवेशेन लाघवसम्भवात्, संशयस्य विरोधित्वाभ्युपगमे नैवानुपपत्तिगन्धोऽपीति संक्षेपः॥

इति विशिष्टवैशिष्ट्यबोधे विशेषणतावच्छेदकप्रकारकनिर्णयहेतुतावादवीचिः षष्ठः।

---

(७) विशेषणज्ञानहेतुतावादवीचिः।

अथ विशिष्टबुद्धिं प्रति विशेषणज्ञानहेतुतायां किं मानम्? विशेषणविशेष्येन्द्रियसन्निकर्षादित एव विशिष्टबुद्ध्युपपत्तेः। न च तस्याहेतुत्वे कदाचित्तत्प्रकारकं प्रत्यक्षं कदाचित्तद्विशेष्यकमित्यत्र नियामकाभाव इति वाच्यम्। तत्प्रकारकप्रत्यक्षेच्छाविरहविशिष्टविरोधिसामग्र्यभावादीनामेव तन्नियामकत्वात। न च विरोधिसामग्र्यादिशून्यकाले घटादिविशेष्यकघटत्वादिप्रकारकज्ञाने जायमाने नियमतो घटादिप्रकारकघटत्वादिविशेष्यकज्ञानापत्तिरिति वाच्यम्। विशेषणज्ञानहेतुत्वेऽपि घटघटत्वादिवि-

पथकनिर्विकल्पकाद्यनन्तरं घट इत्याद्याकारकज्ञानं यदा उत्पद्यते तदा घटादिप्रकारकज्ञानापत्तितादवस्थ्यात् । अननुगतनियामकं कल्पयित्वा तद्वारणे च विशेषणज्ञानहेतुताया अकिञ्चित्करत्वात् ।

यत्तु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वे ज्ञानलक्षणायाः हेतुत्वान्तरं न कल्प्यते तादृशकारणतयैवोपपत्तेः । न च निर्विकल्पकानन्तरं उपनीतभानवारणाय ज्ञानलक्षणायाः सप्रकारकज्ञानत्वेन पृथक्कारणत्वमावश्यकमिति वाच्यम् । निर्विकल्पकानन्तरमुपनीतभानाभ्युपगमे क्षतिविरहादिति ।

तदसत् । घटमुख्यविशेष्यकमानसोपनीतभानानुरोधेन ज्ञानलक्षणायाः हेतुत्वस्यावश्यकत्वात्, अन्यथा विशेषणज्ञानहेतुत्वेऽपि घटादिज्ञानशून्यज्ञानकाले घटमुख्यविशेष्यकमानसोपनीतभानापत्तेः। न च निष्प्रकारकविशेष्यतानिरूपकज्ञानस्याप्रसिद्ध्या घटत्वादिप्रकारकतादृशज्ञानमेवोत्पद्यते, तस्य च घटत्वादिरूपविशेषणज्ञानासत्त्वे तादृशकारणाभावादेव नापत्तिः, तत्सत्त्वे पुनरिष्टमेव तदिति वाच्यम् । घटत्वादिविषयकज्ञानसत्त्वेपि घटादिज्ञानं विना तदुपनीतभानस्यानिष्टत्वात्, घटत्वादिज्ञानदशायां च घटादिज्ञानस्याऽनावश्यकत्वात् । न च तदा घटत्वादिसामान्यज्ञानसत्त्वेन घटादिज्ञानासत्त्वेऽपि सामान्यप्रत्यासत्तिजन्यमेव घटादिज्ञानमुत्पद्यत इति कथं तदनिष्टमिति वाच्यम् । तत्सम्बन्धेन सामान्याश्रयप्रत्यक्षे तत्सम्बन्धेन सामान्यप्रकारकज्ञानस्यैव हेतुतया घटत्वविशेष्यकज्ञानकाले सामान्यप्रत्यासत्तिजन्यघटादिज्ञानानुदयात् । न च निर्विकल्पकसाधारणसामान्य ानहेतुतावादिनां नव्यानां मते घटत्वादिविशेष्यकज्ञानादपि घटादिप्रत्यक्षं जायत एवेति वाच्यम् । मन्मतेऽपि तदिन्द्रियकरणकतद्धर्मप्रकारकज्ञानसामग्रयन्तरस्य सामान्यलक्षणासहकारित्वात् घटज्ञानरूपघटोपनीतभानसामग्रीं विना तादृशज्ञानस्यानिष्टत्वात् ।

यत्तु विशेषणज्ञानस्याहेतुत्वे ज्ञानलक्षणाया लौकिकान्यघटादिविषयताशालिप्रत्यक्षत्वमेव जन्यतावच्छेदकं वाच्यं, मन्मते लौकिकान्यत्वमनिवेश्य घटादिविषयताशालिमानसत्वस्यैव तथात्वमभ्युपेयत इति लाघवम्, घटादिलौकिकमानसविरहेण व्यभिचाराभावात् । न च मन्मतेऽपि मानसत्वनिवेशान्न व्यभिचार इति वाच्यम् । भवन्मते घटादिज्ञानं विना घटादिगोचरचाक्षुषाद्युपनीतभानापत्तिवारणाय तत्साधारणप्रत्यक्षत्वस्यैव निवेशनीयत्वात् । विशेषणज्ञानहेतुतामते च चाक्षुषाद्युपनीतभानोपनीतस्य विशेषणतया विशेषणज्ञानजन्यतावच्छेदकानाक्रान्ततया

ज्ञानलक्षणाजन्यतावच्छेदककोटौ मानसत्वनिवेशेऽप्यनुपपत्त्यभावात् । न च तत्र विशेषणज्ञानस्य हेतुताकल्पनापेक्षया लौकिकान्यत्वस्य ज्ञान-लक्षणप्रत्यासत्तिजन्यतावच्छेदककोटौ निवेश एव समुचित इति वाच्यम् । लौकिकान्यत्वविषयतात्वयोरुद्देश्यतावच्छेदकतया तदवच्छिन्नांशे विषयता-या विषयताप्रत्यासत्त्या वा निवेशे विनिगमनाविरहेण कार्यकारणभावद्वय-स्याधिक्यादिति । तदप्यसत् । ज्ञानलक्षणाया विषयभेदेन कारणताभे-दे गौरवात्, विषयतामनिवेश्य विषयताप्रत्यासत्त्या एव कारणता-कल्पनात् । सुखादिविषयकलौकिकमानसे व्यभिचारवारणायलौकि-कान्यत्वनिवेशस्यावश्यकतया प्रत्यक्षत्वस्यैव जन्यतावच्छेदकत्वौचि-त्यात्, अन्यथा विशेषणज्ञानहेतुताया आधिक्येन गौरवात् । एवं सामान्यलक्षणाजन्यमानसे व्यभिचारवारणायाऽव्यवहितोत्तरत्वनि-वेशस्यावश्यकतया तत एव लौकिकसन्निकर्षजन्यज्ञाने व्यभिचा-रवारणसम्भवात् मन्मतेऽपि लौकिकान्यत्वं न निवेश्यत इत्य-स्यापि वक्तुं शक्यत्वात् ।

केचित्तु मानसोपनीतभाने मुख्यविशेष्यताया अनुगतनियामकान्त-रासम्भवेन मुख्यविशेष्यता ज्ञानसन्निकर्षजन्यतावच्छेदककोटावेव निवे-श्यते, इत्थं च मुख्यविशेष्यताघटितधर्मात्मकजन्यतावच्छेदकस्य बहि-रिन्द्रियजन्यज्ञानसाधारण्याभावात्तत्र विशेषणज्ञानहेतुत्वानभ्युपगमे ज्ञान-लक्षणाया हेतुत्वान्तरं कल्पनीयम्, मम तु विशेषणज्ञानहेतुतयैव निर्वाहः।

तदप्यशुद्धम् । निखिलघटादिमानसानां तन्मुख्यविशेष्यकत्ववारणा-याननुगतनियामककल्पनाया आवश्यकतया ज्ञानलक्षणाजन्यतावच्छेदक-कोटौ मुख्यविशेष्यतानिवेशे प्रयोजनाभावात् । न चाननुगतनियामकात्त-त्तद्व्यक्तित्वावच्छिन्नं प्रति तत्तद्व्यक्तित्वेनैव हेतुतया तादृशस्थलेमु-ख्यविशेष्यतानिवेशे ज्ञानलक्षणाजन्यतावच्छेदककोटावेव तन्निवेश्यते लाघवात्, ज्ञानलक्षणायां तन्मुख्यविशेष्यताशालिज्ञानजनने तत्त-द्व्यक्तीनामेव सहकारितेति नातिप्रसङ्ग इति वाच्यम् । एतादृशरीत्या-ऽतिप्रसङ्गवारणे आत्मन एव हेतुत्वान्तरं कल्पयित्वा तज्जन्यतावच्छेदक एव मुख्यविशेष्यतानिवेशौचित्यात्, विशेषणज्ञानज्ञानलक्षणप्रत्यासत्त्यो-र्हेतुताद्वयकल्पनापेक्षया ज्ञानलक्षणाया आत्मनश्च हेतुताकल्पनस्यैवोचि-तत्वात्, तद्विषयकज्ञानत्वापेक्षया आत्मत्वस्य हेतुतावच्छेदकत्वे लाघवा-त्, इत्थं च निखिलमानसानां मुख्यविशेष्यताशालित्वोपगमेऽपि मुख्य-विशेष्यताया ज्ञानप्रत्यासत्तिजन्यतावच्छेदककोटिनिवेशनमयुक्तमेवेति ।

केचित्तु विशिष्टबुद्धौ विशेषणज्ञानस्याहेतुत्वेऽप्रसिद्धसाध्यकपराम-

र्शात्पृथिव्यामितरभेद इत्याकारकसाध्यविशेष्यकानुमित्युत्पादकाले इतर-भेदप्रकारकानुमित्यापत्तिः, पृथिव्यामितरभेदः पृथिवीतरभेदवतीत्या-द्याकारकद्विविधविषयताशाल्यनुमितेरनुभवविरुद्धतया इष्टापत्तेरयुक्त-त्वादिति तद्धेतुत्वमावश्यकम्। न च तादृशानुमितावन्वयव्याप्त्यवगा-हिपरामर्शस्य हेतुतया तदभावादेव नापत्तिरिति वाच्यम्। व्यतिरे-कव्याप्त्यवगाहिपरामर्शादपि स्वातन्त्र्येण इतरभेदोपस्थितिदशायां सा-ध्यप्रकारकानुमित्युत्पादेन तादृशपरामर्शघटितसामग्र्यास्तथाविधानुमि-त्युत्पादस्यावश्यं स्वीकरणीयत्वात्। न च तत्रापि इतरभेदवि-शेष्यकैवानुमितिरुत्पद्यते नतु तत्प्रकारिकेति वाच्यम्। साध्यविशेष्यकानु-मितौ साध्यप्रसिद्धेर्विरोधित्वात्, अन्यथा उभयपरामर्शदशायां द्विविध-विषयताशाल्यनुमित्यापत्तिरित्याहुः।

तदप्यसत्। एतादृशयुक्त्या विशिष्टानुमितित्वावच्छिन्नं प्रत्येव तद्धे-तुतायाः कल्पयितुं युक्तत्वात् प्रत्यक्षादिविशिष्टबुद्धौ विशेषणज्ञानहेतुत्वा-सिद्धेः। न च विशिष्टानुमितित्वं विशिष्टानुभवत्वं वा जन्यतावच्छेदकम् इत्येतादृशविनिगमनाविरहेणैव प्रत्यक्षादावपि तज्जन्यत्वमायास्यतीति वाच्यम्। विशिष्टानुभवत्वस्य तथात्वे निर्विकल्पककल्पनागौरवात्, अ-न्यथा प्राथमिकविशिष्टप्रत्यक्षे व्यभिचारात्।

वस्तुतस्तु पृथिवीतरभेदवतीत्याद्याकारकानुमितिर्विशिष्टवैशिष्ट्या-न्येव प्रसिद्धसाध्यक परामर्शादापादनीया, तत्र च विशेषणताव-च्छेदकप्रकारकज्ञानस्य हेतुत्वात्तदभावादेव नापत्तिः। न च यत्रेतरभेद-त्वप्रकारेण घटज्ञानं तत्र व्यतिरेकपरामर्शात्पृथिवीतरभेदवतीत्याकारका-नुमित्यापत्तिः विशेषणतावच्छेदकप्रकारकज्ञानस्य सत्त्वादिति वाच्यम्। इष्टत्वात्। न च तत्र साध्यप्रसिद्ध्यभावेन साध्यविशेष्यकानुमितिसाम-ग्र्या अपि सत्त्वात् द्विविधविषयताशाल्यनुमित्यापत्तिरिति वाच्यम्। सा-ध्यप्रसिद्धेः साध्यतावच्छेदकप्रकारकज्ञानत्वेनैव प्रतिबन्धकत्वकल्पनात्। अत एव भेदत्वादिप्रकारेण घटाद्यवगाहिप्रसिद्धेरपि इतरभेदत्वावच्छिन्न विशेष्यकानुमितिविरोधित्वम्, तस्माद्विशेषणज्ञानस्य विशिष्टबुद्धिहेतुत्वम्, निर्विकल्पकात्मकज्ञानं चाप्रामाणिकमेवेति।

अत्राहुः। जातित्वादिना घटत्वादिप्रकारकजातिमानित्यादिज्ञानीय-घटत्वप्रकारतातः स्वरूपतो घटत्वाद्यवगाही घट इत्याकारकज्ञानीय-घटत्वादिप्रकारताया वैलक्षण्यमनुभवसिद्धमेव, तादृशविलक्षणप्र-कारता च यदि तत्प्रकारकज्ञानसामग्रीमात्रनियम्या, तदा जातिमानि-त्याकारकज्ञानकाले तादृशप्रकारताशालिज्ञानोत्पत्तौ बाधकाभावात्

केवलं जातिमानित्याकारकं ज्ञानं कदापि न स्यात्, स्याच्च जातिमान्घट इत्याद्याकारकमेव, तस्मात्तादृशविलक्षणघटत्वादिप्रकारताशालिबुद्धिं प्रति विशेष्यताभिन्नघटत्वादिविषयताशालिज्ञानहेतुत्वेन हेतुत्वमावश्यकम्, तादृशप्रकारतानिष्ठवैलक्षण्यमपि विशेष्यताभिन्नत्वमेव जातिमानित्याकारकज्ञानीयघटादिविशेष्यतानिरूपितघटत्वादिप्रकारताया जातित्वादिप्रकारतानिरूपितविशेष्यतारूपत्वात्, इत्थं च यत्र जातित्वादिनैव घटत्वादिज्ञानं न तु स्वरूपतः, तत्र न केवलं जातिमानित्यादिज्ञानम्, यत्र च स्वरूपतस्तज्ज्ञानं जातित्वाद्युपस्थितिश्च वर्त्तते तदा जातिमान् घटश्चेति ज्ञानमिति न काप्यनुपपत्तिः ।

अथ स्वरूपतो घटत्वप्रकारताशालिप्रत्यक्षं प्रति विरोधिन्यां जातित्वेन घटत्वप्रकारकप्रत्यक्षं जायतामित्येतादृशेच्छायां विरोधिसामग्रीकाले तादृशप्रकारताशालिप्रत्यक्षोत्पत्त्यसम्भवात् केवलं जातिमानिति प्रत्यक्षं भविष्यति, अन्यथा जातिमान् घटश्चेति, तदा किं तादृशविशेषणताज्ञानहेतुतया । न च स्वरूपतो घटत्वप्रकारकप्रत्यक्षस्थलीयप्रतिबन्धकतायां जातित्वेन घटत्वप्रकारकप्रत्यक्षं जायतामित्येतादृशेच्छायामपि घटत्वप्रकारकप्रत्यक्षेच्छात्वेनाप्युत्तेजकत्वात्तत्कालेऽपि स्वरूपतो घटत्वावगाहिप्रत्यक्षोत्पत्तौ बाधकाभाव इति वाच्यम् । जातित्वभासकसामग्र्यसत्त्वे जातित्वेन घटत्वप्रत्यक्षं जायतामित्येतादृशेच्छाबलात् घट इत्याकारकप्रत्यक्षवारणाय तादृशेच्छाया उक्तरूपेणैव घटत्वप्रकारकं प्रत्यक्षं जायतामित्येतादृशेच्छायाः स्वरूपतो घटत्वप्रकारकप्रत्यक्षं प्रति प्रतिबन्धकतायामुत्तेजकत्वस्य स्वीकरणीयत्वादिति चेन्न । विरोधिसामग्र्यभावादिमात्रस्य तादृशप्रकारतानियामकत्वे विरोधिसामग्रीशून्यकाले कस्यचिदपि केवलं जातिमानिति ज्ञानानुत्पादप्रसङ्गात्, तस्य च अनुभवविरुद्धत्वात् ।

अथ स्वरूपतस्तद्विशिष्टबुद्धौ तदंशेऽन्याप्रकारकज्ञानत्वेन हेतुत्वे जातित्वाद्युपस्थितिदशायां घटत्वांशे जातित्वभाने बाधकाभावेन निर्विकल्पकानुपपत्तिः । एवं प्रमेयं जानामीत्यनुव्यवसायोऽपि प्रायशो न स्यात्, तदा प्रमेयत्वज्ञानसत्त्वेन ज्ञानत्वादौ प्रमेयभाने बाधकाभावात् तत्र ज्ञानत्वादिनिर्विकल्पकासम्भवादिति चेन्न । जातित्वाद्युपस्थितिदशायां यदा घट इत्याकारकं प्रत्यक्षं तत्र घटप्रकारघटत्वांशेऽन्याप्रकारकस्मरणं फलानुरोधेन कल्प्यते, एवं प्रमेयं जानामीत्यनुव्यवसायपूर्वमपि ज्ञानत्वांशेऽन्याप्रकारकस्मरणमिति नानुपपत्तिः । न च चक्षुःसंयोगादिदशायां चाक्षुषादिसामग्र्याः बलवत्याः सत्त्वात्कथं घटत्वादिविषयकस्मरणमुत्पत्स्यते इति वाच्यम् । फलबलेन तदानीं चाक्षुषादिजनकीभूतचक्षुःसंयोगाद्य-

भावस्यैव कल्पनेन चाक्षुषादिसामग्र्या अन्यसम्भवात् ।

अथ वा तत्पूर्वोत्पन्नघटत्वाद्यवगाहिज्ञाने जातित्वादिना घटत्वादिविषयकेऽपि फलबलान्निरवच्छिन्नघटत्वादिषयताशालित्वमभ्युपगम्यते निरवच्छिन्नसावच्छिन्नविषयत्वयोः विरोधे प्रमाणाभावात्, एवञ्च तदुत्तरं घट इत्यादिज्ञानमुपपन्नमेव । अथ केवलं जातिमानित्याकारकज्ञानसत्त्वे घटत्वावगाहिज्ञानमेव कथम् ? निरवच्छिन्नघटत्वादिविषयताशालिबोधे अवच्छिन्नतद्विधेयताशालिबोधसामग्र्या विरोधित्वे चोपदर्शितावच्छिन्नविषयताशालिज्ञानस्य कथं तादृशविषयताशालित्वमिति चेन्न । तादृशप्रतिबध्यप्रतिबन्धकभावं विनैव तत्तदात्ममनोयोगतत्तत्सन्निकर्षव्यक्तीनामेव तादृशविषयतानियामकत्वोपगमात् । न च तर्हि स्वरूपतस्तद्विशिष्टबुद्धावेवानुगतनियामककल्पनमुचितम्, अन्यथा विशेषणज्ञानहेतुताया आधिक्यप्रसङ्गादिति वाच्यम् । अननुगतनियामककल्पनापेक्षया विशेषणज्ञानहेतुताया लाघवेनैव सिद्धेर्निर्विकल्पकीयविषयताया अननुगतनियामककल्पने गौरवज्ञानस्य चोदीच्यतया उपजीव्यतादृशहेतुताकल्पनाया अविरोधित्वादिति । एवं च सिद्धे विशेषणज्ञानहेतुत्वे निर्विकल्पकसिद्धिरप्रत्यूहैव, अन्यथा घट इत्याकारकप्राथमिकविशिष्टबुद्धौ व्यभिचारप्रसङ्गात् ।

अथ प्राथमिकविशिष्टबुद्धौ व्यभिचारवारणाय विशेषणविषयकं स्मरणमेव तत्र कल्प्यताम्, निर्विकल्पककल्पनेऽतिरिक्तविषयताकल्पनप्रसङ्गात् निरवच्छिन्नविषयतायास्तदतिरिक्तज्ञाने क्लृप्तत्वात् । न च तदानीं स्मरणकल्पनेऽननुगतोद्बोधकहेतुत्वस्याधिक्येन निर्विकल्पकस्वीकार एवोचित इति वाच्यम् । निर्विकल्पककल्पनेऽपि तत्तद्व्यक्तिपौर्वापर्यनिर्वाहाय तत्तदात्ममनोयोगादिव्यक्तीनां तत्तद्व्यक्तित्वेन हेतुताया आवश्यकत्वान्मन्मतेऽपि तेषामेवोद्बोधकत्वाभ्युपगमेन कारणताबाहुल्याभावात् । न च तादृशविशिष्टबुद्ध्यादेः प्राग्विशेषणविषयको यत्रानुभवो नास्ति तत्र स्मरणासम्भवेन निर्विकल्पकमावश्यकमिति वाच्यम् । तत्रापि जन्मान्तरीयसंस्कारादेव तत्र स्मरणोपगमात् इति चेत् ।

एवमपि अपूर्वचैत्रत्वादिजातिविशेषस्य प्रागननुभूततया तस्य स्मरणासम्भवेन निर्विकल्पकस्यावश्यकत्वादिति दिक् ॥ ० ॥

विशेषणज्ञानजन्यतावच्छेदकं तु न विशेषणज्ञानत्वं स्मरणे व्यभिचारात् । कारणतावच्छेदककोटौ ज्ञानत्वमनिवेश्य संस्कारसाधारणतद्विषयकत्वेन हेतुत्वे घटत्वांशेऽन्याप्रकारकानुद्बुद्धसंस्कारतः कदाचिदपि केवलं जातिमानित्याकारकप्रत्यक्षानुत्पादप्रसङ्गात् । नापि विशिष्टानुभवत्वं तथा,

अनुभवत्वजातेः बाधाभावजन्यतावच्छेदकतया सिद्धपरोक्षत्वजात्या साङ्कर्येण निरस्तत्वात् । स्मृत्यन्यज्ञानत्वरूपस्य तस्य निवेशे च गौरवात्, किन्तु तादृशप्रकारताशालिप्रत्यक्षत्वमेव तथा, अनुमित्यादिस्थले परामर्शविशेषाणामेव तादृशविलक्षणप्रकारतानियामकत्वसम्भवेनैतादृशविलक्षणज्ञानजन्यतावच्छेदकस्य तत्साधारण्याभावेऽपि क्षतिविरहात् ।

यत्तु-विशिष्टबुद्धित्वमेव जन्यतावच्छेदकं, निर्विकल्पकात्मकस्मरणस्य च विशिष्टस्मरणप्राक्काले स्वीकारान्न तत्र व्यभिचार-इति ।

तदसत् । विशिष्टप्रत्यक्षत्वस्यैव जन्यतावच्छेदकत्वेनोपपत्तौ निर्विकल्पकात्मकस्मरणस्य विशिष्टस्मरणपूर्वं कल्पनस्यानुचितत्वात् ।

अथ निर्विकल्पकात्मकस्मरणोपगमे ज्ञानत्वमपि न निवेश्यते किन्तु तत्प्रकारत्वमेव तथा इति लाघवम्, तत्प्रकारकप्रत्यक्षत्वस्य तथात्वे तत्प्रकारकप्रत्यक्षत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण कार्यकारणभावद्वयप्रसङ्गात् अवच्छेदकगौरवाच्च । कारणतावच्छेदकं च संस्कारव्यावृत्तं ज्ञानेष्वसाधारणवैजात्यम् , अन्यथा यत्र फलसाधनताज्ञानानन्तरं फलेच्छा ततः प्रवृत्तिस्ततः कार्योत्पत्तिः तत्र फलोत्पत्तिकाले फलसाधनताज्ञानस्य नाशेन व्यभिचारप्रसङ्गात् । न च तत्प्रकारकत्वस्येश्वरज्ञानसाधारण्यात् जन्यत्वनिवेशस्यावश्यकतया गौरवमिति तदपेक्षयेश्वरप्रत्यक्षव्यावृत्तप्रत्यक्षत्वावान्तरजातेरवच्छेदकत्वमिति वाच्यम् । नित्यसाधारणधर्मस्यावच्छेदकत्वे क्षतिविरहात् । न च तत्प्रकारकतद्विशेष्यकस्मृतित्वस्यैव तत्प्रकारकतद्विशेष्यकसंस्कारजन्यतावच्छेदकतया कथं तादृशसंस्कारान्निष्प्रकारकस्मरणमुत्पत्स्यत इति वाच्यम् । तदनुरोधेन तद्विषयकस्मृतित्वावच्छिन्नं प्रति तद्विषयकसंस्कारत्वेन हेतुत्वान्तरोपगमात् । न च तादृशकार्यकारणभावान्तरकल्पनापेक्षया तत्प्रकारकप्रत्यक्षत्वस्य विशेषणज्ञानजन्यताच्छेदत्वमुचितमिति वाच्यम् । तत्प्रकारकत्वस्य जन्यतावच्छेदकत्वे लाघवेन निर्विकल्पकात्मकस्मरणसिद्धौ तन्नियामककारणताकल्पनस्य फलमुखत्वादिति चेन्न ।

विषयविशेषं निवेश्य कार्यकारणभावकल्पने गौरवमिति प्रकारतासम्बन्धेनप्रत्यक्षत्वावच्छिन्नं प्रति विषयतासम्बन्धेन ज्ञानत्वेनैव विषयमनिवेश्य हेतुत्वं कल्प्यते, इत्थं च प्रकारत्वप्रत्यक्षत्वयोरेकत्रानिवेशे विनिगमनाविरहासम्भवात् अवच्छेदकागौरवाच्च स्मरणसाधारणधर्मस्यावच्छेदकत्वं स्वीकृत्य निर्विकल्पकात्मकस्मरणकल्पनाऽनुचितैवेति कृतं पल्लवितेन ॥

अथ जात्यतिरिक्तपदार्थस्य स्वरूपतो भानं न स्वीक्रियत इति निय-

मस्य कोऽर्थः ? न तावज्जात्यतिरिक्तपदार्थत्वव्यापकविशेष्यत्वान्यप्रकारतानिरूपकत्वाभावः, 'अयं घट' इत्याकारकज्ञाने इदन्त्वांशे निरूपकतासम्बन्धेन विशेष्यत्वान्यप्रकारतासम्बन्धेन इदन्त्वस्य घटादिरूपतया घटवृत्तिरूपादिस्वरूपतया वा तत्रैव व्यभिचारादिति चेन्न ।

किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितप्रकारत्वान्यनिरवच्छिन्नप्रकारत्वाभावो जात्यतिरिक्तपदार्थत्वव्यापक इति नियमार्थः । 'अयं घट' इत्यत्र किञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितैव इदन्त्वप्रकारता न ततो भिन्नेति न व्यभिचार इति । प्रकारतायां निरवच्छिन्नत्वोपादानात् घटवानित्याकारकज्ञानीयकिञ्चिद्धर्मावच्छिन्नविशेष्यतानिरूपितप्रकारतान्यघटत्वावच्छिन्नप्रकारत्वानिरूपकत्वस्य घटे सत्त्वेऽपि न व्यभिचारः, तादृशप्रकारतायां निरवच्छिन्नत्वाभावसत्त्वेन विशिष्टाभावसत्त्वात् ।

अथ जात्यतिरिक्तपदार्थस्य स्वरूपतः प्रकारताशालिज्ञानं कथं न जायते ? तादृशविषयताशालिज्ञानजनकसत्त्वात् । न च निरवच्छिन्नप्रकारतासम्बन्धेन ज्ञानं प्रति निरवच्छिन्नविषयतासम्बन्धेन ज्ञानत्वेन हेतुत्वकल्पनात् निरवच्छिन्नविषयतासम्बन्धेन पटादौ ज्ञानस्य विरहेण न निरवच्छिन्नप्रकारतासम्बन्धेन ज्ञानापत्तिरिति वाच्यम् । 'अयं घट' इति ज्ञाने इदन्त्वांशे स्वरूपतो विषयतासत्त्वादिति चेन्न ।

निरुक्ततादृशविशेष्यतानिरूपितप्रकारत्वान्यनिरवच्छिन्नप्रकारतासंबन्धेन ज्ञानत्वावच्छिन्नं प्रति स्वसामानाधिकरण्यस्वनिष्ठसमवायसम्बन्धावच्छिन्नावच्छेदकतानिरूपितप्रतियोगिताकभेदवत्त्वोभयसम्बन्धेन सत्त्वेन कारणत्वोपगमात्, तथाच तादृशोभयसम्बन्धेन सत्त्वस्य च जात्यतिरिक्तपदार्थे सत्त्वेन न तादृशनिरुक्तविशेष्यतानिरूपितप्रकारत्वान्यनिरवच्छिन्नप्रकारतासम्बन्धेन ज्ञानापत्तिरिति मदुक्तदिशा सर्वत्रानुसरणीयत्वादिति दिक् ॥

इति विशिष्टबुद्धिं प्रति विशेषणज्ञानकारणतावाद(७)वीचिः ।

श्रीगणाधिपतये नमः ॥

महामहोपाध्याय श्रीगदाधरभट्टाचार्यविरचितः संशयवाद(८)वीचिः ॥

ननु किन्नाम संशयत्वम्? तद्धि न तावत्सन्देहोऽनुभवसिद्धो जातिविशेषः, चाक्षुषत्वादिना सङ्करात्, आंशिकत्वोपगमाच्च। नापि तत्तदभावोभयप्रकारकज्ञानत्वम्, 'भूतलं घटवत्, गुणश्च घटाभाववानि' त्यादिसमूहालम्बनेऽतिव्याप्तेः । नापि एकधर्मिकतत्तदभावोभयप्रकारकज्ञानत्वम्, विभिन्नधर्मितावच्छेदकैकधर्मिकतत्तदभावोभयप्रकारकसमूहालम्बनेऽतिव्याप्तेः । न च समानधर्मितावच्छेदककतत्तदभावोभयप्रकारकज्ञानत्वं, तदिति वाच्यम् । 'भूतलं घटवत् घटाभाववच्चे'त्यादिसमुच्चयेऽतिव्याप्तेः, समुच्चयस्य कोटिद्वयांश एव निश्चयरूपत्वात् । न च समुच्चयस्य निश्चयरूपत्वे तदुत्पत्तिरेव कथं स्यात्, तदभावनिश्चयतन्निश्चययोः कार्यसहभावेन तत्तदभावविशिष्टबुद्धिप्रतिबन्धकत्वादिति वाच्यम् । घटतदभावादेरव्याप्यवृत्तित्वग्रहदशायामेव समुच्चयोपपत्तिसम्भवात्, अव्याप्यवृत्तित्वग्रहाभावविशिष्टस्यैव तदभावनिश्चयस्य विशेष्यतावच्छेदकसामानाधिकरण्येन ग्राह्याभावनिश्चयस्य विशेष्यतावच्छेदकसामानाधिकरण्येन विशिष्टबुद्धावप्रतिबन्धकत्वादव्याप्यवृत्तित्वग्रहाभावदशायामपि विशेष्यतावच्छेदकसामानाधिकरण्येनैव तत्तदभावोभयसमुच्चयसम्भवाच्च । अत एवाव्याप्यवृत्तित्वग्रहाभावदशायामपि पक्षतावच्छेदकसामानाधिकरण्येन साध्यतदभावोभयप्रकारिका समुच्चयरूपाऽनुमितिः सर्वसिद्धा इति चेत् ।

अत्र प्राञ्चः—विशेष्यतावच्छेदकावच्छेदेन तत्तदभावाद्यन्यतरकोट्यवगाह्येकधर्मितावच्छेदककतत्तदभावाद्युभयकोटिकं प्रत्यक्षं संशयः । तद्धर्मितावच्छेदकावच्छेदेन तत्तदभावाद्यन्यतरकोटिमवगाहते यत्तद्धर्मितावच्छेदककतत्तदभावाद्युभयकोटिकं प्रत्यक्षं तत्त्वं तद्धर्मितावच्छेदककतत्संशयत्वमिति तु निष्कर्षः । आदिपदात्तत्तद्भेदपरिग्रहः । अव्याप्यवृत्तित्वग्रहविरहदशायां 'भूतलं घटवत् घटाभाववच्चे' त्यादिसमुच्चये विशेष्यतावच्छेदकसामानाधिकरण्येनैव तत्तदभावादिः प्रकारः, न तु विशेष्यतावच्छेदकावच्छेदेन संशयस्य तु विशेष्यतावच्छेदकावच्छेदेन तत्तदभावान्यतरप्रकारकत्वनियमात् । अव्याप्यवृत्तित्वग्रहदशायां वृक्षत्वाद्यवच्छेदेन 'वृक्षः संयोगवान् तदभाववाँश्चे'त्याद्यनुमितौ स्मृतौ चातिव्याप्तिवारणाय प्रत्यक्षत्वनिवेशः । प्रत्यक्षातिरिक्तज्ञाने संशयत्वा-

भावेन तयोरलक्ष्यत्वात्, तयोः संशयत्वे चाव्याप्यवृत्तित्वग्रहनाशेऽपि तत्सत्त्वे वृक्षादौ संयोगादिमत्त्वग्रहापत्तेः। अत एव संशयात्मकयोग्यताज्ञानात् 'वर्णो नश्यति नवे'त्यादिविप्रतिपत्तिवाक्यजन्यस्य वर्णत्वाद्यवच्छेदेन स्वरूपादिसम्बन्धेन नित्यत्वतदभावादिप्रकारकशाब्दबोधस्यापि न संशयत्वम्। न च तस्य निश्चयरूपत्वे तदुत्पत्तिरेव कथं स्यात् ग्राह्याभावनिश्चयस्य कार्यसहभावेन विशिष्टबुद्धौ प्रतिबन्धकत्वादिति वाच्यम्। शाब्दान्यविशिष्टबुद्धेरेव प्रतिबध्यत्वात्। न च तथापि तदनन्तरं कथमस्य संशय इति वाच्यम्। वादिवाक्यजन्यत्वेनाप्रामाण्यज्ञानानन्तरमेव मानससंशयाभ्युपगमात्। न च प्रत्यक्षत्वनिवेशेऽपि अव्याप्यवृत्तित्वग्रहदशायां वृक्षत्वाद्यवच्छेदेन 'वृक्षः संयोगवान् तदभाववाँश्चे'तिप्रत्यक्षेऽतिव्याप्तिस्तस्य समुच्चयत्वादिति वाच्यम्। अव्याप्यवृत्तित्वाग्रहदशायां वृक्षत्वाद्यवच्छेदेन 'वृक्षः संयोगवान्नवे'तिप्रत्यक्षवत् तस्य संशयत्वात्। अव्याप्यवृत्तित्वग्रहनाशेऽपि तादृशप्रत्यक्षसत्त्वे वृक्षादौ संयोगादिमत्त्वग्रहस्येष्टत्वात्। न च तथापि 'अयं गौरश्वो वे'त्यादिभावद्वयकोटिकसंशयेऽव्याप्तिर्दुर्वारा, तत्र गोत्वाभावादेरप्रकारत्वादिति वाच्यम्। तत्र संशयत्वस्य विवादग्रस्तत्वेनालक्ष्यत्वात्तत्सत्त्वेऽयं गौरश्वो न वेति'संशयानुत्पादस्य सर्वसिद्धत्वात्, तस्य प्रतिबन्धकत्वे संशयत्वविवादस्यैव तत्रासम्भवात् इत्याहुः॥

साम्प्रदायिकास्तु–तत्तदभावाद्यन्यतरकोट्यंशे विरोधसंसर्गकैकधर्मितावच्छेदककृततत्तदभावाद्युभयकोटिकं प्रत्यक्षं संशयः, स च कचिद्विशेष्यतावच्छेदकावच्छेदेन, कचिच्च तत्सामानाधिकरण्येन भवति। समुच्चये च विरोधो न संसर्ग इति न तत्रातिव्याप्तिः। संशये च कचिद्भावकोटिविरोधविशिष्टविशेषणताविशेषसम्बन्धेनाभावकोटेः, कचिदभावकोटिविरोधविशिष्टसमवायसम्बन्धेन भावकोटेः, कचित्परस्परविरोधविशिष्टसम्बन्धेन भावकोटेरभावकोटेश्च धर्मिणि प्रकारत्वम्, कचित्त्वभावकोट्युपरि प्रतियोगिनः प्रकारत्वमेव भावकोटिविरोधविशिष्टप्रतियोगितासम्बन्धेनेत्यभ्युपगमात्। विरोधस्तु तदधिकरणावृत्तित्वम्। अत एव वाशब्देन संशयस्य चशब्देन समुच्चयस्याभिलापः, वाशब्दस्य विरोधसंसर्गतास्फोरकत्वात्। एवञ्चाव्याप्यवृत्तित्वग्रहदशायां 'वृक्षः संयोगवान् तदभाववाँश्चे'ति प्रत्यक्षमपि न संशयो विरोधस्यासंसर्गत्वात्, किन्तु समुच्चय एव। विरोधसंसर्गतात्पर्यकेन 'वर्णो नश्यति नवेत्या'दिविप्रतिपत्तिवाक्येन संशयात्मकयोग्यताज्ञानसहकाराज्जनितस्य 'वर्णो नश्यति नवे'त्यादिविरोधसंसर्गकशाब्दबोधस्य वारणाय प्रत्यक्षत्वनिवेशः। न च त-

स्य लक्ष्यत्वमस्तु किं प्रत्यक्षत्वनिवेशेनेति वाच्यम् । प्रत्यक्षातिरिक्तज्ञाने संशयत्वव्यवहाराभावात् , तस्य संशयत्वे विनापि वादिवाक्यजन्यत्वेनाप्रामाण्यज्ञानं तदनन्तरं मानससंशयापत्तेः । यदि च विरोधसंसर्गेण शाब्दबुद्धेर्विवादग्रस्तत्वात् तत्संसर्गान्तर्भावेण योग्यतादिज्ञानस्य हेतुत्वाकल्पनात् तादृशविप्रतिपत्तिवाक्यस्थले विरोधसंसर्गेण शाब्दबोध एव न जायते किन्तु पदार्थोपस्थितिसहकारेण तदुत्तरं मानससंशय एवेति विभाव्यते, तदापि यत्र विरोधसंसर्गेणैव साध्यतदभावयोर्व्याप्तिज्ञानं पक्षतावच्छेदकसामानाधिकरण्येन च साध्यतदभावयोस्तादृशव्याप्तिविशिष्टवत्ताधरामर्शस्तत्र पक्षतावच्छेदकसामानाधिकरण्येन विरोधसंसर्गेण साध्यतदभावयोः समूहालम्बनानुमितावतिव्याप्तिवारणायैव प्रत्यक्षत्वनिवेश आवश्यकः, प्रत्यक्षातिरिक्तज्ञाने संशयत्वव्यवहाराभावात् । तस्य संशयत्वे तदुत्तरं पक्षतावच्छेदकावच्छेदेन साध्यतदभावयोरुपनीतभानाद्यापत्तेरित्याहुः ॥

नव्यास्तु—कोटिद्वयप्रकारताद्वयनिरूपितैकविशेष्यताशालिज्ञानत्वमेव संशयत्वम् । संशये सन्देह्मीत्यनुभवसिद्धा तत्तदभावोभयप्रकारतानिरूपिता धर्मिण्येकैव विशेष्यता, प्रकारताभेदेऽपि विशेष्यताभेदाभावात् । समुच्चये तत्तदभावलक्षणप्रकारभेदेन विशेष्यताद्वयी संशयातिरिक्तज्ञाने एकस्य विशेष्यत्वस्य प्रकारताद्वयानिरूपितत्वात् , संशयसमुच्चययोर्भेदान्यथाऽनुपपत्त्या लाघवात्तथैव कल्पनात् । न च संशये विशेष्यताद्वयी किन्न स्यात् , विनिगमकाभावात् , तावतापि संशयसमुच्चययोर्विशेषनिर्वाहादिति वाच्यम् । तथासति बाधनिश्चयादेः प्रतिबन्धकतावच्छेदकीभूतनिश्चयत्वस्य लघुनो दुर्वचत्वापत्तेरित्यस्यैव विनिगमकत्वात् । ननु संशये यदि विशेष्यताद्वयी समुच्चये चैकाऽङ्गीक्रियते, तदा भूतलं घटवन्नवेति संशयव्यावृत्तये भूतलं घटवत् घटाभाववच्चेति समुच्चयसङ्ग्रहाय च एवंरूपेण बाधबुद्धेः प्रतिबन्धकत्वं वाच्यम् , तथाहि घटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकत्वे सति, घटत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यतातिरिक्तघटाभावत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकान्यत्वे सति, घटाभावत्वावच्छिन्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकान्यज्ञानत्वेन प्रतिबन्धकत्वमवश्यं वाच्यम् । घटवत्त्वज्ञानस्य घटविशिष्टबुद्धौ प्रतिबन्धकत्ववारणाय चरमं घटाभावत्वावच्छिन्नेति । अथ समुच्चये विशेष्यताद्वयी संशये चैकाऽङ्गीक्रियते, तदैवंरूपेण प्रतिबन्धकत्वं वाच्यम् , तथाहिघटाभावत्वावच्छिन्नप्रकारतातिरिक्तप्रकारत्वानिरूपितघटाभावत्वावच्छि

न्नप्रकारतानिरूपितभूतलत्वावच्छिन्नविशेष्यताकज्ञानत्वेन प्रतिबन्धकत्वं वाच्यम्, तथा च तादृशसंशयस्य न प्रतिबन्धकत्वम्, भूतलं घटवत् घटाभाववच्चेति समुच्चयस्य प्रतिबन्धकत्वं लब्धम्, तथा च पूर्वमते धर्मितावच्छेदकप्रवेशेन गौरवम्, एतन्मते च तदपेक्षयाऽतीव लाघवं धर्मितावच्छेदकानामप्रवेशादिति ॥ एतेन—प्रकारताभेदात् न क्वापि विशेष्यताभेदः, किन्तु विशेष्यतावच्छेदकभेदादेवैतद्भेदः, आवश्यकत्वादव्यभिचारित्वाच्च। संशयसमुच्चययोर्भेदस्तु सन्देह्मीत्यनुव्यवसायसिद्धविषयतानिष्ठवैलक्षण्यादेवोपपन्नः। विशेष्यतानिष्ठं वैलक्षण्यञ्च न प्रकारताद्वयनिरूपितत्वम् अपि तु विशेष्यतात्वव्याप्यधर्मविशेष इत्यपि परास्तम्। तद्वैलक्षण्यं विशेष्यतानिष्ठं प्रकारतानिष्ठं वा कल्प्यत इत्यत्र विनिगमकाभावात्। विनिगमकाभावेन सर्वत्रैव तदभ्युपगमे बाधबुद्ध्यादीनां प्रतिबध्यप्रतिबन्धकभावादेर्विनिगमकाभावेन बाहुल्यप्रसङ्गात्। विशेष्यतावच्छेदकभेदेनेव प्रकारताभेदेनाप्यविरुद्धोभयप्रकारकज्ञाने विशेष्यताभेदस्यानुभवसिद्धत्वाच्च, अन्यथा विशेष्यतावच्छेदकभेदेनापि विशेष्यताभेदस्य लाघवादपलापप्रसङ्गात्। न च तवापि संशयस्थले तत्तदभावोभयनिष्ठा एकैव प्रकारता, प्रकारतावच्छेदकभेदेऽपि प्रकारताभेदाभावात्, समुच्चये च तत्तदभावत्वलक्षणप्रकारतावच्छेदकभेदेन प्रकारताद्वयी इत्येव भेदकं किन्न स्यात्, विनिगमकाभावात्, तदभावावृत्तितद्वृत्तिप्रकारताकज्ञानत्वमेव तन्निश्चयत्वमिति निश्चयत्वस्यापि सुवचत्वादिति वाच्यम्। तथासति भूतलं घटवन्नवेतिसंशयस्य घटाभावत्वावच्छिन्नघटनिष्ठप्रकारताकत्वापत्तेः, घटत्वावच्छिन्नघटाभावनिष्ठप्रकारताकत्वापत्तेश्च। न चेष्टापत्तिः, तथासति घटाभावत्वरूपेण घटस्य घटत्वरूपेण च घटाभावस्य ज्ञानं विनापि तादृशसंशयानुपपत्तेः, न्यायनये विशिष्टनिरूपितवैशिष्ट्यबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकविशेषणज्ञानस्य हेतुत्वात्, तस्य च तद्धर्मावच्छिन्नतन्निष्ठप्रकारताकज्ञानत्वेन तद्धर्मप्रकारकज्ञानत्वेन हेतुहेतुमद्भावात्। घटाभावत्वेन घटाभावं सन्देह्मि घटत्वेन घटं सन्देह्मि, घटाभावत्वेन घटाभावप्रकारकज्ञानवानहं घटत्वेन घटप्रकारकज्ञानवानहमित्यनुव्यवसायवत्, घटाभावत्वेन घटं सन्देह्मि घटत्वेन घटाभावं सन्देह्मि, घटाभावत्वेन घटप्रकारकज्ञानवानहं घटत्वेन घटाभावप्रकारकज्ञानवानहमित्यनुव्यवसायप्रसङ्गाच्च।

ननु तथापि विशेष्यताविशेषस्य संशयत्वरूपत्वे तादृशविशेष्यताशालिज्ञानं क्वचिदेव जायते क्वचिन्नेत्यत्र किं नियामकम्? धर्मितावच्छेदकप्रका-

रैकधर्मिधीसहिततत्तदभावोभयविशिष्टज्ञानसामान्यसामग्र्या एव तदुत्पत्तिनियामकत्वे विशेष्यतावच्छेदकसामानाधिकरण्येन भूतलं घटवत् तदभाववच्चेत्यादिसमुच्चयोत्पत्तिदशायां नियमतो विशेष्यतावच्छेदकसामानाधिकरण्येनभूतलं घटवन्नवेत्यादिसंशयोत्पादापत्तेः । न च समुच्चयस्य तत्तदभावोभयविशिष्टबुद्धिरूपत्वान्नोक्तापत्तिरिति वाच्यम् । विशेष्यतावच्छेदकसामानाधिकरण्येन तदभाववत्तानिश्चयस्य तत्सामानाधिकरण्येन तद्वत्ताबुद्धावप्रतिबन्धकत्वात् , अन्यथाऽव्याप्यवृत्तित्वग्रहदशायां समुच्चय एव न स्यात् । न च विशेष्यतावच्छेदकसामानाधिकरण्येन संशयं प्रति विशेष्यतावच्छेदकसामानाधिकरण्येनैककोटिनिश्चयोऽपि विरोधी न तु तादृशसमुच्चये,प्राचीनादिमतसिद्धस्य तत्तदभावोभयप्रकारत्वादिघटितसंशयत्वस्यार्थसमाजग्रस्तत्वेऽपि विषयताविशेषरूपस्य संशयत्वस्य कार्यतावच्छेदकत्वे बाधकाभावात्, विशेष्यतावच्छेदकसामानाधिकरण्येन तत्तदभावनिश्चयोत्पत्तिदशायामिव तदुत्तरदशायामपि विशेष्यतावच्छेदकसामानाधिकरण्येन संशयानुत्पादस्येष्टत्वात्, अस्तु वा संशयं प्रति सामान्यतो निश्चयसामग्र्येव प्रतिबन्धिकेति वाच्यम् । तथा सति तत्तत्पदार्थतत्तदभावभेदेन संशयस्थलेऽतिरिक्तानन्तप्रतिबध्यप्रतिबन्धकभावकल्पनापत्त्या प्राचीनादिमतस्यैव साम्यक्त्वात् । न च सम्प्रदायमतेऽपि विशेष्यतावच्छेदकसामानाधिकरण्येन भूतलं घटवत् तदभाववच्चेत्यादिसमुच्चयोत्पत्तिदशायां नियमतो विशेष्यतावच्छेदकसामानाधिकरण्येन भूतलत्वावच्छिन्ने विरोधसंसर्गेण घटतदभावादिप्रकारकज्ञानापत्तिवारणाय प्रतिबध्यप्रतिबन्धकभावकल्पनमावश्यकमिति वाच्यम् । विरोधसंसर्गाग्रहदशायां तदुत्पादासम्भवात् , तत्सत्त्वे तदुत्पादस्येष्टत्वात् , इति चेन्न ।

विशेष्यताविशेषरूपस्य संशयत्वस्य नियमतो विशेष्यतावच्छेदकावच्छेदेनोभयकोटिकप्रत्यक्ष एवाभ्युपगमात , न तु विशेष्यतावच्छेदकसामानाधिकरण्येनोभयकोटिकप्रत्यक्षे, तादृशोभयकोटिकज्ञानमात्रस्यैव समुच्चयान्तर्गतत्वात् , तथा च निर्द्धर्मितावच्छेदकसंशयवत् विशेष्यतावच्छेदकावच्छेदेनोभयकोटिकप्रत्यक्षातिरिक्तस्य संशयस्यालीकतया विशेष्यतावच्छेदकावच्छेदेन तद्वत्तादिविशिष्टबुद्धिसामग्र्यभावात् न तदानीं संशयापत्तिः । एवं धर्मिधीसहिततत्तदभावोभयविशिष्टधीसामान्यसामग्रीसत्त्वेऽपि विशेष्यतावच्छेदकसामानाधिकरण्येन भूतलं घटवत् घटाभाववच्चेत्यादिसमुच्चयोत्पत्तिदशायां न भूतलं घटवन्नवेत्यादिसंशयोत्पत्तिः, विशेष्यतावच्छेदकावच्छेदेन तद्वत्तादिविशिष्टबुद्धिं

प्रति विशेष्यतावच्छेदकसामानाधिकरण्येन तत्तदभावादिनिश्चयस्यापि कार्यसहभावेन प्रतिबन्धकतया तत्र सामग्रीविरहात्। न चैवमव्याप्य-वृत्तित्वग्रहदशायां संयोगवान् तदभाववांश्च वृक्ष इति प्रात्यक्षिकसमु-च्चयोत्पत्तिकाले तादृशविशेष्यताविशेषात्मकसंशयत्वशालिज्ञानापत्तिर्दु-र्वारा, अव्याप्यवृत्तित्वग्रहाभावविशिष्टस्यैव तदभावादिनिश्चयस्य प्रति-बन्धकत्वादिति वाच्यम्। अप्रामाण्यग्रहदशायां निश्चयोत्पत्तिकाल इवाव्याप्यवृत्तित्वग्रहदशायामपि निश्चयोत्पत्तिकाले संशयोत्पत्तेरि-ष्टत्वात्। न च तथाप्यव्याप्यवृत्तित्वग्रहदशायां साध्यतदभावोभयप्रकार-कानुमित्युत्पत्तिकाले संशयोत्पत्तिर्दुर्वारा तदानीमपि संशयाभ्युपगमे-ऽनुभवविरोध इति वाच्यम्। तादृशविशेष्यताविशेषरूपस्य संशयत्वस्य प्रत्यक्षत्वव्याप्यतया प्रत्यक्षसामग्रीविरहादेव तदानीं तदनुत्पादात् इति प्राहुः॥

इति श्री महामहोपाध्यायगदाधरभट्टाचार्यविरचितः
संशयवाद(८)वीचिः समाप्तः॥

---

(९) संशयवादवीचिः।

विशिष्टबुद्धिः संशयनिश्चयभेदेन द्विविधा। तत्र संशयत्वं न जातिः, चाक्षुषत्वादिना सङ्करात्।

अथ मानसत्वव्याप्यैव सा जातिः, संशयपूर्वकाले धर्मिज्ञानकोट्युपपस्थि-तेरावश्यकत्वात् ज्ञानलक्षणसन्निकर्षघटितसामग्रीबलात्सर्वत्र मानसस्यैव तस्य सम्भवात्। न च चक्षुःसन्निकर्षकाले तदसम्भवः, मानसं प्रति चाक्षु-षसामग्र्याः प्रतिबन्धकत्वादिति वाच्यम्। तत्र फलानुरोधेन चक्षुर्मनो-योगाकल्पनात्। न चायं पुरुषो नवेति संशयोत्तरं पुरुषं पश्यामीत्यनु-व्यवसायानुत्पादेऽपि धर्म्युपरागेण चाक्षुषत्वादिविषयताविशिष्टविषयक-स्याऽयं पश्यामीत्यनुव्यवसायस्य दुर्वारतया चाक्षुषत्वादिरूपस्य तस्य दुर्वारतैवेति वाच्यम्। संशयपूर्वकालोत्पन्नधर्म्मिचाक्षुषादिविषयकस्यैव तादृशानुव्यवसायस्य सम्भवात्, संशयस्य चाक्षुषत्वाद्यनभ्युपगमेऽपि क्ष-त्यभावात्। न चैवमपि संशयत्वजातौ मानाभाव इति वाच्यम्। अनु-

मितिजनकतावच्छेदककोटिप्रविष्टतया तत्सिद्धिः, अनुमितिं प्रति संशयाभ्यव्याप्यवत्ताज्ञानत्वेन हेतुत्वात् उपाध्यपेक्षया जातेर्लघुत्वात् । न चातिलाघवात् निश्चयत्वं जातिरेवेति वाच्यम् । निश्चयत्वस्य सर्वत्र मानसत्वाप्रसक्त्या चाक्षुषत्वादिनासङ्करात् इति चेन्न ।

एवंसति तर्कत्वमपि न जातिः स्यात् समूहालम्बनतर्कात्मकसंशये सङ्करप्रसङ्गात् । न च तर्कत्वजातौ मानाभावः, आपाद्यव्यतिरेकनिश्चयजन्यतावच्छेदकतया बाधादिप्रतिबध्यतावच्छेदककोटिप्रविष्टतया च तत्सिद्धिः । यदि चांशिकत्वात्तर्कत्वं न जातिः किन्तु आपाद्यताख्यविलक्षणविषयतैवेति मन्यते, तदा संशयत्वस्याप्यांशिकत्वेन तुल्यत्वम् । यदि च सर्वत्र जातेर्व्याप्यवृत्तिता न स्वीक्रियते, तदा तर्कत्वस्यापि जातित्वसम्भवादुक्तदोषतादवस्थ्यम् । यदि च जात्यन्तरसङ्कीर्णापि जातिः स्वीक्रियते, तदा सकलशास्त्रसिद्धान्तपरित्याग एवारब्धः किं विचार्य्यम् ।

एतेन—एकज्ञाने संशयत्वतदभावौ चेदनुमन्येते, तदैव तदव्याप्यवृत्ति स्यात् तदेव न, किन्तु अयं पुरुषो नवा घटवद्भूतलमिति समूहालम्बनादौ पुरुषादिविषयकत्वावच्छेदेन संशयत्वमात्रं स्वीक्रियते नतु इतरविषयकत्वावच्छेदेन तदभावः, एवञ्च स्वाभावासामानाधिकरण्येन तस्य नाव्याप्यवृत्तित्वम् । न चेतरविषयकत्वावच्छेदेन संशयत्वासत्त्वे तदभाव आवश्यकः, प्रतियोग्यनवच्छेदकस्य तदभावावच्छेदकत्वानियमात् । बाधादिप्रतिबन्धकतावच्छेदककोटौ तद्विषयकत्वावच्छेदेन संशयत्वशून्यत्वं न निवेश्यते, येनेतरांशे संशयस्य सङ्ग्रहाय तत्तद्विषयकत्वावच्छेदेन संशयत्वाभावस्वीकार आवश्यकः, अपि तु संशयत्वानवच्छेदकतत्तद्विषयकत्वमेव । यदि च जातेः स्वाभावासामानाधिकरण्यवत्किञ्चिदनवच्छिन्नत्वनियमोऽपि सिद्धान्तः, तदा तत्तद्विषयकत्वावच्छेदेन स्वीकार्यम् , बाधप्रतिबन्धकतावच्छेदककोटौ संशयत्वानवच्छेदकत्वमेवावश्यं तत्तद्विषयकत्वांशे निवेश्यम्—इत्यपि परास्तम् ।

तर्कत्वस्थलेऽपि एवं वक्तुं शक्यतया सङ्करानुद्धारात् । न च सङ्करभयेन तर्कसंशयोभयात्मकसमूहालम्बनमेव नोपगम्यते, अपितु क्रमिकज्ञानद्वयमेवेति वाच्यम् । सामग्रीयौगपद्यस्थले तादृशसमूहालम्बनोत्पादस्य बाधकसहस्रेणापि दुर्वारत्वात् । न चैकं प्रत्यन्यसामग्र्याः प्रतिबन्धकत्वं कल्प्यत इति प्रत्यक्षानुमित्योरिव सामग्रीयौगपद्यमेव न सम्भवति, एतादृशप्रतिबध्यप्रतिबन्धकभावाधिक्यप्रयुक्तगौरवं पुनरकिञ्चित्करमेव, लाघवेन दर्शितकारणत्वप्रतिबध्यतावच्छेदककोटिप्रविष्टतया संशयत्वतर्कत्वजातिद्वयसिद्धौ तदेकतरावच्छिन्ने जायमानेऽपरावच्छि-

न्नोत्पत्तौ ज्ञानद्वयोत्पादस्तादृशजात्याः सङ्करो वा अनिष्टः प्रसज्येतेति
तद्वारणाय तादृशप्रतिबध्यप्रतिबन्धकभावः तादृशजातिसिद्धिमुपजीव्य
उत्तरकाले कल्पनीय इति तदेतद्गौरवस्य फलमुखत्वादिति वाच्यम् ।
तर्कं प्रति संशयस्य संशयं प्रति तर्कस्य वा सामग्र्याः विरोधित्वं कल्प्यत
इत्यत्र विनिगमकासम्भवात्। न च विनिगमनाविरहात् उभयोरेव उभयप्र-
तिबन्धकत्वमुपेयतामिति वाच्यम्। तथासति तादृशोभयज्ञानयोरितरसकल-
कारणसमवधानदशायामुभयोरेवापलपनीयतयाऽनुभवविरोधात् । त-
स्मादेकधर्म्मिकविरुद्धोभयप्रकारकज्ञानत्वमुपाधिरेव। एकधर्म्मिकत्वञ्च ए-
कधर्म्मावच्छिन्नविशेष्यताकत्वं न त्वेकविशेष्यकत्वम्, एकधर्म्मिण विभि-
न्नधर्म्मपुरस्कारेण कोटिद्वयविशेष्यमुद्रयाऽवगाहमानेऽयं न पुरुषः क-
रादिमान् पुरुष' इति निर्णयेऽतिव्याप्तेः ।

अथैवमपि विभिन्नधर्म्मावच्छिन्नैकनिष्ठधर्म्मितावच्छेदकताकस्य 'ए-
तद्वान् पुरुषः करचरणादिमांश्च न पुरुष' इत्यादिसमूहालम्बनस्य वारण-
मशक्यमेव। एकधर्म्मावच्छिन्नधर्म्मितावच्छेदकताकत्वनिवेशे च यत्र ध-
र्म्मितावच्छेदकतावच्छेदकीभूतस्यैकस्यैव विभिन्नधर्म्मपुरस्कारेण भानं
तत्राऽतिप्रसङ्गो दुर्वारः, स्वरूपतस्त्विदन्त्वावच्छिन्नधर्म्मितावच्छेदकमव-
गाहमानस्यायं पुरुषो न वेत्यादेरसंग्रहः । अविलक्षणधर्म्मिताकत्वमपि
न विचारसहम्, संशयीयकोटिद्वयप्रकारतानिरूपितधर्म्मितयोरपि
परस्परव्यावृत्ततत्तत्प्रकारतानिरूपितत्वादिधर्म्मवत्वेन विलक्षणत्वात् ।
न चैवं यादृशधर्म्मितावच्छेदकतया यादृशविशेष्यतया वा निरूपिता
या विरुद्धोभयप्रकारता तच्छालित्वं विवक्षणीयम्, संशये च प्रत्येक-
कोटिनिश्चयस्थले क्लृप्तप्रत्येककोटिप्रकारतानिरूपितविशेष्यताभिन्न-
विशेष्यताकल्पने गौरवात मानाभावाच्च प्रत्येकस्थलीयविशेष्यताद्वे-
रेवोपगमात् । एवं विरुद्धोभयप्रकारत्वमित्यत्र च वास्तवविरुद्ध-
त्वस्य प्रकारविशेषणत्वे वृक्षः संयोगी नवेति संशयासंग्रहः,
विरुद्धत्वेन उभयप्रकारताविशेषणे च विरोधोपस्थितिशून्यकाले विरुद्ध-
त्वेनोभयकोटिभानाऽसम्भवात् तत्स्थलीयसंशयाव्याप्तेश्च । न च तदा
संशय एव न सम्भवतीति वाच्यम् । विरोधोपस्थितिं विनापि तुल्यब-
लकोटिद्वयविशिष्टबुद्धिसामग्रीसत्त्वे उभयकोटिद्वयविशिष्टबुद्ध्युत्पादे बा-
धकाभावात् । न चासौ समुच्चय एवेति वाच्यम् । अव्याप्यवृत्तित्वज्ञानं
विना कोटिद्वयनिश्चयस्य युगपदुत्पादासम्भवात् , अव्याप्यवृत्तित्वज्ञा-
नाभावविशिष्टविपरीतकोटिनिश्चयस्य विशिष्टबुद्धौ कार्य्यसहभावेन वि-
रोधित्वात् । न चैवं तादृशविरोधिवशादेव न तदानीं तादृशज्ञानमुत्पद्यते

इति वाच्यम् । तादृशज्ञानानुत्पादप्रतिबन्धकस्याप्यसत्त्वात् । न चैककोटिनिश्चयस्तत्रोपेयते इति वाच्यम् । विनिगमकाभावात् बाधनिश्चयाभावस्य कार्य्यसहभावेन हेतुता दूषितेति चेन्न । अव्याप्यवृत्तिताग्रहदशायां बाधकालेऽपि विशिष्टबुद्ध्यनुत्पादस्तु न केनाप्यनुमन्यते । न च विरोधविषयकविपरीतकोटिनिश्चय एव विरोधी, विरोधाविषयकस्यापि भूतले घटो नास्तीत्यादिज्ञानस्य भूतलं घटवत् इत्यादिज्ञानविरोधितायाः सर्वसम्मतत्वात् । नच विरुद्धोभयप्रकारकत्वमित्यस्य तत्सम्बन्धावच्छिन्नतद्धर्म्मावच्छिन्नप्रकारताकत्वे सति दैशिकविशेषणतासम्बन्धावच्छिन्ना या तत्सम्बन्धावच्छिन्नतद्धर्म्मावच्छिन्नाभावत्वावच्छिन्नप्रकारता तच्छालित्वमर्थ इति वाच्यम् । एवमपि तद्धर्म्मावच्छिन्नवद्भेदकोटिकसंशयासंग्रहात् भावद्वयकोटिकसंशयासंग्रहाच्च । नच भावद्वयकोटिकसंशय एव नाद्रियते स्थाणुर्वा पुरुषो वेति संशयश्च न भावद्वयकोटिक एव वाऽकारेणान्यतरकोट्यभावोल्लेखादिति वाच्यम् । अभावानुपस्थितावपि मिथोविरुद्धत्वेन स्थाणुत्वपुरुषत्वप्रकारकधीसामग्रीभ्यां फलजनने बाधकाभावात्, तद्विशिष्टबुद्धौ तद्विरुद्धत्वेन विरुद्धधर्म्मवत्तानिश्चयस्य कार्यसहभावेनाविरोधितया सामग्रीद्वयजन्यज्ञानस्य निश्चयत्वासम्भवात्, नहि कश्चिदपि व्यावर्त्तकधर्म्मदर्शनकाले विशिष्टबुद्धिमभ्युपैति। एवं धर्म्मितावच्छेदकसामानाधिकरण्येन कोटिद्वयज्ञानस्यापि संशयत्वापत्तिः । न चेष्टापत्तिः, विशेषदर्शिनामपि मेयत्वादिसामानाधिकरण्येन घटतदभावज्ञानोत्पत्तेः, सामानाधिकरण्येन साध्यसिद्धेरुद्देश्यत्वापेक्षया व्यापकविपर्य्ययस्योपाध्याभासत्वं तदभावेन पक्षैकदेशे सत्प्रतिपक्षेऽपि एकदेशान्तरे साध्यसिद्धेरप्रत्यूहादिति ग्रन्थविरोधप्रसङ्गाच्च । तत्र पक्षतावच्छेदकसामानाधिकरण्येन साध्यसिद्ध्युपगमे उपाध्यभावेन पक्षतावच्छेदकसामानाधिकरण्येन साध्याभावसिद्धावपि बाधकाभावात् त्वन्मते संशयानुमितिप्रसङ्गात् ।

मैवम्, स्वनिष्ठप्रकारताघटितधर्म्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकघटकीभूतप्रकारताशालिज्ञानत्वं संशयत्वमित्यर्थस्य विवक्षितत्वात् । विभिन्नधर्म्मावच्छिन्नविशेष्यत्वतदवच्छेदकत्वादिनिरूपकीभूततत्प्रकारताशालिबुद्धौ विपरीतकोटिनिश्चयस्याविरोधितया विभिन्नधर्म्मपुरस्कारेण धर्म्मितावच्छेदकादिमुद्रया एकविषयकज्ञाने नातिप्रसङ्गः, पुरुषत्वादिप्रकारकबुद्धौ पुरुषत्वादिविरुद्धत्वानवच्छिन्ना या वस्तुगत्या विरुद्धरूपादिप्रकारता तन्निरूपकज्ञानस्याविरोधितया नोपदर्शित'रूपवानयं पुरुष' इत्यादिभ्रमेऽतिव्याप्तिः, तत्प्रकारकबुद्धौ विरुद्धत्वेन

पदार्थान्तरप्रकारकबुद्धेर्विरोधितया कोटिमवगाहमानस्य भावद्वयकोटिकसंशयस्यापि सङ्ग्रहात् ।

अथवा भावद्वयकोटिकसंशय एव नोपगम्यते । न च मिथो विरुद्धत्वेन स्थाणुत्वपुरुषत्वादिप्रकारकज्ञानसामग्रीभ्यां युगपत्समवहिताभ्यामर्थवशात् भावकोटिकसंशये बाधकाभावः, तत्र विनिगमकाभावादेकतरकोटिमात्रज्ञानं त्वापाद्यते इत्यस्य वक्तुमशक्यतया विशेषदर्शनस्य कार्य्यसहभावेन हेतुतयापि तादृशोभयकोटिकज्ञानवारणासम्भवात्, भवन्मते तत्तद्धर्मयोरेव ज्ञानाद्युत्पत्त्या विशेषदर्शनाभावस्य कार्य्यकालेऽसत्त्वादिति वाच्यम् । स्थाणुत्वविरुद्धपुरुषत्ववानयमित्यादिविशेषदर्शनोत्पत्तिकालेऽयं स्थाणुरितिस्थाणुत्वादिविशिष्टबुद्धौ स्थाणुत्वविरुद्धधर्म्मवत्तानिश्चयसामग्रीप्रतिबन्धिका वाच्या, यत्र स्वविषयकाप्रामाण्यग्रहद्वितीयक्षणे संशयाद्यनुत्पत्त्या विशेषदर्शनादेरभावस्य कार्य्यसहभावेन हेतुत्वासम्भवात् । एवञ्च परस्परविरोधेन उक्तस्थले परस्परविरुद्धत्वेन भावद्वयकोटिकसंशयासम्भवः । न च निश्चयसामग्र्या एव प्रतिबन्धकतया तादृशसंशयोत्पत्तौ बाधकाभाव इति वाच्यम् । अभावाप्रकारकज्ञानस्य निश्चयतया तत्सामग्र्यास्तत्रासत्त्वात् । यदि च तत्तदसाधारणकारणस्तोमरूपसामग्र्याः प्रतिबन्धकत्वापेक्षया लाघवात् स्वप्रतियोगिकृतिविशिष्टविशेषदर्शनप्रागभावस्यैव प्रतिबन्धकता स्वीक्रियते, तदा तु भावद्वयकोटिकः संशयो निराबाधः, विरुद्धत्वेन कोटिद्वयभासकसामग्रीसत्त्वदशायां फलोत्पादोपगमेऽप्येतादृशप्रतिबन्धकाभावसमवधानस्याव्याहतत्वात् । न च कोटिद्वयभानस्य तत्रोपगमे निरुक्तकृतिविशिष्टप्रागभावस्य प्रतिबन्धकत्वमेव न सम्भवति तादृशसामग्रीद्वयसम्वलनस्थले तत्सत्त्वादिति वाच्यम् । तादृशोभयकोट्यवगाहिज्ञानव्यावृत्तनिश्चयत्वावच्छिन्नप्रागभावत्वेनैव प्रतिबन्धकत्वादिति । एवं सामानाधिकरण्येन कोटिद्वयावगाहिज्ञानेऽपि नातिप्रसङ्गः, सामानाधिकरण्यमात्रावगाहिविशिष्टबुद्धौ तादृशविपरीतज्ञानस्य विरोधितया तादृशज्ञानीयप्रकारतायाः परस्परघटितधर्म्मावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबन्धकतावच्छेदकाघटकत्वात् ।

अथैवमपि भावाभावोभयसमुच्चयेऽतिप्रसङ्गः विरोधानवगाहिनोऽपि ग्राह्याभावज्ञानस्य विशिष्टबुद्धिविरोधितया विरोधानवच्छिन्नाया अपि तदभावप्रकारतायास्तत्प्रकारकज्ञानप्रतिबन्धकतावच्छेदकत्वात्, अन्यथा विरोधानुपस्थितिकालीनतद्विषयकसंशयस्यैवासङ्ग्रहापत्तेः । न च सर्वत्र समुच्चये सामानाधिकरण्येनैव कोटिद्वयभानमिति वाच्यम् ।

संयोगविभागयोरव्याप्यवृत्तित्वग्रहदशायां द्रव्यत्वावच्छेदेन संयोगाभाववभानस्यानुभविकतया तस्य संशयत्वासम्भवात् ।

यत्तु-समुच्चये विभिन्नावच्छेदकावच्छेदेनैव कोटिद्वयभानम्, अवच्छेदकमप्रतीत्य भावाभावयोरेकत्र भानानभ्युपगमात्, एवञ्च मूलावच्छेदेन तद्बुद्धौ शाखाद्यवच्छेदेन तदभाववत्ताज्ञानस्याविरोधितया न तस्य निरुक्तसंशयत्वापत्तिः, एकावच्छेदेन कोटिद्वयधीः संशय एव, अत एव संयोगतदभावयोरव्याप्यवृत्तित्वग्रहदशायामपि मूलावच्छिन्नो वृक्षः संयोगवान्न वेति संशयोऽनुभवसिद्ध एव-इति ।

तदप्यसत् । संयोगतदभावयोरव्याप्यवृत्तित्वग्रहदशायामवच्छेदकीभूतमूलानुपस्थितावपि वृक्षः संयोगवान् तदभाववांश्चेति शाब्दादिज्ञानस्यानुभविकत्वात् । न चानुपस्थितमपि तत्तत्कोट्यवच्छेदकावच्छिन्नत्वं सम्बन्धघटकतया भासते सम्बन्धोपस्थितेर्विशिष्टबुद्ध्यहेतुत्वादिति वाच्यम् । विशेष्यतावच्छेदकावच्छिन्नत्वस्य सर्वत्र संसर्गतया भाने मानाभावात मूलावच्छिन्नो वृक्षः संयोगीत्यादावेव मूलावच्छिन्नत्वस्य संसर्गतया भानात्, समुच्चयस्य विभिन्नावच्छेदकावच्छेदेन भावाभावोभयविषयकत्वेऽव्याप्यवृत्तिताग्रहस्य तत्रानुपयोगित्वापाताच्च, अव्याप्यवृत्तित्वज्ञानस्य प्रागसत्त्वेऽपि विभिन्नावच्छेदकावच्छेदेन भावाभावग्रहात्।

अत्र साम्प्रदायिकाः । एककोट्यंशेऽपरकोटिविरोधावगाहित्वमपि संशयत्वघटकं, विरोधानुपस्थितिकाले च प्रकारतया विरोधभानासम्भवेऽपि संसर्गतया तद्भानमुपेयते । न चैवमेकांशे विरोधसम्बन्धेनापरकोटेः प्रकारत्वात् निखिलसंशयानामेव वह्न्यभाववान्वह्निमानित्याद्याकारतापत्तिः, स्वातन्त्र्येण प्रकारतायामेव तथाकारतानियमात्, अत्र च पारतन्त्र्येणैव तदुपगमात् । अथवाऽभावांशे प्रतियोगिनोऽनुयोगितासम्बन्धेन प्रकारताया आवश्यकत्वात् तत्रैव विरोधवैशिष्ट्यं निवेश्यते, भावकोट्यंशे न विरोधभाननियमः । अथ धर्म्यंशे कोट्योः संयोगादिसम्बन्धेन प्रकारताया आवश्यकत्वात् तत्रैव विपरीतकोटिनिरूपितविरोधविशिष्टस्य तस्य संसर्गता स्वीकार्य्या समवायविशेषणताभ्यां संयोगतदभावयोरेकाधिकरणवृत्तित्वनिश्चयदशायामपि जायमानो मूलावच्छिन्नो वृक्षः संयोगी नवेति संशयः मूलावच्छिन्नविशेषणतासंसर्गक एवेति । तत्र च तादृशविशिष्टसंसर्गघटितस्य तादृशसम्बन्धेन तदधिकरणावृत्तित्वरूपविरोधभाने न किञ्चिद्बाधकम् । एवं द्रव्यान्तर्भाविण संयोगतदभावयोः सामानाधिकरण्यनिश्चयदशायां जायमानो गुणः संयोगी न वेति संशयो निरवच्छिन्नसमवायतथाविधविशेषणतासंसर्गकः।

तत्र च तादृशविशिष्टसंसर्गघटकविरोधस्य भाने न किञ्चिद्बाधकं द्रव्यान्तर्भावेण समवायविशेषणताभ्यामेव तयोः सामानाधिकरण्यग्रहात्। निरवच्छिन्नसमवायविशेषणताभ्यां भावाभावयोरेकाधिकरणवृत्तित्वज्ञानन्त्वनाहार्य्यं नास्त्येव। अथ विरोधानुपस्थितिकाले संसर्गतया भानोपगमस्तदोपपद्यते यदि विरोधस्य संसर्गता प्रामाणिकी स्यात्, सैव च नास्ति। न च समुच्चयस्य संशयत्ववारणायान्यथानुपपत्त्यैव तत्सिद्धिः, अव्याप्यवृत्तित्वज्ञानादुत्तरत्वस्य संशयत्वघटकतामुपगम्यापि तद्वारणसम्भवात्। न च संशयसमुच्चययोर्विलक्षणाकारकता तयोर्विषयस्य विषयतावैलक्षण्यमन्तरेण नोपपद्यते, अतस्तदन्यथानुपपत्त्यैव विरोधस्य संसर्गतासिद्धिरिति वाच्यम्। तर्हि संशयेऽतिरिक्तविरोधविषयतास्वीकारापेक्षया कोट्योर्धर्म्मिणि च विलक्षणविषयतास्वीकार एवोचितः, विरोधस्य संसर्गतास्वीकारेऽपि तन्निरूपितप्रकारताविशेष्यतयोरन्यत्राक्लृप्ततया अतिरिक्तविषयतायाः कोट्योर्धर्म्मिणि चाऽवश्यकल्प्यत्वात्। यदि च कोटिधर्म्मिणां विषयतासु वैलक्षण्यमेव दुर्वचमिति मन्यते, तदापि संशयसमुच्चययोर्वैलक्षण्योपपत्तये विरोधस्य पदार्थान्तरस्य वा संसर्गता स्वीक्रियत इत्यत्र विनिगमनाविरह इति चेत्। नैवम्, कोटिद्वयस्याविरुद्धत्वज्ञानदशायां संशयानुत्पादस्यानुभविकतया तदुपपत्तये संशये विरोधभानस्यावश्यकतया विनिगमनाविरहानवकाशात्।

केचित्तु संशये धर्म्मिणो विलक्षणविषयता स्वीक्रियते, तद्वैलक्षण्यञ्चकोटिद्वयप्रकारतानिरूपितत्वम्, समुच्चये तु नैकविषयता कोटिद्वयप्रकारतानिरूपितेति तद्वैलक्षण्यं, विरोधस्य संसर्गतास्वीकारेऽपि अतिरिक्तविषयताकल्पनस्यावश्यकत्वात्। नचैवं वैपरीत्यमेव किन्न स्यादिति वाच्यम्। तथासति परामर्शादेरनुमितिजनकतायां बाधादिप्रतिबन्धकतायाञ्च तन्निष्ठप्रकारत्वानिरूपिततदभावप्रकारतानिरूपिततद्धर्म्मावच्छिन्नविशेष्यताशालिज्ञानभिन्नत्वे सति तत्प्रकारतानिरूपिततद्धर्म्मावच्छिन्नविशेष्यताशालित्वज्ञानरूपनिश्चयत्वस्य निवेश्यतया गौरवात्. इतरथा तु तदभावप्रकारत्वानिरूपिततत्प्रकारतानिरूपिततद्धर्म्मावच्छिन्नविशेष्यताशालिज्ञानत्वस्य तत्र निवेशे लाघवात्।

ननु संशये उभयप्रकारतानिरूपितैकविशेष्यतास्वीकारेऽपि संशयसामग्रीदशायां प्रत्येककोटिनिश्चयसामग्र्योरपि सत्वात्तदीयविशेष्यताशालित्वं संशयस्य निष्प्रत्यूहमेव, निश्चयत्वस्यार्थसमाजग्रस्ततया कस्यापि कार्य्यतानवच्छेदकत्वेन संशयोत्पत्तिदशायां तदवच्छिन्नापत्तिवारणाय निश्चयं प्रति संशयसामग्र्याः प्रतिबन्धकत्वस्याप्रामाणिकतया तत्साम-

ष्यास्तदभावप्रयोजकत्वानुपपत्तेः, एवञ्च तदभावप्रकारत्वानिरूपित-तत्प्रकारतानिरूपितविशेष्यताशालित्वं न तत्संशयव्यावृत्तमिति चेन्न ।

एतदनुरोधेनैव तत्कोटिमात्रप्रकारतानिरूपितविशेष्यताशालिज्ञानं प्रति स्वप्रतियोगितत्तदभावोभयप्रकारतानिरूपितविशेष्यताशालिज्ञान-कृतिविशिष्टप्रागभावरूपसंशयसामग्र्याः प्रतिबन्धकत्वकल्पनगौरवस्य न्याय्यत्वात् । अत्र प्रतिबन्धकतावच्छेदककोटौ स्वत्वनिवेशादननुगमोऽन्यत्रोक्तरीत्या वारणीयः । अस्तु वा संशयस्यापि निश्चयस्थलीयविशेष्यताद्वयवत्त्वम्, तथापि तत्तदभावोभयप्रकारतानिरूपिततद्धर्मावच्छिन्न-विशेष्यताकज्ञानभिन्नत्वे सति तत्प्रकारतानिरूपिततद्धर्म्मावच्छिन्नविशेष्यताकज्ञानत्वरूपस्य तन्निष्ठप्रकारत्वानिरूपिततदभावप्रकारता निरूपित तद्धर्म्मावच्छिन्नविशेष्यताकान्यत्वघटितोक्तधर्म्मापेक्षया लघोर्निश्चयत्वस्यैव तन्मते निवेश्यतया समुच्चये कोटिद्वयप्रकारतानिरूपितविशेष्यतास्वीकारमादाय विनिगमनाविरहस्यानुद्भावनीयत्वात्, तथाच तत्तदभावोभयप्रकारतानिरूपितविशेष्यताशालिज्ञानत्वमेव संशयत्वम्, एवञ्च धर्म्मितावच्छेदकाभेदस्थलेऽपि नातिप्रसङ्गदोषस्तत्र विशेष्यताभेदात् । यदि च धर्म्मितावच्छेदकत्वादिकं प्रकारताविशेषः, तदा संयोगाभाववत् द्रव्यं संयोगवदित्याद्येकैककोटिधर्म्मितावच्छेदककापरकोटिप्रकारकसमुच्चयविशेष्यतायां तत्प्रकारतानिरूपितायामवच्छेदकतात्मकतदभावप्रकारतया समं निरूप्यनिरूपकभावसत्त्वेनातिप्रसङ्गः स्यात् इत्यवच्छेदकताभिन्नत्वेन कोटिद्वयप्रकारताया निवेशस्यावश्यकत्वम् । नच यथा विशेष्ये विशेषणमिति रीत्या वक्रदण्डवान् पुरुष इति बोधः वक्रो दण्डः दण्डवान् पुरुष इत्यादिसमूहालम्बनाद्विलक्षणः, तथा द्रव्यं संयोगि संयोगाभाववत् द्रव्यमित्यादिसमूहालम्बनाद्द्रव्यं संयोगि तदभाववदित्याद्येकत्र द्वयमिति रीत्या ज्ञानमपि विलक्षणमित्यत्र सर्वेषामेव सम्मतिरिति वाच्यम् । विशेषणविशेष्यतावच्छेदकभावापन्नयोरेव तयोरेकत्र द्वयमितिरीत्या बोधे भानात् धर्म्मितावच्छेदकताभिन्न-प्रकारताया निवेशेनैव तद्वारणात् । नचैवमेकत्र द्वयमिति रीत्या धर्म्मद्वयविशेषणकनिखिलज्ञानानामेव एकविशिष्टे विशेषणान्तरवैशिष्ट्याव-गाहितापत्तिः एकविशेषणधर्म्मितावच्छेदकतापन्नविशेषणज्ञानस्यैव त
र्थत्वादिति वाच्यम् । यत एकविशिष्टे विशेषणान्तरवैशिष्ट्यावगा
मित्यस्य नोक्तोऽर्थः, अपि तु एकावच्छिन्नत्वेनापरवैशिष्ट्य
ताविषयकत्वमेवेति प्रपञ्चितं विशिष्टवैशिष्ट्यविचारे । वै
योगितायाश्च धर्म्मितावच्छेदकावच्छिन्नत्वं भासते न

न च धूमकालीनवह्निमान् पर्वतो वह्निमान् आलोकादित्यनुमितौ वह्नेर्धूमकालीनवह्निधर्म्मिताव्च्छेदकतया न भानम्, अपि तु पर्वतांशे तुल्यविशेषणतापन्नस्यैव विधेयधर्म्मितावच्छेदकतया भानम्, अन्यथा 'विधेयकालीनत्वस्वसम्बन्धेन यद्धर्म्मं धर्मितावच्छेदकीकृत्यावगाहते माभूत् शाब्दबुद्धिः सा ज्ञायमानतद्धर्म्मजन्या' इति दीधितिकृतामाचार्य्यानुमानव्याख्या न कल्पेत, तथाविधानुमितौ व्यभिचारस्य दुर्वारत्वात्, एवञ्च मिथोविशेषणविशेष्यतावच्छेदकभावापन्नयोरेकत्र द्वयमिति रीत्या भानमिति नियम इति वाच्यम्। द्वयोरेकधर्म्मितावच्छेदकतया यत्र भानं तदतिरिक्तस्थले तादृशनियमात्, भावाभावयोर्द्वयोरेव यत्र धर्म्मितावच्छेदकता तत्र तयोरेकस्यापरधर्म्मितावच्छेदकत्वविरहेऽपि धर्म्मितावच्छेदकताभिन्नतदुभयप्रकारतानिरूपितैकविशेष्यताविरहादेव नातिप्रसङ्गः। न च कोट्योरविरुद्धत्वज्ञानदशायां संशयानुत्पादनिर्वाहाय विरोधविषयतायाः संशयेऽवश्याभ्युपेयत्वे किमेतावता प्रयासेन, तथापि संशयसमुच्चययोर्वैलक्षण्योपपत्तिरिति वाच्यम्। तत्तदभावोभयप्रकारतानिरूपितैकविशेष्यताशालिज्ञानं प्रति एकाविरुद्धत्वज्ञानस्य प्रतिबन्धकतां स्वीकृत्य तज्ज्ञानदशायां संशयाभावस्य निर्वाह्यत्वात्, भवन्मते विरोधविशिष्टबुद्धावेव विरुद्धत्वज्ञानस्य तथाकल्पनात्, विरोधसंसर्गकसंशयानुरोधेनातिरिक्तप्रतिबन्धकताकल्पनस्यावश्यकत्वात्, एवं ग्राह्याभावादौ किञ्चिदवच्छिन्नवृत्तिकत्वरूपाव्याप्यवृत्तित्वज्ञानस्य संशयप्रतिबन्धकत्वमप्युभयमते तुल्यम्। न च विलक्षणविषयतास्वीकारस्यावश्यकत्वे कोटिद्वय एव विलक्षणप्रकारता स्वीक्रियताम् वैलक्षण्यञ्च तस्याः कोटिद्वयवृत्तित्वमेव, समुच्चये प्रकारभेदेन प्रकारताभेदः, एवञ्च जनकतावच्छेदककोटौ तदभावावृत्तिप्रकारताशालिज्ञानत्वरूपमतिलघुशरीरमेव निश्चयत्वं निवेश्यमिति वाच्यम्। घटत्वघटाभावत्वरूपावच्छेदकभेदेन कोट्योः प्रकारताभेदस्यावश्यकत्वात्, अन्यथा निखिलसंशयानामेव कोटितावच्छेदकांशे भ्रमत्वापत्तेः घटाद्यवृत्ति घटाभावत्वावच्छिन्नतन्निष्ठविषयताकत्वात्, भूतलं घटवन्नवेति संशयानन्तरं घटाभावत्वेन घटं सन्देह्मीत्यनुव्यवसायप्रसङ्गाच्चेति वदन्ति।

ननु ... अत्रेदं चिन्त्यते। कोटिद्वयनिरूपितधर्म्मितावच्छेदकताकसंशयस्थले

मग्नोदशाय ... त्वाभेदस्वीकारेऽपि नीलपर्वतो वह्निमान् पर्वतो वह्न्यभाववान् वेत्या-

लित्वं संशय ... न्यूनाधिकधर्म्मावच्छिन्नयोर्विशेष्यतयोर्भेद आवश्यकः, अन्यथा-

कार्य्यतानवच्छेद ... वह्निमान्नवेति संशयात्तद्वैलक्षण्यानुपपत्तेः, तादृशसंशय-

निश्चयं प्रति संशय ... वह्निमानित्यादिनिश्चयप्रतिबध्यतानापत्तेश्च, पीतत्वपर्वत-

त्वान्यधर्म्मानवच्छिन्नविशेष्यताकवह्न्यभाववत्ताज्ञानं प्रत्येव तादृशनिश्चयस्य प्रतिबन्धकत्वात्। न च शुद्धपर्वतत्वावच्छिन्नाऽभावप्रकारतानिरूपितविशेष्यता प्रतियोगिप्रकारतानिरूपितविशेष्यतातोऽतिरिक्तैवास्ताम्, नीलपर्वतत्वावच्छिन्नविशेष्यता च कोटिद्वयप्रकारतानिरूपितास्त्विति वाच्यम्। एवंसति तादृशज्ञानस्य वह्निप्रकारतानिरूपितवह्न्यभावप्रकारत्वानिरूपितविशेष्यताशालिज्ञानत्वरूपनिश्चयत्वाक्रान्ततया वह्न्यादिविशिष्टबुद्धिप्रतिबन्धकत्वापत्तेः, तदुत्तरं नीलपर्वते वह्न्यभावं जानामीत्यनुव्यवसायापत्तेश्च। न च तादृशसंशय एवासिद्धः वह्न्यभावधर्म्मितावच्छेदकतया नीलभाने बाधकाभावादिति वाच्यम्। नीलत्वं धर्म्मितावच्छेदकीकृत्य वह्न्यभाववत्ताज्ञानप्रतिबन्धकवह्न्यादिव्याप्यवत्ताज्ञानदशायां तुल्यबलकोटिद्वयसामग्रीभ्यां तादृशसंशयजनने बाधकाभावात् ग्राह्याभावव्याप्यावच्छेदकधर्म्मदर्शनस्याप्रतिबन्धकतया तत्सामग्र्याः प्रतिबन्धकत्वे मानाभावात्, तादृशस्थले पर्वतत्वधर्म्मितावच्छेदककवह्निव्याप्यावच्छेदकनीलादिभानसामग्रीसत्त्वे पर्वतत्वावच्छेदेन वह्न्यभावभानसम्भवात् इति।

अथ तत्र विशेष्यत्वमेकमेव, तस्य च नीलविशिष्टपर्वतत्वावच्छिन्नत्वेन वह्निप्रकारतया शुद्धपर्वतत्वावच्छिन्नत्वेन चाभावप्रकारतया समं निरूप्यनिरूपकभाववैलक्षण्यात् उक्तानुपपत्तीनामुद्धार इति चेत्।

कोटिद्वय एव किमेकप्रकारताभानं न स्वीक्रियते, तस्याश्च तत्कोटितावच्छेदकावच्छिन्नत्वविशिष्टाया एव तत्तत्कोटिवृत्तित्वमित्यधिकरणतावैलक्षण्यमुपगम्योपपत्तिसम्भवात्।

अत्रेदं समीचीनतया प्रतिभाति-संशये कोटिद्वयनिरूपितविशेष्यतयोर्भेद एव, तयोः परस्परमवच्छेद्यावच्छेदकभाव एव वैलक्षण्यम्, एवं च तदभावप्रकारतानिरूपितविशेष्यतावच्छिन्नतत्प्रकारतानिरूपितविशेष्यताशालित्वमेव संशयत्वम्। यदि च पर्वते वह्निर्वह्न्यभावो वेति धर्म्मिविशेषणकोपि संशयः, तदा तदभावविषयतानिरूपितविषयत्वावच्छिन्ना या तद्विषयतानिरूपिता विषयता तच्छालिज्ञानत्वमेव तथा, तत्रोभयकोटिविशेष्यतानिरूपितधर्म्मिप्रकारतयोरवच्छेद्यावच्छेदकभावस्वीकारात्। यदि च पर्वतो वह्निमान् वह्न्यभावो वा पर्वते इत्याकारकोऽपि संशयस्तदा पर्वतत्वावच्छिन्नप्रकारताविशेष्यतयोरवच्छेद्यावच्छेदकभावः स्वीकार्य्यः।

अथवा संशये कोटिद्वयविषयितयोरेव तथा भावः स्वीकार्य्यः, एव[illegible] तदभावविषयकत्वावच्छिन्नतद्विषयकत्वमेव संशयत्वम्, एतन्मते निश्[illegible] त्वस्यातिलाघवमित्यवधेयम्।

परे तु संशयत्वं नोक्तरूपम्, स्वत्वघटितत्वेन तस्याननुगत[illegible]

इति संशयवाद(८)वीचिः समाप्तः॥

---

(१) अत्र कियती ग्रन्थत्रुटिः प्रतिभाति।

॥ श्रीगुरुभ्यो नमः ॥

महामहोपाध्याय श्रीगदाधरभट्टाचार्यकृतो निर्विकल्पकस्मरणवाद(१०)वीचिः ॥ * * ॥

केचन स्मरणमपि निर्विकल्पकमभ्युपगच्छन्ति ।

ननु इदमनुपपन्नम्, घटत्वप्रकारकं तद्व्यक्तिविशेष्यकं स्मरणं संस्कारञ्च प्रति तथाविधनिश्चयस्य (घटत्वप्रकारकतद्व्यक्तिविशेष्यकनिश्चयस्य) कारणतया निर्विकल्पकात् सविकल्पकादेव वा ज्ञानात् निर्विकल्पकयोः संस्कारस्मरणयोरसम्भवात् । अन्यथा घटत्वप्रकारकात् तद्व्यक्त्यवगाहिनः घटत्वेन व्यक्त्यन्तरावगाहिनश्च ज्ञानात् घटत्वेन तद्व्यक्त्यवगाहिनोः संस्कारस्मरणयोरुत्पत्त्यापत्तेः । अथ समवायसंसर्गावच्छिन्नघटत्वप्रकारतेतरप्रकारतानिरूपितविशेष्यताभिन्नतद्व्यक्तिवृत्तिविषयताकसंस्कारादौ घटत्वेन तद्व्यक्त्यवगाहिनो निर्णयस्य कारणतया सम्भवति घट इति सविकल्पकादेव निर्विकल्पकात्मकं स्मरणमिति चेन्न । एवं सति तद्व्यक्तिनिर्विकल्पकसंस्कारादेः घटत्वपटत्वादिप्रकारकसकलनिर्णयकार्यतावच्छेदकावलीढतया कस्याप्यसर्वज्ञस्य तदुत्पत्त्यसम्भवात्, सम्भवे वा व्यभिचारप्रसङ्गात् । न च घटत्वेतरप्रकारत्वाद्यनिरूपिततद्व्यक्तिविषयताकत्वेनैव घटादिनिर्णयानां जनकत्वं तथाविधयावज्जनकधर्मवत्तया निर्विकल्पकादेव निर्विकल्पात्मकस्मरणादिति नव्यभिचार इति वाच्यम् । नीलो घट इति निर्णयात् घट इति संस्कारादेरनुत्पत्तिप्रसङ्गात् । एतेन तद्व्यक्तिविषयतानिरूपितसमवायसंसर्गेतरसंसर्गत्वानिरूपितघटत्वविषयताकत्वेन निर्णयस्य तथाविधसंस्कारादौ जनकत्वमपि प्रत्युक्तम् । समवायकालिकसंसर्गाभ्यां घटत्वेन तद्व्यक्त्यवगाहिनो ज्ञानात्कालिकसंसर्गपरिहारेण जायमाने घट इति स्मरणादौ व्यभिचारप्रसङ्गात् । अथ तद्व्यक्तिगोचरनिर्विकल्पकस्मरणे तथाविधसंस्कारस्य तद्व्यक्तिगोचरनिर्विकल्पकसंस्कारे च तद्व्यक्तिनिर्विकल्पकज्ञानस्य कारणत्वमनायत्या कल्प्यते इति चेन्न । ता[illegible]ानादिपदादाकाशगोचरनिर्विकल्पकस्मरणानुपपत्तितादवस्थ्यात्, नहि

न[illegible]गोचरो निर्विकल्पकः साक्षात्कारोऽस्ति येन तथाविधः संस्कारो मस्मादृश[illegible] अनादिस्मरणसंस्कारपरम्पराकल्पने तु प्रमाणाभावः, अपूर्वलित्वं संश[illegible]यस्य वस्तुनः पारिभाषिकडित्थादिपदादस्मरणप्रसङ्गश्चेति । कार्यतानवच्छे[illegible]-पर्वतो वन्हिमानित्यादेः संस्कारस्य समानाकारकस्मनिश्चयं प्रति संश[illegible]समवायप्रत्यासत्त्या जनकत्वं पर्वतत्वेन महानसं तद्व्य-

क्तित्वेन च गुञ्जामवगाहमानात् संस्कारात् वह्नित्वपर्वतत्वाभ्यां तद्व-
ह्नितत्पर्वतावगाहिस्मरणप्रसङ्गात् । अथ वह्नित्वावच्छिन्नतद्व्यक्तिवृ-
त्तिप्रकारतानिरूपितपर्वतत्वावच्छिन्नतद्व्यक्तिवृत्तिविषयताकत्वेनैव सं-
स्कारस्य तथाविधस्मरणजनकत्वमिति चेत । एवंसति वह्नित्वेन
तत्स्मरणव्यक्तिं पर्वतत्वेन तत्संस्कारव्यक्तिञ्चावगाहमानं स्मरणं प्रति
तथाविधस्य संस्कारस्य जनकताया आवश्यकत्वे तत्तद्व्यक्तित्वादिनैव
स्मरणसंस्कारयोः कार्यकारणभावौचित्यात् । एतेन वह्नित्वावच्छिन्नत-
द्व्यक्तिवृत्तिप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतया तदात्मसम-
वेतस्मरणे तथैव तदात्मसमवेतसंस्कारस्य कारणत्वमित्यपि प्रत्युक्तम् ।
व्यक्तिभेदेन कारणताभेदध्रौव्ये तत्तद्व्यक्तित्वादिनैव तयोः कार्यकारणभा-
वौचित्यात्, तस्माद्विषयविषयतयोः संसर्गस्य विषयोत्पादकसामग्री-
नियम्यतया विषयतया सह ज्ञानस्य संसर्गः ज्ञानोत्पादिकां सामग्रीमपे-
क्षत इति विषयतानिष्ठनिरूपकतासंसर्गेण तदात्मसमवेतस्मरणं प्रति
तेनैव संसर्गेण तदात्मसमवेतसंस्कारः कारणमित्यभ्युपगन्तव्यम्, वि-
द्यते च वह्निप्रकारतानिरूपितपर्वतविशेष्यतायां निरूपकतासंसर्गेण
संस्कार इति तत्र निरूपकतासंसर्गेण पर्वतो वन्हिमानित्याकारकं
स्मरणमपेक्षते, ज्ञानसंस्कारयोः विषयताभेदे प्रमाणाभावात्, तत्तद्वि-
षयतावृत्तिनिरूपकतासंसर्गेण जन्यगुणसामान्यं प्रति तादात्म्येन तत्त-
द्विषयता कारणमिति तद्विषयताप्रत्यासन्नतदात्मसमवेतसंस्कारस्वरूप-
सामग्री तत्तद्विषयतानिरूपकस्मरणोत्पादकतदात्मप्रत्यासन्नकारणक-
लापाधिकरणकालवृत्तित्वविशिष्टत्वे सति तादात्म्यनिरूपकताभ्यां घ-
टितेन सामानाधिकरण्येन तद्विषयतानिष्ठा निरूपकतया स्मरणोत्पा-
दिका स्वीकर्तव्या, इतरथा वह्निमत्पर्वतविषयतायां पटवद्भूतलवि-
षयतायां च निरूपकतया संस्कारसत्वे सति च भूतलं न पटवदि-
ति बाधे पटोद्बोधकसम्बन्धिदर्शनादिविरहे वा यथा सामान्यव-
ह्निमत्पर्वतविषगतायां स्मरणं तस्याः पटवद्भूतलविषयतायामपि अ-
वैकल्यात्तत्रापि स्मरणं प्रसज्यते, सा हि सामग्री तदात्मावच्छेदेन वह्नि-
बाधादि, वह्निसम्बन्धिदर्शनाधिकरणं यः क्षणस्तदवच्छेदेन निरूपकत
या विद्यमानः तदात्मसमवेतसंस्कार एव, स च विषयताकार्येऽप्य
शिष्टः, तद्विषयतानां प्रतिस्वं कारणताभ्युपगमे तु वह्निसम्बन्धिद
ह्निबाधादिघटितायां सामग्र्यां निरूपकतया संस्कारः तादात्म्ये
मत्पर्वतविषयता च प्रविशतीति न पटवद्भूतलविषयताया
एवञ्च निर्विकल्पकविषयताव्यक्तावपि संस्कारसत्वात् तत्र

स्मरणमुत्पद्यते ।

स्यादेतत् यदि विषयतावृत्तिनिरूपकतया संस्कारं प्रति तथैवानुभवस्य कारणत्वं स्यात्, नचैवं, संशयात्मकानुभवादपि संस्कारोत्पत्तिप्रसङ्गात्, निर्णयत्वेनानुभवस्य जनकत्वे तत्तद्विषयभेदेन कारणताभेदध्रौव्यादात्मनिष्ठप्रत्यासत्त्यैव कार्यकारणभावस्यौचित्यात् न निर्विकल्पकविषयतायां संस्कारोत्पत्तिः सम्भवतीति चेन्न ।

विषयतावृत्तिनिरूपकतासंसर्गेणानुभवस्य तथैव संस्कारं प्रति जनकतायां निर्णयत्वादेरप्रवेशात् वह्निवह्न्यभावोभयप्रकारतानिरूपितविशेष्यताव्यक्त्यादिना तादात्म्येन संस्कारं प्रति प्रतिबन्धकत्वादेव न संशयाकारः संस्कारः. भिद्यते हि तत्तदभावोभयप्रकारकविषयता निश्चयविषयताद्वयात्, अन्यथा सर्वाणि द्रव्याणि संयोगवन्ति तदभाववन्ति चेति समुच्चयात् द्रव्यं संयोगवन्नवेति संशयस्य वैलक्षण्यानुपपत्तेः । भवतु वा पर्वतत्वावच्छेदेन वह्न्यभावावगाहिना संस्कारेणानिरूपिता या विषयता तन्निष्ठनिरूपकतासंसर्गेण संस्कारं प्रति पर्वतत्वावच्छेदेन वह्न्यभावावगाहिनो ज्ञानादन्यस्यानुभवस्य निरूपकतासंसर्गेण कारणत्वम् । भवति च वह्निमत्पर्वतविषयता वह्न्यभाववत्पर्वतविषयताकसंस्कारेण निरूपिता, तत्र च निरूपकतया संस्काराव्यवहितप्राक्क्षणावच्छेदेन विद्यते वह्न्यभाववत्पर्वताविषयकोऽनुभवः, तत्तद्विषयताव्यक्तीनां तादात्म्येन कारणता तत्तन्निष्ठनिरूपकतासंसर्गेण जन्यगुणसामान्यं प्रति इत्यावेदितं प्राक्, तेन वह्निमत्पर्वतविषयतायामिव पटवद्भूतलविषयतायामपि वह्न्यभाववत्पर्वताविषयकात्पर्वतो वह्निमान् भूतलं पटवन्नवेत्यनुभवात् संस्कारोत्पत्त्यापत्तिः समाहिता वेदितव्या वह्निमत्पर्वतविषयतातदात्म्यादेरेव तत्सामग्रीघटकत्वाभ्युपगमात् । न चवं पर्वतो वह्निमानिति निर्णयात् पर्वतो वह्निमान्नवेत्यादिसंशयाद्वा पर्वत इति वह्निरिति वह्निमानिति च वह्निप्रकारत्वानिरूपकपर्वतविषयतायां वह्निमुख्यविशेष्यतायामनवच्छिन्नायां वह्निप्रकारकविशेष्यतायाञ्च नि-
त.रूपकतया संस्कारस्य स्मरणस्य चोत्पत्तिर्न घटते । तासु विषयतासु
ता.. निरूपकतया निरुक्तसंशयनिर्णययोरभावात् वह्नित्वप्रकारकमुख्यविशे-
न.. त्वादेर्विशिष्टविषयताव्यापकत्वन्तु नाशङ्कनीयम्, भिन्नविषयकानुमिति-
मग्रीदृश.. ..काले वह्निविशिष्टप्रत्यक्षं जायतामितीच्छया जनिते पर्वतो वह्नि-
त्वं संश.. ..य प्रत्यक्षे वह्निमुख्यविशेष्यकत्वस्यासम्भवात् वह्निमुख्यविशेष्य-
कार्यतानवच्छे.. प्रति प्रतिबन्धकतायामुत्तेजिकाया वह्निप्रत्यक्षं जायतामिती-
निश्चयं प्रति सं.. ..भवात्, वह्निमत्पर्वतप्रत्यक्षेच्छाया अपि तत्रोत्तेजकत्वे तादृ-

७१ ब्रह्मसूत्रशाङ्करभाष्यम् । चतुःसूत्र्यन्त पूर्णानन्दीय व्याख्या सहितया श्रीगोविन्दानन्द प्रणीतया रत्नप्रभया समन्वितम् । सम्पूर्णम् । [वेदान्तविभागे ९] रु० ५—०

७२ सिद्धान्तशिरोमणिः । श्रीभास्कराचार्य विरचितः । वासनाभाष्य सहितः ज्योतिषाचार्य म०म० श्री ६ मद्बापूदेवशास्त्रिकृतटिप्पणी सहितः । "गणिताध्यायः" । रु० २—०
"गोलाध्यायः" । रु० २—० [ज्यो० वि० ४] सम्पूर्ण रु० ४—०

७३ काकचण्डीश्वरकल्पतन्त्रम् । पण्डित रामकृष्ण शर्म्मणा सम्पादितम् । पण्डित बटुकनाथ शर्म्मा एम. ए. साहित्योपाध्याय इत्येतेन लिखितया प्रस्तावनया सनाथीकृतम् । [आयुर्वेद शास्त्रविभागे १] रु० ०—८

७४ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् मल्लिनाथसूरिकृतया घण्टापथसमाख्यव्याख्यया तथा पं० श्रीगङ्गाधरशर्मणा कृतया सुधाऽऽख्यव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] । [काव्य वि० १०] रु० ०—१२

७५ चन्द्रालोकः । पीयूषवर्षश्रीजयदेवकवि प्रणीतः । श्रीमत्पद्मनाभमिश्रापराभिधान प्रद्योतनभट्टाचार्य विरचितया चन्द्रालोकप्रकाशापराख्य 'शरदागम' टीकया सङ्कलितः । साहित्याचार्येण खिस्ते इत्युपाख्यनारायणशास्त्रिणा भूमिकादिभिः सम्भूष्य सम्पादितः । [अलङ्कार वि० ३] रु० ०—१०

७६ किरातार्जुनीयम् । श्रीमत्कविकुलचूडामणिभारविविरचितम् । मल्लिनाथसूरिकृतया घण्टापथसमाख्यया तथा पं० श्रीकनकलालशर्मणा कृतया भावार्थदीपिनीव्याख्यया समलङ्कृतम् । [सर्गत्रयमात्रम्] [काव्य वि० ११] रु० ०—६

७७ शक्तिवादः, श्रीगदाधरभट्टाचार्यप्रणीतः, पण्डितप्रवरश्रीहरिनाथतर्कसिद्धान्तभट्टाचार्यविरचितविवृतिसहितः । [न्यायविभागे १०] रु० ३—

७८ माथुरीपञ्चलक्षणी । पं श्रीउमानाथज्योतिलकृतव्याख्या सहिता तथा माथुरीसिंहव्याघ्रलक्षणम् । पं० श्रीहरिरामशुक्ल विरचितया व्याख्यया सहितं तथा पं० श्रीहरिहरशास्त्रि सङ्कलित माथुरीपञ्चलक्षणी क्रोडपत्रेण च । [न्याय वि० ११] रु० ०—६

७९ रसाध्यायः । टीकया संवलितः । [आयुर्वेदशास्त्र वि० २] रु० ०—१०

८० (१) पाणिनिव्याकरणे वादरत्नम् । न्यायव्याकरणाचार्य मीमांसक शिरोमणि पं० सूर्यनारायणशुक्लेन विरचितम् । (तत्र च न्यास परिष्कारपरिशिष्ट भेदेन प्रकरण त्रयम् यत्र पञ्चन्यून सार्धशतसूत्रेषु १४५ महताटोपेन न्यासाविचारताः तत्र प्रथमं प्रकरणं मुद्रितं प्रथमो भागः । [व्या० वि १०] रु० १—८

८० (२) पाणिनीव्याकरणे वादरत्नम् । द्वितीयोभागः [न्या० वि०] रु० १—४

८१ गणितकौमुदी । [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितगणितसंग्रहपुस्तकम् । [गणितविभागे १] रु० ०—६

८२ छन्दः कौमुदी । [हिन्दीभाषाटीकासहिता] प्रथमापरीक्षापाठ्यनिर्द्धारितछन्दसंग्रहपुस्तकम् । [छन्दोविभागे ३] रु० ०—६

८३ योगदर्शनम् । महर्षिप्रवरपतञ्जलिप्रणीतम् । तत्र (१) भोजवृत्तिः, [२] भावागणेशवृत्तिः, [३] नागोजीभट्टवृत्तिः, [४] मणिप्रभा, [५] योगचन्द्रिका, [६] योगसुधाकराख्य टीका षट्कसमेतम् । सटिप्पण । [योग० विभागे १] रु० २-

८४ रघुवंशमहाकाव्यम् । श्रीकालिदासविरचितम् । म० म० मल्लिनाथकृत सञ्जीविनीटीका तथा परीक्षोपयोगि सुधाऽऽख्यव्याख्या सहितः। १ से ४ सर्ग मूल्यम् रु० १-४-० तथा १ से ५ सर्गः रु० १—८ तथा ६ से १० सर्ग

८५ योगदर्शनम् । पं० श्रीबलदेवमिश्रकृत योगसूत्रप्रदीपिकाख्यव्याख्यया स
सटिप्पण । [यो

८६ काव्यमीमांसा । राजशेखरविरचिता । साहित्याचार्य पं० श्रीन
खिस्ते कृत काव्यमीमांसा—चन्द्रिका टीका सहित [१ से ५ अ
भागः। [काव्यवि

८७ नागानन्दनाटकम् । श्रीहर्षदेवप्रणीतम् । काशीविश्वविद्यालयाऽध्यापकेन एम० ए० साहित्याचार्य पण्डित श्री बलदेव उपाध्यायेन स्वप्रणीतया भावार्थदीपिकाख्यया व्याख्यया समलङ्कृत्य वृहत् भूमिका हिन्दीभाषानुवादादिभिः सनाथीकृत्य सम्पादितम् । [नाटक विभागे १] रु० १

८८ मेघदूतकाव्यम् । महाकवि श्रीकालीदास विरचितम् । मल्लिनाथकृत सञ्जीविन्या, चारित्रवर्द्धनाचार्य विरचित चारित्रवर्द्धिन्या तथा साहित्याचार्य पं० श्री नारायण शास्त्री खिस्तेकृत भावप्रबोधिनीव्याख्या टिप्पण्या च सहितम् । [काव्य० १४] रु०

८९ जागदीशीव्यधिकरणम् । न्यायाचार्यश्रीशिवदत्तमिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितम् । (न्यायविभागे १२) रु०

९० काव्यकल्पलतावृत्तिः । श्रीअमरचन्द्रयतिनिर्मिता अरिसिंहकृतसूत्रसहिता । (अलङ्कारविभागे ४) रु०

९१ वैयाकरणसिद्धान्तचन्द्रिका । श्रीरामाश्रमप्रणीता । श्रीसदानन्दकृत–सुबोधिन्या श्रीलोकेशकरकृत–तत्त्वदीपिकया व्याख्यया च सहिता । पं० श्रीनवकिशोर शास्त्रिणानिर्मितया चक्रधराख्य महत्या टिप्पण्या अव्ययार्थमालया लिङ्गानुशास नप्रक्रियया उणादिकोषेण च सहिता । (व्या० वि० ११) पूर्वार्द्धम् । रु०
उत्तरार्द्धं । रु०

२ त्रिपुरारहस्यम् (महात्म्यखण्डम्) साङ्ख्ययोगशास्त्राचार्य श्रीमुकुन्दलाल शास्त्रिणा संशोधितम् । साहित्याचार्य खिस्ते–इत्युपाख्य पं० श्रीनारायणशास्त्रिणा निबद्धाभ्यां भूमिकाऽध्यायानुक्रमणिकाभ्यां च सहितम् । (पुराणेतिहास वि०१) रु०

३ आपस्तम्बधर्मसूत्रम् । श्रीमद्धरदत्तमिश्र विरचितया उज्ज्वलाख्यया वृत्त्या संवलितम् । (कर्मकाण्डविभागे ७) रु०

४ अवच्छेदकत्वनिरुक्तिः । श्रीजगदीशतर्कालङ्कारकृताः । न्यायाचार्य श्रीशिवदत्त-मिश्रविरचित गंगाख्यव्याख्या टिप्पणी सहितः । (न्याय वि० १३) रु०

संस्कारदीपकः । गणेशपूजादिग्रहयागान्त–पूर्वाङ्ग–निरूपणात्मकः प्रथमो भागः । म० म० पण्डित श्रीनित्यानन्दपन्त पर्वतीयविरचितः । (कर्मकाण्ड वि० ८) रु०

वर्षकृत्यदीपकः । कालनिर्णयव्रतोद्यापनसहितः । म० म० पं० नित्यानन्दपन्त-पर्वतीय विरचितः । (कर्मकाण्ड वि० ९) रु०

श्रौतसूत्रम् । श्रीमन्महर्षि–लाट्यायनप्रणीतमग्निष्टोमान्तम् । (कर्मं० वि० १०) रु०

नलचम्पूः अथवा दमयन्तीकथा । महाकविश्रीत्रिविक्रमभट्टविरचिता । विषमपद-प्रकाशाख्यव्याख्यया सहिता । भावबोधिनी टिप्पणी सहिता । (का० वि०१६) रु

श्रीब्रह्मसूत्रम् । श्रीभगवन्निम्बार्क महामुनीन्द्रविरचित वेदान्तपारिजात सौरभा-ख्यसूत्रवाक्यार्थेन श्रीश्रीनिवासाचार्यचरणप्रणोत श्रीवेदान्तकौस्तुभभाष्येन च सनाथीकृतम् । (श्रीनिम्बार्कभाष्यम्) (वेदान्त वि० १०) रु०

[illegible]रवल्लभः । सर्वथाऽपि नवीनोऽपूर्वः प्रौढः परमोपयोगितया नियतमुपादेयतमश्छ-न्दोनिबन्धः, श्रीमता दैवज्ञाग्रेसरेणागममार्मिकेण कविपुङ्गवेन दुःखभञ्जनविदुषा प्रत्[illegible]नुः तत्सुतेन बहुशास्त्रपारगेण कविचक्रवर्त्तिना महामहोपाध्यायेन देवीप्रसाद-[illegible]ख्यविशेषेण कृतया वरवर्णिन्या टीकयोपस्कृतः । (छन्दः शास्त्र वि० ४) रु०

[illegible]कतायामुरम् । श्रीजगदीशतर्कालङ्कारकृतम् । न्यायाचार्य श्रीशिवदत्तमिश्र-[illegible]व्याख्या टिप्पणी सहितम् । (न्याय विभागे १४)) रु०

मत्पर्वतप्रत्य

80